अस्यार्थः ।—लग्नं चतुर्थाद्विशोध्य शेषमेकं, हिवुकं चतुर्थं कलत्रात् सप्तमाद्विशोध्य शेषं द्वितीयम् । यामित्रं सप्तमलग्नं मध्यविलग्नतः दशमलग्नाद्विशोध्य शेषं तृतीयम्, खभं दशमलग्नं विलग्नात्[1] विशोध्य शेषं चतुर्थम् एवं चत्वारि शेषाणि । अथ तेषां भावानां[2] पृथक् पृथक् तृतीयांशो राश्यादिको ग्राह्यः । अथ तं[3] तृतीयांशम् एकत्र एकगुणम् अन्यत्र द्विगुणं क्रमेण लग्नाम्बुजामित्रनभोगृहेषु लग्न-चतुर्थ-सप्तम-दशमेषु निदध्याद् योजयेत् । कस्यै[4] तदन्तरालोद्भवभावसिद्ध्यै । तेषां लग्न-चतुर्थ-सप्तम-दशमानाम् अन्तराले मध्ये उद्भवो येषां तेषां[5] द्वितीय-तृतीय-पञ्चम-षष्ठाष्टम-नवमैकादश-द्वादशानां सिद्ध्यै ।

एतदुक्तं भवति । लग्नं चतुर्थाच्छोध्य[6] शेषस्य[7] त्र्यंशो राश्यादिको ग्राह्यः । स एकगुणो लग्ने योज्यः स धनभावो भवति । अथ स एव त्र्यंशो द्विगुणो लग्ने योज्यः स तृतीयभावो भवति । अथ चतुर्थं सप्तमाद्विशोध्य शेषस्य त्र्यंशः[8] चतुर्थे योज्यः स [पञ्चम-भावो भवति । स एव त्र्यंशो द्विगुणः चतुर्थे योज्यः स रिपुभावो[9]] भवति । एवं सप्तमं दशमाद्विशोध्य शेषस्य त्र्यंशम् एकगुणं द्विगुणं[10] सप्तमे पृथक्[11] संयोज्याष्टम[12]भावो धर्मभावश्च भवति । एवं दशमं लग्नाद्विशोध्य शेषत्र्यंशम् एकगुणं द्विगुणं[13] च संयोज्य आयभावो व्ययभावश्च भवति । एवम् अमुना प्रकारेण द्विगुणाः षट् द्वादश[14] भावाः सिध्यन्ति । अमीभिर्द्वादशभिर्भावैः अशेषं सकलं शुभाशुभं जातकोक्तं फलं[15] चिन्त्यं विचारणीयमिति[16] । अस्योदाहरणम् ॥ श्रीमत्खानि[17]खानामहाशयानां[18] जन्मलग्नम् २।४।५६।२८ चतुर्थलग्नात् ४।१७।५।२० विशोध्य शेषं २।१२।८।५२ ; अस्य त्र्यंशः ०।२४।२।५७।२० । अयं लग्ने योजितः जातो धनभावः २।२८।५९।२५। अथ स एव त्र्यंशः ०।२४।२।५७।२० द्विगुणः १।१८।५।५४।४० लग्ने योजितो जातः[19] सहजभावः ३।२३।२।२३ ; अथ चतुर्थलग्नं ४।१७।५।२० सप्तमलग्नात् ८।४।५६।२८ विशोध्य शेषं ३।१७।५१।८ ; अस्य त्र्यंशः १।५।५७।२।४० चतुर्थे योजितः जातः[19] सुतभावः ५।२३।२।२३ ; स एव त्र्यंशः १।५।५७।२।४० द्विगुणः २।११।५४।५।२० चतुर्थे योजितः जातो[19] रिपुभावः[20] ६।२८।५९।२०[21] ; अथ सप्तमं

1A. No विलग्नात् । 2B. गृहाणां । 3A. No 'तं' । 4B. No 'कस्यै' । 5A. No 'तेषां' । 6. 'विशोध्य' इति वा 'शोधयित्वा' इति वा पाठ्यम् । 7A. No 'स्य' । 8B. एकद्विगुण इत्यधिकः पाठः । 9B. बन्धनीमध्ये 'पञ्चमः षष्ठमश्च' इति पाठः । 10B. एकद्विगुणं । 11B. पृथक् पृथक् । 12B. ०ज्य मृत्यु० । 13B. एकद्विगुणं । 14B. No द्वादश । 15B. No जातकोक्तं फलं । 16B. No 'विचारणीयमिति । 17B. खान । 18B. ०यशसां । 19B. No 'जातः' । 20B. अतः परं 'भवति' इत्यधिकम् । 21B. '२५' ।

८।४।५६।२८ दशमभावात् १०।१७।५।२० विशोध्य शेषं २।१२।८।५२ ; अस्य त्र्यंशः ०।२४।२।५७।२० सप्तमभावे योजितो जातो मृतिभावः ८।२८।५९।२५ ; स एव त्र्यंशो द्विगुणः १।१८।५।५४।४० पुनः[1] सप्तमे योजितो जातो[2] धर्मभावः ९।२३।२।२३ ; अथ दशमं लग्नं[3] १०।१७।५।२० लग्नात् २।४।५६।२८ विशोध्य शेषं ३।१७।५९।१८ ; अस्य त्र्यंशो १।५।५७।२।२०। दशमे योजितो जात आयभावः ११।२३।२।२३ ; स एव त्र्यंशो द्विगुणः २।११।५४।४।४० दशमे पुनर्योजितो जातो[4] व्ययभावः १२।२८।५९।२५ ।।६-७।।

एवं जातेषु सकलेषु भावेषु संधिज्ञानार्थं भावकुण्डलिकायां ग्रहज्ञानार्थ-मुपजातिकामाह ।।--

वदन्ति भावैक्यदलं हि सन्धिं तत्र स्थितः स्यादफलो ग्रहेन्द्रः ।
ऊनस्तु सन्धेर्गतभावजातमागामिजं चाभ्यधिकः करोति ।।८।।

अस्यार्थः ।---हि[5] निश्चयेन भावैक्यदलं संधिं वदन्ति । भावयोरैक्यं कृत्वा तस्यार्धं कार्यं स तयोर्भावयोः सन्धिर्भवति इति[6] । तद्यथा । लग्नद्वितीययोर्योगार्धं[7] लग्नस्योत्तरसंधिः धनभावस्य प्रथमसन्धिश्च । एवं धनसहजयोर्योगार्धं धनभावस्योत्तरसन्धिः सहजभावस्य प्रथमसंधिश्च । एवमग्रेऽपि । अत्रेदमवधेयम् । भावयोगकरणे यत्र चक्रादधिकं भवति तत्र चक्रं न त्याज्यम् । यस्मिन् भावे राशिस्थाने शून्यं तस्य भावस्य पूर्वभावेन सह संधिकरणे शून्यस्थाने द्वादश कार्याः, उत्तरभावेन सह सन्धिकरणे तु शून्यमेवेति । यथात्र व्ययभावः ०।२८।५९।२५ ; अस्य पूर्वम् आयभावः ११।२३।२।२३ ; अनयोः सन्धिकरणे व्ययभावस्य राशिस्थाने द्वादश युक्ताः[8] कार्याः । तथा कृते जातो व्ययभावः । १२।२८।५९।२५। अथा[9]नयोर्योगार्धं ०।११।०।५४ जात आयव्ययभावयोः संधिः । एवं संधिसाधनमुक्त्वा सन्धिप्रयोजनमाह ।।

तत्र स्थितः स्यादिति । तत्र सन्धौ स्थितो ग्रहः अफलः निःफलः स्यात् । अथ यदि ग्रह[10]सन्धेः सकाशात् ग्रहः[11] ऊनः[12] अल्पो भवति तर्हि गतभावजातं[13] फलं करोति, ययोर्भावयोः स[14] संधिरस्ति तयोर्भावयोर्मध्ये यः प्रथमभावस्तस्य फलं करोतीत्यर्थः । अथ यदि [सन्धेः सकाशादभ्यधिको ग्रहो भवति तर्हि आगामिजन् अग्रिमभावजं फलं करोति । ययोर्भावयोर्मध्ये ग्रहोऽधिकोऽस्ति[15]] तयोर्भावयोर्मध्ये य उत्तरार्ध[16]भावस्तस्य फलं करोतीत्यर्थः । अस्य फलितोऽर्थस्तु यस्य ग्रहस्य येन भावेन स्वल्पमन्तरं स ग्रहस्तस्य भावस्य फलं ददाति । यदा तु[17] ग्रहस्य भावद्वयेन सह तुल्यमन्तरं

1B. No 'पुनः' । 2B. No 'जातः' । 3A. लग्नं नास्ति । 4B. 'जातः' नास्ति । 5B. हीति । 6A. No इति । 7A. ०तीययोगार्धं । 8B. No युक्ताः । 9B. No अथ । 10B. No गृह० । 11B. No गृहः । 12A. No ऊनः । 13B. भावजं । 14B. No स । 15. बन्धनीमध्ये 'सन्धेर्ग्रहोऽधिकोऽस्ति' इति पाठः B-पुस्तके । 16B. No अर्धं । 17B. No तु ।

भवति तदा स ग्रहो निःफलः कस्यापि भावस्य फलं न ददाति। उच्च-स्वभवन-मित्र-सम-शत्रुभवनादिजं फलं तु ददात्येवेति। अत्रोदाहरणम्। लग्नं २।४।५६।२८ धनभावः २।२८।५९।२५ वदन्ति भावैक्यदलं हि संधिमित्युक्तत्वात् भावयोरैक्यं ५।३।५५।५३ ; अस्य दलं २।१६।५७।५६। [जातोऽयं लग्नधनयोः सन्धिः २।१६।५७।५६[1]] एवं धनसहजभावयोरनयोः[2] धन २।२८।५९।२५ सहज ३।२३।२।२३ ऐक्यं ६।२२।१।४८[3] दलं जातो धनसहजयोः संधिः ३।११।०।५४ ; एवमग्रेऽपि ज्ञेयम्[4] ॥

[एवं सिद्धा भावाः सन्धयश्च[5] लिख्यन्ते[6]] ॥

१	२	३	४	५	६	७	८	९	१०	११	१२
२	२	३	४	५	६	८	८	९	१०	११	१२
४	२८	२३	१७	२३	२८	४	२८	२३	१७	२३	२८
५६	५९	२	५	२	५९	५६	५९	२	५	२	५९
२८	२५	२३	२०	२३	२५	२८	२५	२३	२०	२३	२५
२	३	४	५	६	७	८	९	१०	११	०	१
	११					१६					
१६	०	५	५	११	१६	५७	११	५	५	११	१६
५७		३	३	०	५७	५६	०	३	३	०	५७
५६	५४	५१	५१	५४	५६		५४	५१	५१	५४	५६

अथ लग्नचतुर्थयोः सिद्धौ यथा सर्वे भावाः ससन्धयो युगपदेव सिध्यन्ति तथा प्रकारो लिख्यते। लग्नं चतुर्थात् संशोध्य शेषषष्ठं[7] तनौ क्षिपेत्। स लग्नधनयोः संधिः सन्धौ षष्ठं[8] पुनः क्षिपेत् ॥ स भवेद्धनभावोऽत्र तत्षडंशं पुनः क्षिपेत्। स भवेदग्रिमः सन्धिरेवं यावच्चतुर्थकम् ॥२ [रूपात् संशोध्य षष्ठांशं निक्षिपेत्तं चतुर्थके[9]]। उक्तक्रमेण षड्भावा यदा जाताः ससन्धयः ॥३॥ तदा ते राशिषट्काद्याः सप्तमाद्या भवन्ति ते। एवं युगपदेवात्र भावाः सर्वे ससन्धयः ॥४॥ अस्योदाहरणम्। लग्नं[10] २।४।५६।२८ चतुर्थात् ४।१७।५।२० संशोध्य शेषं २।१२।८।५२ ; अस्य षडंशः ०।१२।१।२८।४०। अयं लग्ने योजितो जातो लग्नधनयोः संधिः २।१६।५७।५६।४०[11] ; षडंशः पुनः संधौ योजितो[12] धनभावः २।२८।५९।२५।२० ; अस्मिन् पुनः स एव योजितो जातो[13] धनसहजयोः संधिः ३।११।०।५४ ; पुनरस्मिन् षडंशे योजिते जातः सहजभावः ३।२३।२।२३।४० ; पुनरस्मिन् योजिते जातः सहज-सुहृदोः संधिः ४।५।३।५१।२० ; चतुर्थभावस्तु प्रथम एव सिद्धोऽस्ति ४।१७।५।२० ; अथ षडंशो रूपाच्छुद्धः ०।१७।५८।३१।२० ; अयं चतुर्थे योजितो जातः सुहृत्-सुतयोः सन्धिः ५।५।३।५१।२० ; एवमग्रेऽपि ज्ञेयम् ॥८॥

1 बन्धनीस्थभागः B–पुस्तके नास्ति। 2 B. No अनयोः। 3B अङ्कभागो नास्ति। 4A–B. ज्ञेयाः। 5A. ससन्धयश्च। 6B. बन्धनीमध्ये सिद्धा भावाः ससन्धयः इति पाठः। 7B. ०षडंशं। 8B. षडंशं। 9B. बन्धनीस्थो भागो नास्ति। 10A. No लग्नं। 11B. No '४०'। 12B. अतः परम् असौ इत्यधिकम्। 13B. No जातः।

अधुना ग्रहस्य भावफले तारतम्यमिन्द्रवज्रयाह ।——

भावांशतुल्यः खलु वर्तमानभावोद्भवं पूर्णफलं विधत्त ।
भावोनके चाभ्य[1]धिके च खेटे त्रैराशिकेनात्र फलं प्रकल्प्यम् ।।९।।

अस्यार्थः ।।——ग्रहस्तु[2] भावस्य फलं ददात्ये[3]तत् पूर्वश्लोके प्रोक्तम् । कियत् फलं ददातीति[4] [अस्मिन् श्लोके प्रोच्यते । भावांशतुल्यो ग्रहः खलु इति निश्चितं वर्तमानभावोद्भवं पूर्णफलं विधत्ते[5]] । एतदुक्तं भवति । पूर्वश्लोकोक्तप्रकारेण यस्मिन् भावे ग्रहोऽस्ति तस्य भावस्य अंशादिना तुल्यो यदि ग्रहः स्यात्तर्हि तस्मिन् भावे शुभमशुभं वा[6] फलं संपूर्णं ददातीति । च परं खेटे ग्रहे भावोनके अभ्य[7]धिके च उक्तभावादूने उक्तभावादधिके वा सति अत्र भावे फलं त्रैराशिकेन प्रकल्प्यं ज्ञातव्यमित्यर्थः । त्रैराशिकमुक्तं लीलावत्यां श्रीभास्कराचार्यैः[8] ।।——

प्रमाणमिच्छा च समानजाती आद्यन्तयोस्तः[9] फलमन्यजातिः ।
मध्ये तदिच्छाहतमाद्यहृत् स्यादिच्छा फलं व्यस्तविधिर्विलोमे ।। इति ।।९।।

अथ ह्रासवृद्धिक्रमज्ञानेन विना त्रैराशिकं न संभवति । अतो ह्रासवृद्धिक्रममुपजातिकयाह ।।

भावप्रवत्तौ हि फलप्रवृत्तिः पूर्णं फलं भावसमांशकेषु ।
ह्रासक्रमाद् भावविरामकाले फलस्य नाशः कथितो मुनीन्द्रैः ।।१०।।

इह हि यस्य कस्यापि भावस्य संधिद्वयमस्ति । तत्र पूर्वसन्धौ भावस्य आरम्भः, उत्तरसन्धौ भावस्य समाप्तिरिति स्थितिरस्ति । भावप्रवृत्तौ ग्रहे सति फलप्रवृत्तिर्भवति[10] । ग्रहो वर्तमानभावस्य पूर्वसन्धिमुल्लङ्घ्य यदैव भावे किंचित् प्रविशति तदैव फलस्याप्यारंभो[11] भवति । अथ यथा यथा[12] ग्रहः संधिं त्यजति तथा तथा[13] फलमपि वर्धते । सा च वृद्धिर्भावांशपर्यन्तं परमा इत्याह ।। पूर्णं फलं भावसमांशकेषु । भावसमांशकेषु[14] ग्रहेषु सत्सु[15] संपूर्ण फलं भवति इत्यर्थः । अथ ग्रहो भावांशानुल्लंघ्य संधिं प्रति यथा यथा याति[16] तथा तथा फलस्य ह्रासो भवति, ह्रासक्रमेण भावसमाप्तौ ग्रहे गते सति फलस्य नाशो भवतीत्याह ।। ह्रासक्रमाद्भावविरामकाले फलस्य नाशः कथितो मुनीन्द्रैरिति । तथा चेदं सिद्धम् । ग्रहस्य सन्धिना सह यथा यथाधिकमन्तरं[17] तथा तथा फलमप्यधिकं भवति । अथ ग्रहसंध्यन्तरेण फलं साध्यम् । तत्र भावतुल्ये ग्रहे[18] यावद्भावसंध्यंतरं तावदेव ग्रहसंध्यन्तरमपि[19] भवति । तत्र फलमपि पूर्णं भवति । तथा च भावसंध्यंतरतुल्ये ग्रहसंध्यंतरे सति यदि रूपं फलं तर्हि इष्टे ग्रहसंध्यंतरे किमिति त्रैराशिकं

1B. चाप्य० । 2A. ग्रहस्य । 3B. ०त्येव । 4B. धत्ते इति । 5B. बन्धनीमध्ये 'तत्रोच्यते' इति पाठः । 6B. शुभफलं वाशुभ० । 7B. अप्य० । 8B. ०र्येण । 9B. ०स्तत् । 10B. अतः परम् इति इत्यधिकम् । 11B. भावस्यारम्भो । 12B. वीप्सा नास्ति । 13B. वीप्सा नास्ति । 14A. No 'भावसमांशकेषु' । 15A. ग्रहे सति । 16B. प्रति यथा प्रयाति । 17A. ०धिकसमीपतरं । 18B. ग्रहतुल्यैर्भावगृहैः । 19B. No अपि ।

सिद्धम् । अत्र पूर्वसन्धेरारभ्य भावांशपर्यन्तम् उपचयात्मकं फलम् । तत्साधने उत्तरसन्धिना सह अन्तरं कार्यम् ॥ इदं त्रैराशिकं श्लोके निबद्धं श्रीकेशवदैवज्ञैः ।—


शून्यं सन्धिषु भावगेऽखिलफलं स्याद्भावसंध्यंतरे-
णाप्तं सन्धिखगांतरं क्षयचयं भावाधिकेऽल्पे खगे ॥ इति ।

एवं जातं रूपादिभावफलम् ॥ यदि तु विंशोपका[1]त्मकं फलमपेक्षितं तदा त्रैराशिकं यथा । भावसन्ध्यन्तरतुल्ये ग्रहसन्ध्यन्तरे विंशतिः[2] फलं तदेष्टे[3] ग्रहसन्ध्यन्तरे किमिति । उक्तं च ॥

र	च	म	बु	बृ	शु	श	रा	के	
०	०	०	०	०	०	०	०	०	ग्रहभाव-
१	२२	१३	४२	३७	२४	२६	३०	३०	फलरूपादि
१२	०	५४	४२	३६	५४	५७	९	९	

सन्धेरूनाधिका भागा ग्रहस्य नखताडिताः ।
भावसन्ध्यन्तरेणाप्ताः फलं तच्च[4] विशोपकाः ॥ इति ॥

अथ जन्मकुण्डलिका भावकुण्डलिका च लिख्यते ॥



अथ आरोहावरोहसंज्ञभावफलानामुदाहरणम् । तत्र राश्याद्यो रविः ७।१७।१९।२५ रविनि[5]कटसन्धिः ७।१६।५७।५६। रविनि[6]कटभावः ८।४।५६।२८। संधिखगान्तरेण[7] भागादि ०।२१।२९। एते नखताडिताः ७।९।४०; एते सवर्णिता जातो भाज्यः २५७८० ; अथ भावसंध्यन्तरे १७।५८।३२ सवर्णिते[8] जातो भाजकः ६४७२[9] । भाजकेन भक्ते भाज्ये लब्धं विशोपकादि फलम्[10] । ०।२४ ; रविः संधिमुल्लङ्घ्य भावं प्रति याति अत इदम् आरोह-फलं [०।२४ ; यदा तु ग्रहो भावमुल्लंघ्य संधिं प्रति याति तदा अवरोहफलं[11]] ज्ञेयम् । एवं चन्द्रादीनामपि ज्ञेयम् । [अथ आरोहावरोहात्मकानि फलानि लिख्यन्ते ।[12]] ॥१०॥

1B. तुल्यविशेषा० । 2B. विंशति० । 3A. ०देव । 4B. तस्य । 5B. रवेर्नि० । 6B. रवेर्नि० । 7B. ०गान्तर० ; C. ०न्तरे । 8A. ०र्णितो । 9C. '५४।७।१२' इति पाठः ; 10A. No फलम । 11C. बन्धनीस्थः पाठो नास्ति । 12B. बन्धनीमध्यस्थभागो नास्ति ।

र७	च२२	मं५	बु७	बृ७	शु२	श११	रा१२	के६	आरो
आरोह	अवरोह	आरोह	अवरोह	आरोह	अवरोह	आरोह	अवरोह	आरोह	हावरो
०	७	४	१४	१२	८	८	१०	१००	हादिवि
२४	२०	३८	१४	२२	१८	५९	३	३	शोधका

अथ तेषां भावानां न केवलं जन्मनि प्रयोजनम् अपि तु यात्राविवाहादिष्वपि प्रयोजनमस्तीत्याहेन्द्रवज्रया ।—

जन्म-प्रयाण-व्रतबंध-चौल-नृपाभिषेकादिकरग्रहेषु ।

एवं हि भावाः परिकल्पनीयास्तैरेव योगोत्थफलानि यस्मात् ॥ ११ ॥

सुगमोऽर्थः ॥११॥

इति श्रीवल्लालदैवज्ञात्मज-श्रीकृष्णदैवज्ञविरचिते श्रीपतिभट्टकृत-जातक-पद्धत्युदाहरणे भावाध्यायोदाहरणम्[1] ॥१॥

[द्वितीयं दृष्टिगणिताध्यायोदाहरणम्]

अथ दृग्[2]गणितं विवक्षु[3]स्तत्प्रयोजनं तावदिन्द्रवज्रयाह[4] ।

उक्तानि यस्माद् बहुधा फलानि व्योमौकसां दृष्टिसमुद्भवानि ।

तस्मात् प्रवक्ष्म्यानयनं हि दृष्टेर्होराविदां दृक्फलनिर्णयाय ॥१॥

अस्यार्थः ।—तस्मात् कारणात् दृष्टेरानयनं प्रवक्ष्मि । तस्मात् कुतः ? यस्मात् कारणात् व्योमौकसां ग्रहाणां दृष्टिसमुद्भवानि दृष्टितो जातानि फलानि बहुधा उक्तानि, जातकशास्त्र इति शेषः । ननु जातके यथा दृष्टिफलान्युक्तानि तथा दृष्टयोऽप्युक्ताः सन्ति तत् किमर्थमयं प्रयास इत्यत आह होराविदां दृक्फलनिर्णयाय । [होराविदां जातकशास्त्रविदां दृष्टिफलस्य निर्णयाय[5]] । शुभाशुभदृष्टिसंकरे किं फलं वक्तव्यमिति सन्देहे दृष्टिफलस्य न्यूनाधिकभावविचारे वा सति अनेन निर्णयो भवति । जातकशास्त्रे तु अनुपातेनोक्तमिति[6] तत्र दृष्टितारतम्यं न ज्ञायते इति भावः ॥१॥

अथ दृष्टिगणितं मन्दाक्रान्ताद्वयेन उपजातिकया चाह ॥—

दृश्यो द्रष्ट्रा विरहिततनुः षड्गृहेभ्योऽधिकश्चेद्-

दिग्भ्यः शोध्यो विहितकलिकः खाभ्रपक्षाद्रि ७२०० भक्तः ।

दृष्टिः सा स्याद् यदि शर ५ गृहेभ्योऽधिकः पञ्चहीनो

लिप्तीभूतो धृतिशत १८०० हृतः स्याच्चतुर्भाधिकश्चेत् ॥२॥

1A. भावाध्यायः । 2C. दृष्टि० । 3A. ०क्षित० (?) । 4A. ०देवाहेन्द्रवज्रया ; C. ०दाहेन्द्रवज्रया । 5B. वन्धनीस्थभागो नास्ति । 6B. ०तोक्त इति ।

त्यक्त्वेषुभ्यः५ खखरसगुणै ३६०० र्वह्निभेभ्योऽधिकश्चेच्
शोध्योऽब्धिभ्यो४ विरचितकलः षष्टिकृत्या ३६०० समेतः ।
भक्तो द्व्यश्वैः शतविनिहतै ७२०० राशियुग्माधिकोऽपि
द्वाभ्यामूनो नवशत ९०० युतो व्योमखांगाग्नि ३६०० भक्तः ॥३॥

एकोनितश्चकगृहाधिकश्चेत् कलीकृतो द्व्यश्वशतै ७२०० र्विभक्तः ।
एवं स्फुटाः खेचरदृष्टयः स्युर्दिग्भ्योऽधिकं पश्यति न ग्रहेन्द्रः ॥४॥

व्याख्या ।—यो ग्रहः पश्यति स द्रष्टा, यस्योपरि दृष्टिरानीयते सः दृश्यः । दृश्यो ग्रहः द्रष्ट्रा विरहिततनुः कार्यः, दृश्यमध्ये द्रष्टा शोध्य इत्यर्थः । शोधनानन्तरं चेत् षड्गृहेभ्यः[1] अधिकः स्यात् तदा दिग्भ्यः दशराशिभ्यः सकाशात् शोध्यः पश्चाद्विहितकलिकः कलीकृत इत्यर्थः । तदनन्तरं खाभ्रपक्षाद्रि ७२०० भक्तः यल्लब्धं[2] सा रूपादिका दृष्टिः स्यात् । अथ यदि द्रष्ट्रा हीनो दृश्यः षडधिको नास्ति किन्तु शरगृहेभ्यः पञ्चराशिभ्योऽधिकोऽस्ति तदा पञ्चहीनः कार्यः । तन्मध्ये पञ्च शोध्य इत्यर्थः । लिप्तीभूतः शेषाङ्कस्य कला[3] कार्या इत्यर्थः । तदनन्तरं धृतिशत-१८०० हृतः ताः कलाः अष्टादशशतैर्भक्ताः यल्लब्धं[4] सा रूपादिका दृष्टिः स्यात् । अथ यदा द्रष्ट्रा हीनो दृश्यः पञ्चाधिको नास्ति किन्तु चतुर्भाधिकः राशिचतुष्टयाधिकोऽस्ति तदा इषुभ्यः पञ्चराशिभ्यः त्यक्त्वा विशोध्य तदनन्तरं विरचितकलः तदनन्तरं खखरसगुणैः ३६०० भक्तः यल्लभ्यते सा दृष्टिः स्यात् । अथ द्रष्ट्रा हीनो दृश्यो यदि राशिचतुष्टयाधिको नास्ति किंतु वह्निभेभ्यः राशित्रयात् अधिकोऽस्ति तदाऽसौ अब्धिभ्यः राशिचतुष्टयाच्छोध्यः पश्चाद्विरचितकलः तदनन्तरं षष्टिकृत्या ३६०० समेतः युक्तः कार्यः । तदनन्तरं शतविनिहतैः शतगुणितैः द्व्यश्वैः द्विसप्ततिशतैः ७२०० भक्तः यल्लभ्यते सा दृष्टिः स्यात् । अथ द्रष्ट्रा हीनो दृश्यः राशित्रयाधिको नास्ति किंतु राशियुग्माऽधिकोऽस्ति तदासौ द्वाभ्यामूनः कार्यः, तन्मध्ये राशिद्वयं शोध्यमित्यर्थः । ततो लिप्तीभूतः ततो नवशत ९०० युतः ततो व्योमखांगाग्नि ३६०० भक्तः यल्लभ्यते सा दृष्टिः स्यात् । अथ द्रष्ट्रा हीनो दृश्यः यदि राशिद्वयाधिको नास्ति किन्तु[5] एकगृहाधिकः एकराशेः सकाशात् अधिकोऽस्ति तदासौ[6] एकोनितः कार्यः । ततः कलीकृतः द्व्यश्वशतै ७२०० विभक्तो यल्लभ्यते सा दृष्टिः स्यात् । एवम् अमुना प्रकारेण खेचरदृष्टयः स्फुटाः स्युः । ग्रहेन्द्रः दिग्भ्योऽधिकं स्वस्थानात् राशिदशकादधिकं गृहं[7] न पश्यति । द्रष्ट्रा हीनो दृश्यो दशराशिभ्योऽधिको[8] यदि स्यात्तदा दृष्टिः शून्य[9]-मित्यर्थः ॥ २—४ ॥

1B. अतः परं षड्राशिभ्यः इत्यधिकम् । 2B. यच्च लब्धम् । 3B. ०भूतस्य शेषं कल । 4B. ०ल्लभ्यते । 5B. अतः परं स इत्यधिकम् । 6B. असौ इति नास्ति । 7B. गृहं नास्ति । 8B. राशिदशकाधिको । 9B. दृष्टिशून्य० ।

अथ भौमगुरुशनैश्चराणां दृष्टिषु स्थानविशेषे क्षेपकमुपजातिकयाह ॥––

त्रिद्व्येकपादाः क्रमशो निधेयाः शनैश्चराचार्यमहीसुतानाम् ।
त्रि-कर्मणोर्धी[1]-शुभयोश्च रंध्र-बन्ध्वोः स्थितानामिह पूर्वदृक्षु ॥५॥

व्याख्या ।––शनैश्चराचार्यमहीसुतानां शनैश्चरगुरुभौमेभ्यः[2] त्रि-कर्मणोः ३–१० धी-शुभयो ५-९ रंध्र-बन्ध्वोश्च[3] ८-४ स्थितानां ग्रहाणां पूर्वदृक्षु पूर्वानीतदृष्टिषु क्रमशः त्रिद्व्येकपादाः त्रयः पादाः द्वौ पादौ एक[:][4] पादश्च निधेयाः क्षेप्याः । एतदुक्तं भवति ॥ शनैश्चरात् तृतीये दशमे वा यो ग्रहो भावो वाऽस्ति तस्मिन् ग्रहे भावे वा या शनैश्चरस्य[5] दृष्टिर्गणितागताऽस्ति, तस्यां चरणत्रयं योज्यम् । अयमर्थः ॥ यत्र शनैश्चरो द्रष्टाऽस्ति तत्र 'दृश्यो द्रष्ट्रा विरहिततनुरि'ति कृते यदि राशिद्वयं राशिनवकं वा भवति तदा गणितागतदृष्टौ चरणत्रयं क्षेप्यम् । यदि तु राशिद्वयात्[6] राशिनवकाद्वा[7] कियन्तोऽपि भागा न्यूना अधिका वा स्युः तदा क्षेपेऽनुपातो द्रष्टव्यः । एवं गुरोः सकाशात् धी-शुभयोः पञ्चमे नवमे वा योऽस्ति तस्योपरि या गुरुदृष्टिरागताऽस्ति तत्र चरणद्वयं क्षेप्यम् । अयमर्थः ॥ यत्र द्रष्टा गुरुरस्ति तत्र 'दृश्यो द्रष्ट्रा विरहित-तनुरि'ति कृते यदि पूर्णराशिचतुष्टयं राश्यष्टकं वा भवति तदा गणितागतदृष्टौ चरण-द्वयं क्षेप्यम् । अत्रापि राशिचतुष्टयात् राश्यष्टकाद्वा अंशानां न्यूनाधिकभावे क्षेपेऽनु-पातो द्रष्टव्यः । एवं भौमात् अष्टमे चतुर्थे वा योऽस्ति तस्योपरि या भौमदृष्टिरागताऽस्ति तदा[8] तस्यामेकश्चरणः क्षेप्यः ॥ अयमर्थः ॥ यत्र भौमो द्रष्टास्ति तत्र 'दृश्यो द्रष्ट्रा विरहिततनु [रि'ति कृते यदि राशिसप्तकं राशित्रयं वा भवति तदा गणितागतदृष्टौ चरणः क्षेप्यः । राशिसप्तकाद् राशि-[9]] त्रयाद्वा अंशा न्यूना अधिका वा यदि स्युस्तदा क्षेपेऽनुपातो विधेयः । अनुपातो यथा ।

स्वस्वक्षेपाः पृथक् स्थाप्याः प्रोक्तादूनाधिकैर्लवैः ।
गुणिताः खगुणै ३० र्भक्ता लब्धोनास्ते परिस्फुटाः ॥

अत्रोदाहरणम् ॥––द्रष्टा शनिः ०।२।५६।२१ दृश्यश्चन्द्रः १।१०।२१।३३ अयं द्रष्ट्रा हीनो जातः १।७।२५।१२ अत्र 'एकोनितश्चैकगृहाधिकश्चेदि'त्यादिना जाता दृष्टिः ०।३।४३ ; अथ क्षेपः । यत्र शनैश्चरो द्रष्टास्ति तत्र 'दृश्यो द्रष्ट्रा विरहिततनुरि'ति कृते यदि [राशिद्वयं भवति तत्र क्षेपलिप्ता ४५ ; अत्र तु द्रष्ट्रा हीनो दृश्यः १।७।२५।१२, अस्य[10]]राशिद्वयस्य चान्तरे अंशा २२।३४।४८, एते राशिद्वयात् न्यूनाः सन्ति । अतोऽत्रा[11]नुपातः स्वक्षेपः पृथक् स्थापितः[12] ४५, अयमूनै[13]रेतैर्लवैः २२।३४।४८ गुणितः १०१६।६। त्रिंशता[14] भक्ते लब्धं ३३।५२ अनेन रहितः क्षेपो जातः स्फुटः ११।८ ; अयं

1A—B. धी । 2B. नास्ति । 3A. No च । 4B. No एकः । 5B-C. No 'स्य' । 6A. ०त्रयात् । 7A. ०दशकाद्वा । 8B. ततः । 9. बन्धन्यन्तर्गतोंऽशः A–पुस्तके नास्ति । 10. बन्धन्यन्तर्गतो भागः A–पुस्तके नास्ति । 11B. इत्यतो० । 12B. स्थाप्यः । 13A. अयं क्षेपै० । 14B. त्रिंशद्० ।

गणितागतदृष्टौ०।३।४३ योजितः ०।१४।५१ जाता स्फुटा[1] दृष्टिः। एवं राशिद्वयात् अधिकेषु अंशेषु[2] द्रष्टव्यम् । यथा द्रष्टा शनिः ०।२।५६।२१ दृश्यं लग्नं २।४।५६।२८ इदं द्रष्ट्रा हीनं जातं २।२।०।७ अत्र राशिद्वयादधिका भागाः २।०।७ एतैः क्षेपः ४५ गुणितः ९०।५।

	र	चं	मं	बु	बृ	शु	श		१	२	३	४	५	६	७	८	९	१०	११	१२
	०	०	०	०	०	०	०		०	०	०	०	०	०	०	०	०	०	०	०
र	०	४६	४	०	०	०	१४	र	५१	३२	२७	१५	०	०	०	५	२०	४४	२४	२८
	०	४	३	०	०	०	२३		११	१०	८	७	०	०	०	५०	४३	४६	१७	२०
	०	०	०	०	०	०	०		०	०	०	०	०	०	०	०	०	०	०	०
चं	५६	०	३०	४५	५१	६	०	चं	०	२	२७	११	१७	३६	४७	३५	२३	११	०	०
	३१	०	३४	५९	९	५८	०		०	१८	४०	३८	१९	५८	४३	४१	४१	३८	०	०
	०	०	०	०	०	०	०		०	०	०	०	०	०	०	०	०	०	०	०
मं	२७	१९	०	५८	४३	०	४७	मं	१७	५	०	०	०	९	५३	०	१६	१५	०	४०
	८	२६	०	४५	१५	०	२४		९	७	०	०	०	५२	३३	१५	१२	४२	०	१५
	०	०	०	०	०	०	०		०	०	०	०	०	०	०	०	०	०	०	०
बु	०	३	१४	०	०	२	३८	बु	५३	५९	३७	२५	७	०	०	०	७	१३	२७	२
	०	५४	३५	०	०	२८	४४		४	४३	४२	१९	४१	०	०	०	१९	४१	४१	२५
	०	०	०	०	०	०	०		०	०	०	०	०	०	०	०	०	०	०	०
बृ	०	२४	२	०	०	०	५०	बृ	५६	४५	२७	३२	२	०	०	०	१२	३४	५७	१
	०	३४	२५	०	०	०	१८		३५	२७	२८	०	३२	०	०	०	२८	०	२८	४८
	०	०	०	०	०	०	०		०	०	०	०	०	०	०	०	०	०	०	०
शु	५६	४०	०	१९	१२	०	५८	शु	२९	१७	५	०	०	०	१६	३२	३५	१६	३८	४७
	३३	३५	०	५१	१५	०	५६		१९	१७	५६	०	०	०	३३	१७	१६	२८	१८	१७
	०	०	०	०	०	०	०		०	०	०	०	०	०	०	०	०	०	०	०
श	३७	१४	१२	३५	३२	५९	०	श	५८	३३	३४	१५	४०	४६	३२	५६	१९	०	०	०
	४८	५०	३६	३८	२६	४२	०		१	५७	५७	५१	१२	५९	०	३	४८	०	०	०

त्रिंशता[3] भक्ते लब्धं ३।० ; अनेन हीनः क्षेपो जातः स्फुटः ४२।० ; दृश्यो द्रष्ट्रा विरहिततनुरित्यादिना गणितागता दृष्टिः १७।० क्षेपेण ४२।० युक्ता जाता स्फुटा दृष्टिः ०।५९।० एवं राशिनवकादपि न्यूनाधिकभागेषु क्षेपः स्फुटः कार्यः । एवं गुरु-भौमयोरपि क्षेपस्फुटीकरणं द्रष्टव्यम् । इति भाववृद्धिचक्रम्[4] ॥ अथ दृष्टिगणितार्थं सुगम-प्रकारो लिख्यते—

1A. स्फुट०। 2B. No अंशेषु। 3B. त्रिंशद्०। 4B-C. No भाववृद्धिचक्रम्।

द्रष्ट्रा वर्जितदृश्यस्य क्रमादेकादिभ दशः ।
भागार्धं तिथियुग्भागा भागार्धोनशराब्धयः ॥१॥
भोग्यांशा द्विगुणांशाश्च तथा षड्भाधिके क्रमात् ।
षष्टिः शराब्धय ४५ स्त्रिंशत् ३० तिथयोऽ१५शा दलोनिताः ॥२॥
एकभे नवभे चार्को भुक्ता भोग्या द्विसंगुणाः ।
द्विभेंऽशार्धोनिता षष्टि ६० रष्टभे खाग्नि ३० युग्लवाः ॥३॥
त्रिसप्तभे तु भौमस्य षष्टिरत्र लवोनिता ।
सार्धांशास्तिथिसंयुक्ता द्विभे रूपं सदाङ्कभे[1] ॥४॥
त्रिसप्तभे तु जीवस्य भागार्थं शरवेदयुक् ।
द्विगुणः सदलश्चोनाः खरसाश्चतुरष्टभे[2] ॥५[3]॥
इति श्रीवल्लाल-दैवज्ञात्मज-कृष्णदैवज्ञविरचिते श्रीपतिभट्टकृत[4]जातकपद्धत्युदाहरण दृष्टि-गणितो[5]दाहरणम् [॥२॥]

[तृतीयं बलाध्यायोदाहरणम्]

[अथ प्रयोजनकथनपूर्वकं बलकथनमुपजातिकया प्रतिजानीते[6]] ।—

बलावबोधेन विना दशादिक्रमावबोधो न भवेद् यतोऽतः ।
तत् स्थान-दिक्-काल-निसर्ग-चेष्टा-दृग्भेदभिन्नं कथयाम्यशेषम् ॥१॥

व्याख्या ।—यतः कारणाद् दशादिक्रमावबोधो दशान्तर्दशा-विदशानां क्रमज्ञानं बलावबोधेन विना बलज्ञानं विना न भवेत्, अतः कारणात्तद्बलम् अशेषं सकलं कथयामि । कीदृशं तद्बलम् ? स्थान-दिक्-काल-निसर्ग-चेष्टा-दृग्भेदभिन्नम् । स्थानबलं १, दिग्बलं २, कालबलं ३, निसर्ग[7]बलं ४, चेष्टाबलं ५, दृग्बलं ६, इति षट्प्रकारं बलमित्यर्थः । तत्र स्थानबलं पञ्चविधमस्ति । तद् यथा——उच्चबलं १ सप्तवर्गजं बलं २ भांशबलं ३ कण्टकादिबलं ४ भांतमध्यमुख[8]बलं चेति ५ ॥१॥

तत्रोच्चबलं शार्दूलविक्रीडितपूर्वार्धेनाह ॥—

नीचोनो द्युचरोऽधिको यदि भवेत् षड्भात्तदा प्रच्युत-
श्चक्रात् क्लृप्तकलः ख-खाष्ट-ख-कुभि १०८००भक्तो बलं तुङ्गजम्[9] ।

अस्यार्थः ।—द्युचरो ग्रहः नीचोनो नीचेन ऊनः सन् यदि[10] षड्भात् राशिषट्कात् अधिको भवेत् तदा चक्रात् प्रच्युतः द्वादशराशिभ्यः शुद्धः अन्यथा यथास्थित एव

---

1. अयं श्लोकः A—पुस्तके नास्ति । 2B. ०साश्च चतुष्टये । 3A. ४ । 4A. ०भट्टीय० । 5B. ०बलाध्यायो० । 6B. बन्धन्यन्तर्गतो भागो नास्ति । 7B. ०सर्गिक । 8B. पुंस्त्रिकादि० । 9B. 'नीचोनेति' इत्येवं प्रतीकमात्रम् । 10B. No यदि ।

तदनन्तरं क्लृप्तकलः कलीकृतः, तदनन्तरं ख-खाष्ट-ख-कुभि १०८०० र्भक्तः यल्लभ्यते तद्रूपादि तुङ्गजं बलम्[1] भवेत् । तत्र ग्रहाणामुच्चनीचानि बृहज्जातके ।।—

अज-वृषभ-मृगाङ्गना-कुलीरा झष-वणिजौ च दिवाकरादितुङ्गाः ।

दश-शिखिमनुयुक्-तिथीन्द्रियांशै-१०।३।२८।१५।५

स्त्रिनवक-विंशतिभि २७।२० श्च तेऽस्तनीचाः ।।

अत्रोदाहरणम् । रविः ७।१७।१९।२५रविनीचं ६।१०।० नीचोनो रविः १।७।१९।२५ अयं षड्भादधिको[2] नास्ति अतो यथास्थित एव १।७।१९।२५ अस्य कलाः २२३९।२५ ख-खाष्ट-ख-कुभि १०८००[3] र्भक्ता[4] लब्धम् उच्चबलं रूपादि ०।१२।१६[5] ; अथ चन्द्रः १।१०।२१।३३। चन्द्रनीचं

र	चं	मं	बु	बृ	शु	श
६	७	३	११	९	५	०
१०	३	२८	५	५	२७	२०
०	०	०	०	०	०	०

७।३।०। नीचोनश्चन्द्रः ६।७।२१।३३[6] अयं षड्भादधि[7]कोऽस्ति अतो द्वादशराशिभ्यः प्रच्युतः ५।२२।३८।२७, अस्य कलाः १०३५८।२७ ख-खाष्ट-ख-कुभि १०८०० र्भक्ता[8] लब्धं चन्द्रस्योच्चबलं ०।५७।३३। एवं रव्यादीनामुच्चबलानि । अथोच्चबले सुगमप्रकारो लिख्यते—

[नीचोनितो ग्रहः षड्भाधिकश्चक्राद्विशोधितः ।

तदंशा वह्निभिर्भक्ताः कलाद्यं बलमुच्चजम्[9]] ।।

अथ स्थानबले द्वितीयं सप्तवर्गजबलं शार्दूलविक्रीडितोत्तरार्धेन रथोद्धतया चाह ।। –

पादोनं तु बलं त्रिकोणगृहगे स्वर्क्षे दलं च त्रयो

वस्वंशा ह्यधिमित्रभेऽथ चरणो मित्रे समर्क्षेऽष्टमः ।।२।।

शत्रुभे भवति षोडशांशकश्चाधिशत्रुभवने रदांशकः ।

एवमेव खलु सप्तवर्गजं स्याद् बलं निजपतेर्वशादिह ।।३।।

व्याख्या ।—त्रिकोणगृहगे स्वस्य मूलत्रिकोणगृह[10]स्थिते ग्रहे सति पादोनं रूपं ४५ बलं स्यात् । मूलत्रिकोणानि बृहज्जातके ।—

सिंहो५ वृषः२ प्रथम१ षष्ठ६ हयांग९ तौलि-७

कुंभा११ स्त्रिकोणभवनानि भवन्ति सूर्यात् । इति ।

1A. अतः परम् 'उच्चजं बलम्' इत्यधिकम । 2B. षड्भाधिकः । 3A. अङ्कभागो नास्ति । 4A. क्तं । 5A. '३६' । 6B. अङ्कभागो नास्ति । 7B. षड्भाधि० । 8A. भक्तं । 9. बन्धनीमध्ये B—पुस्तके "नीचोनो गृहः षड्भाधिकश्चक्राच्छोधितः तदंशा वह्निभिर्भक्ता लब्धं कलादि बलमुच्चम्" इति पाठः । 10A. गृहे ।

अथ ग्रहे स्वर्क्षे स्वभवनस्थिते सति दलं रूपार्धं ०।३०।० बलं स्यात् । अथ ग्रहे अधिमित्रभे सति रूपस्य त्रयो[1] वस्वंशा अष्टमांशाः ०।७।३० त्रिगुणा ०।२२।३० बलं स्यात् । मित्रे[2] मित्रभे ग्रहे[3] सति रूपस्य चरणश्चतुर्थांशः ०।१५।० बलं स्यात् । अथ समर्क्षे समस्य भवने अष्टम[:] रूपस्याष्टमांशः ०।७।३० बलं स्यात् । अथ शत्रुभे शत्रुराशौ षोडशांशो ०।३।४५। बलं स्यात् । [4]अधिशत्रुभवने[5] सति रदांशो द्वात्रिंशांशः ०।१।५२।३० बलं स्यात्[6] ॥ एवम् अमुनैव प्रकारेण निजपतेर्वशात् स्वस्वामिवशात् सप्तवर्गजं बलं स्यात् । एतदुक्तं भवति । होरास्वामी स्वश्चेद् रूपार्धं होराबलं भवति । होरास्वामी[7] अधिमित्रभे[8] चेत्[9] त्रयो वस्वंशाः ०।२२।३० होराबलं[10] भवति । एवं मित्रहोरायां चरणः ०।१५।० समहोरायाम् अष्टमांशः ०।७।३० शत्रुहोरायां षोडशांशकः ०।३।४५ अधिशत्रुहोरायां रदांशः ०।१।५२।३० होराबलं भवति । एवं द्रेष्काणादि[11]वशात् द्रेष्काणादिबलं ज्ञेयम् । केचित्तु निजपतेर्वशादित्येतदन्यथा व्याचक्षते तद्यथा । ग्रहो यस्मिन् गृहेऽस्ति तद्गृहेशः स्वमूलत्रिकोणे चेत् चरणत्रयं बलं ज्ञेयम्[12] । गृहेशः स्वर्क्षे चेद्दलम् । गृहेशोऽधिमित्रभावे[13] चेत् तदा त्रयो वस्वंशाः । एवमग्रेऽपि । एवं ग्रहो यस्यां होरायामस्ति तद्धोरेशः स्वमूलत्रिकोणे चेत् चरणत्रयं बलम् । होरेशः स्वगृहे चेद्दलमित्यादि । एवं द्रेष्काणादिष्वपीति[14] ।

उच्च-मूलत्रिकोण-स्वभवनसन्देहे[15] निर्णयमाह कल्याणवर्मा ।—

विंशतिरंशाः सिंहे त्रिकोणमपरे स्वभवनमर्कस्य ।
उच्चं भागत्रितयं वृष इन्दोः स्यात् त्रिकोणमपरेंऽशाः[16] ॥१॥

द्वादश भागा मेषे त्रिकोणमपरे स्वभं तु भौमस्य ।
उच्चबलं कन्यायां बुधस्य तिथ्यंशकैः १५[17] सदा चिन्त्यम् ॥२॥

परतस्त्रिकोण[18]जातं पञ्चभिरंशैः स्वराशिजं परतः ।
दशभिर्भागैर्जीवस्य त्रिकोणफलं स्वभं चापे(?) ॥३॥

शुक्रस्य तु तिथयोंऽशास्त्रिकोणमपरे घटे७ स्वराशिश्च ।
कुम्भे त्रिकोणं निजभं[19] रविजस्य रवेर्यथा सिंहे ॥४॥ इति ।

सप्तवर्गस्तु[20] । गृहं होरा द्रेष्काण-सप्तांशौ नवांशः द्वादशांशः त्रिंशांशश्चेति । तत्र[21] षड्वर्गः प्रसिद्ध एवास्ति । सप्तमांशपतिर्यथा ।—

1B. No त्रयः । 2B. अथ । 3A. No ग्रहे । 4B. अत्र अथ इत्यधिकम् । 5B. ०शत्रुभे । 6B. No स्यात् । 7A. No स्वामी । 8A. मित्रं । 9B. No चेत् । 10A. No होरा । 11B. दृष्कादिपति० । 12A. No ज्ञेयम् । 13B. ०धिमित्रे । 14A. द्रेष्काणेष्वपि । 15A. ०न्देह० । 16B. ०मपरम् । 17A. तु तिथ्यंशाः परतस्त्रिकोणम्, B. तुंगांशकैः । 18A. No परतस्त्रिकोण । 19B. No त्रिकोणं निजभं । 20B. No तु । 21B. अथ ।

गृह[1] भागा मुनिनिघ्नास्त्रिंशद्भक्ता भवन्ति सप्तमांशाः ।
ओजे स्वराशिपूर्वं युग्मे विन्द्यात्तु सप्त[म]भात्[2] ॥ इति ।

अथ सप्तवर्गफलार्थं तावदधिमित्रादयो ज्ञेयाः । ते च । "अन्योन्यस्य धन-व्यय-आय-सहज-व्यापार-बन्धुस्थिता २।१२।११।३।१०।४ स्तत्काले सुहृद" इति प्रोक्ताः । तत्र लग्नाद् रव्यादयः केषु स्थानेषु सन्तीति ज्ञानार्थं यथा लग्नाद् भावाः साधिताः तथा चन्द्रात् सूर्यादयः[3] केषु स्थानेषु सन्तीति ज्ञानार्थं सूर्याद्भावाः साध्याः[4] । एवं चन्द्रादिभ्योऽपि भावाः साध्याः । तत्र रव्यादीनां भावसाधनं यथा । यस्य ग्रहस्य भावाः साध्याः स ग्रहो लग्नं प्रकल्प्यम् । रविरेव रविः । अनन्तरम् "अर्कस्य भोग्यस्तनुभुक्तयुक्तो मध्योदयाद् यः समयो विलग्ना" दित्यादिना इष्टकालः साध्यः । तस्मादिष्टकालात् प्राग्वन्नतं कृत्वा भावाः ससन्धयः साध्याः । अथवाऽन्यथा भावसाधनम् । ग्रह एव रविः कल्प्यः तस्माच्चरमानीय रात्रिदलं कार्यम् । ग्रहं रविं प्रकल्प्य रात्रिदलमिष्टकालं च[5] प्रकल्प्य लंकोदयैर्लग्नं साध्यम्, स चतुर्थभावो भवति । स षड्भाधिको दशमभावो भवति । ग्रहः प्रथमभावो भवति, ग्रहः स षड्भाधिकः सप्तमभावो भवति । एतेभ्यश्चतुर्भ्यः प्राग्वद् भावसन्धिसाधनम् । ततः प्राग्वत् प्रत्येकं[6] भावकुण्डलिकाः[7] कार्याः । ततः स्वकुण्डलिकायां तत्काले च[8] दशायबंधुसहजस्वांत्येषु १०।११।४।३।२।१२ मित्रस्थिता[9] इति अधि[10]मित्रादयो ज्ञेयाः ॥२-३॥

[अथ रव्यादीनां ससन्धयो भावा लिख्यन्ते* । भौमनतं पूर्व २६।९।[11]]

रविनतं १२।४१ पू९ चन्द्रनतं[12] १२।३[13]९प०[14]

१	२	३	४	५	६	७	८	९	१०	११	१२	१	२	३	४	५	६	७	८	९	१०	११	१२
७ १७ १९	८ २० ५४	९ २४ २९	१० २८ ५	११ २४ २९	० २० २४	१ १७ १९	२ २० ५४	३ २४ २९	४ २८ ५	५ २४ २९	६ २० २४	१ १० २१	२ ४ २९	२ २८ ३७	३ २२ ४८	४ २८ ३७	६ ४ २९	७ १० २१	८ ४ २९	८ २८ ३७	९ २२ ४२	१० २८ ३७	० ४ २९
८ ४ ७	९ ७ ४२	१० ११ १७	११ ११ १७	० ७ ४२	१ ४ ७	२ १४ ७	३ ७ ४२	४ ११ १७	५ ११ १७	६ ७ १७	७ ४ ७	१ २२ २५	२ १६ ३३	३ १० ४२	४ १० ४२	५ १६ ३३	६ २२ २५	७ २२ २५	८ १६ ३३	९ १० ४२	१० ११ ४२	११ १६ ३३	० २२ २५

1B. ग्रह । 2B. राशिरपूर्वं युग्मं विन्द्यात्तु सप्तमभवनात् । 3A. सूर्यचन्द्रादयः । 4B. यथा लग्नवद्भावा साधितव्या । 5B. No च । 6B. No प्रत्योकं । 7B. ०ण्डली । 8A. ०कालेन । 9B मित्रं स्थिता ये । 10B No अधि । 11B. बन्धनीस्थः पाठो नास्ति । 12A. अतः परं पूर्वम् इत्यधिकम् । 13A. '४१' । 14A. No '५०' ।

* अत्रेदं द्रष्टव्यम्—एतत्सम्बन्धिनः कोष्ठसप्तकस्य मध्यभागे भावा अधस्तात् सन्धय इति ।

[भौमनतं २६।९ पूर्वम्[1]

१	२	३	४	५	६	७	८	९	१०	११	१२
५	६	७	८	९	१०	१०	०	१	२	३	४
९	९	८	८	८	९	९	९	८	८	८	९
१४	५	५६	४७	+९	५	१४	५	५६	४७	५६	५
५	६	७	८	९	१०	१०	०	१	२	३	४
१४	२४	२३	२३	२४	२४	२४	२४	२३	२३	२४	२४
१०	०	५१	५१	०	१०	१०	०	१०	५२	०	१०

बुधनतं ८।३८ पूर्वं

१	२	३	४	५	६	७	८	९	१०	११	१२
८	९	१०	११	०	१	२	३	४	५	६	७
८	२३	१९	२४	११	१३	८	१३	९	२४	१९	१३
२४	४५	५	१६	१	४६	२४	४५	५	२६	५	४५
८	१०	११	०	१	१	२	४	५	६	७	७
२६	१	६	६	१	२६	२६	१	६	६	१	२६
४	२५	४५	४५	२५	४	४	२५	४५	४५	२५	

गुरुनतं पूर्वं १०।३७

१	२	३	४	५	६	७	८	९	१०	११	१२
७	९	१०	११	०	१	१	३	४	४	६	७
२८	२	७	११	७	२	२८	२	७	११	७	२
५	३५	५	३५	५	३५	५	३५	५	३५	५	३५
८	९	१०	११	०	१	२	३	४	५	६	७
१७	१९	२४	२४	१९	१५	१५	१९	२४	२४	१९	१५
२०	५०	२०	२०	५०	२०	२८	५०	२०	२०	५०	२४

शुक्रनतं पूर्वं २१।२२

१	२	३	४	५	६	७	८	९	१०	११	१२
६	७	८	९	१०	११	०	१	२	३	४	५
३	४	४	५	४	४	३	४	४	५	४	४
३३	११	४८	२६	४८	११	३३	११	४८	२०	४८	११
६	७	८	९	१०	११	०	१	२	३	४	५
१८	२९	२०	२०	१९	१८	१८	२९	२०	२०	१९	१८
५२	३०	७	७	३०	५२	५२	३०	७	७	२०	५१


[शनिनतं ७।४[2]]

१	२	३	४	५	६	७	८	९	१०	११	१२
०	१	१	२	३	२	६	७	७	८	९	११
२	०	२८	२१	२८	०	२	०	२८	२६	२८	०
५६	५२	४७	४२	४७	५२	५६	५२	४७	४२	४७	५२
०	१	२	३	४	५	६	७	८	९	१०	११
१६	१४	१२	१२	१४	१६	१६	१४	१२	१२	१४	१६
५४	४६	४५	४५	४९	५४	५४	४९	४५	४५	४९	५४


1A. अतः परं 'प्रत्यङ्नतं ११।२६' इत्यधिकः पाठः।

2A. बन्धनीमध्ये 'शनि' इति पाठः।


रविभावकुण्डला




चन्द्रभा०




कुजभा०




बुधभा०




गुरुभा०



शुक्रभा०



शनिभा०



सप्तवर्गजबलानि ।

ग्र	र	चं	मं	वु	वृ	शु	श
गृह	० २२ ३०	० ३ ४५	० ७ ३०	० ३ ४५	० २२ ३०	० ४५ ०	० १ ३०
हीरा	० ३० ०	० ३० ०	० ७ ३०	० २२ ३०	० ७ ३०	० ७ ३०	० २ ३८
द्रेक्का	० ७ ३०	० ७ ३०	० ७ ३०	० ३ ४५	० ७ ३०	० ३० ०	० १ ३०
सप्तां०	० १५ ०	० १५ ०	० १५ ०	० १५ ०	० २२ ३०	० ३० ०	० १ ३०
नवां०	० ७ ३०	० ७ ३०	० २२ ३०	० ३० ०	० ७ ०	० १५ ०	० ५ ३०
द्वाद०	० ७ ३०	० ७ ३०	० २२ ३०	० ३ ४५	० ७ ३०	० १५ ०	० ७ २०
त्रिं०	० ७ ३०	० ७ ३०	० ७ ५	० १५ ०	० ४ ३०	० १५ ०	० १ ३०
ऐक्य	५ ३७ ३०	१ १५ ००	१ ३० ०	१ ३३ ४५	२ ० ०	२ ३७ ३०	० १८ ४५

अथ ग्रहाणां सप्तवर्गजचक्रम् ।

ग्र	र	चं	मं	बु	बृ	शु	श
गृ	६ मं	२शु	६बु	९बृ	८मं	७शु	१मं
हो	५ र	४चं	४ चं	५र	५र	५र	५र
द्रे	१२ बृ	६बु	६बु	बृ९	४चं	७शु	१मं
स	६बु	१०श	२शु	१०श	८मं	७शु	१मं
न	९ बृ	१मं	१२बृ	३बु	१बृ	८मं	१मं
द्वा	२ शु	६बु	९बृ	१२बृ	७शु	८मं	२शु
त्रि	१८बृ	११बु	५बु	८मं	२मं	८मं	१मं

तत्कालमैत्रीचक्रम् ।

ग्र	र	चं	मं	बु	बृ	शु	श
अधिमित्र	मं	०	र बृ	र शु	मं	बु	०
मित्र	बृ	श	शु	श मं	०	मं बृ	०
सम	चं बु शु	र बु	चं बु	०	र चं शु	र श	चं बु शु
शत्रु	०	मं बृ शु	श	बृ	श	०	बृ
अधिशत्रु	श	०	०	चं	बु	चं	मं र
मूलत्रि०	०	०	०	०	०	शु	०
नीचं *	०	०	०	०	०	०	श

निसर्ग-मैत्रीचक्रम् ।

ग्र	र	चं	मं	बु	बृ	शु	श
अधिमित्र	०	०	०	०	०	०	र
मित्र	चं मं बृ	र बु	र चं बृ	र शु	र चं मं	बु श	बु शु
सम	बृ	मं बृ शु श	शु श	मं बृ श	श	मं	बृ
शत्रु	शु श	०	बु	चं	बु शु	बृ	र चं मं
अधिशत्रु	०	०	०	०	०	र चं	०

* 'मूलत्रि' 'नीचं'–नामाङ्कितं गृहद्वयं A-पुस्तके नास्ति ।

अथ तृतीयं स्थानबलमाह स्वागतया ।।—

युग्मभांशकगतौ शशिशुक्रौ यच्छतो हि बलपादमयुग्मे ।
भांशके रवि-कुजेज्य-शनि-ज्ञास्तावदेव वितरन्ति हि सत्वम् ।।४।।

व्याख्या ।—युग्मभांशकगतौ शशिशुक्रौ बलपादं रूपचतुर्थांशं बलं[1] यच्छतः ददतः(?), चन्द्रः शुक्रो वा[2] यदि समराशौ समांशे वा भवति तदा[3] तयोः रूपचतुर्थांशो[4] बलं भवति । यदा तु[5] तयोः राशिर्नवांशश्चेति द्वयमपि समं भवति[6] तदा चरणद्वयबलमर्थतः सिद्धम् । प्रतिनिमित्तं नैमित्तिकस्य युक्तत्वात् । यत्तु वर्गोत्तमस्वराशिस्वनवांश[7]स्वद्रेष्काणरूप-निमित्तभेदे सत्यपि सकृद्द्विगुणमिति वराहमिहिराचार्यैरुक्तम्[8] तत् आयुषि अयोग्यतारूपबाधात् ।। इह तु[9] बाधकाभावाद्राशौ नवांशे च समे सति चरणद्वयमेव । एवं रवि-कुजेज्य-शनि-ज्ञाः अयुग्मे भांशके विषमराशौ विषमांशे वा तावदेव चरणमेव सत्त्वं बलं वितरंति ददति । अत्रापि निमित्तद्वये चरणद्वयम् ।। अस्योदाहरणम् ।।४।।

[भांशबलम्]

र	चं	मं	बु	बृ	शु	श
०	०	०	०	०	०	०
१५	१५	०	३०	०	१५	३०
०	०	०	०	०	०	०

अथ चतुर्थ-पञ्चमस्थानबलं[10] स्वागतयाह ।।

कण्टकाद्युपगतेषु नियोज्या रूपकार्धचरणा [निजवीर्य ।
भांतमध्यमुखगेषु च पादः स्त्रीनपुंस[11]]कनरेषु निधेयाः[12] ।।५।।

व्याख्या ।— ग्रहेषु कण्टकाद्युपगतेषु केन्द्र-पणफरापोक्लिमगतेषु सत्सु निजवीर्ये रूपकार्धचरणाः क्रमेण नियोज्याः क्षेप्याः ।। एतदुक्तं[13] भवति । यो ग्रहः केन्द्रे १।४।७।१० भवति तस्य रूपं बलं भवति । यो ग्रहः पणफरे २।५[14]।८।११ अस्ति तस्य[15] रूपार्धं ०।३०।०[16] बलम् । यो ग्रहः आपोक्लिमे ३।६।९।१२ अस्ति तस्य[17] चरणं च[18] कण्टकादि-बलम् ।। अथ पञ्चमस्थानबलमाह । भांतेति । स्त्रीनपुंसकनरेषु क्रमेण भांत-मध्य-मुखगेषु सत्सु निजवीर्ये पादो निधेयः क्षेप्यः । अयमर्थः ।। स्त्रीग्रहौ चन्द्र-शुक्रौ तदीय[19] द्रेष्काणे यदि भवतः तर्हि तयोर्बलं[20] रूपचतुर्थांशो ०।१५।० भवति । एवं नपुँसकग्रहौ बुधशनैश्चरौ द्वितीयद्रेष्काणे यदि भवतस्तर्हि[21] तयोरपि तावदेव ०।१५।० बलम् । एवं[22] नरग्रहाः रवि-

---

1B. No बलं । 2B. चन्द्रशुक्रौ [No वा] । 3B. No तदा । 4B. ०र्थांशं । 5B. यदि [No तु] । 6B. सम्भवतः । 7B. युक्त(?) वर्गोत्तमस्वराशिनवांश । 8B. ०रेणोक्तं । 9B. No तु । 10B. चतुर्थं कण्टकादिबलं । 11B. बन्धनीस्थः पाठो नास्ति । 12B. विधेयः । 13B. तदुक्तं । 14A. 25 । 15B. स्थितस्य । 16A. अङ्कभागो नास्ति 17B. स्थितस्य 18B. इति । अतः परं "०।१५।० इवं चतुर्थस्थानबलम् । उदाहरणं च" इत्यधिकम् । 19B. तृतीय । 20B. ०रपि तावदेव बलं । 21B. No तर्हि । 22B. No एवं ।

भौम-गुरवः प्रथम[1]द्रेष्काणे चेद् भवन्ति तर्हि तेषां यथास्वचरणं[2] ०।१५।० बलं भवतीति[3]। ग्रहाणां स्त्रीपुरुष[4]नपुंसकविभाग उक्तो बृहज्जातके। "बुधसूर्यसुतौ[5] नपुंसकाख्यौ शशिशुक्रौ युवती नराश्च शेषाः" इति ॥ अस्योदाहरणम्।

कण्टकादिबलं

र	चं	मं	बु	बृ	शु	श
१	०	०	१	१	०	०
०	१५	३०	०	०	३०	३०
०	०	०	०	०	०	०

अथ शीघ्रोपस्थित्यर्थं पञ्चापि स्थानबलानि तदैक्यं[च] लिख्यते। एतावत्पर्यन्तं[6] तत्स्थानबलमिति ॥५॥

[भान्तमध्यबलम्]

र	चं	मं	बु	बृ	शु	श
०	०	०	०	०	०	०
०	०	१५	०	०	०	०
०	०	०	०	०	०	०

	र	चं	मं	बु	बृ	शु	श
उ ब	०	०	०	०	०	०	०
	१२	५७	१३	३९	१२	२	५
	२६	३३	४५	१२	१८	११	४१
स ब	०	०	१	१	२	२	०
	३७	१५	३०	३३	१७	३७	१८
	३०	०	०	४५	०	३०	४५
भांश ब[7]	०	०	०	०	०	०	०
	१५	१५	०	३०	०	१५	३०
	०	०	०	०	०	०	०
कें ब	१	०	०	१	१	०	०
	०	१५	३०	०	०	३०	३०
	०	०	०	०	०	०	०
भान्त मध्य ब	०	०	०	०	०	०	०
	०	०	१५	०	०	०	०
	०	०	०	०	०	०	०
ऐक्यं[8]	३	२	२	३	३	३	१
	४	४२	२८	३५	२९	२४	२४
	५६	३३	४५	५७	१८	४१	२६

दिग्बलस्वरूपं स्वागतयाह ॥—

स्थानवीर्यमिदमेवमिहोक्तं
दिग्बलं शृणुत पूर्वदिशोऽतः।
विद्गुरू रवि-कुजौ रविसूनुः
शुक्र-शीतकिरणौ बलिनौ स्तः ॥६॥

व्याख्या।—इह बलाध्याये एवं पूर्वोक्तप्रकारेण इदं स्थानवीर्यमुक्तम्। अतः परं दिग्बलं शृणुत। तदेवाह।—विद्गुरू रविकुजौ रविसूनुः शुक्र-शीतकिरणौ पूर्वदिशः आरभ्य[9] क्रमेण बलिनौ स्तः ॥ विद्गुरू बुधबृहस्पती प्राच्यां बलिनौ लग्नगतौ बलिनावित्यर्थः। [रवि-कुजौ दक्षिणस्यां बलिनौ दशमे बलिनावित्यर्थः[10]]। रविसूनुः शनिः पश्चिमायां बली सप्तमे दिग्बलवानि[11]त्यर्थः। शुक्र-शीतकिरणौ शुक्र-चन्द्रौ उत्तरस्यां बलिनौ चतुर्थे बलिनावित्यर्थः ॥६॥

1B. प्रथमे। 2B. ०णो। 3B. No इति। 4B. No पुरुष। 5A. सितौ। 6B. अतः परं यदुक्तमित्यधिकम्। 7A. युग्म। 8A. योगः। 9A. प्रारभ्य। 10B. बन्धनीस्थभागो नास्ति। 11B. ०लिनीत्यर्थः।

अथ[1] दिग्बलस्य त्रैराशिकगणितेन आनयनम् इन्द्रवज्रोपजातिकाभ्यामाह ।।—

अर्कात् कुजाच्चाम्बुगृहं विशोध्य[2] जीवाद् बुधाच्चापि कलत्रभावम् ।
मेषूरणं भार्गव-चन्द्रमोभ्यां प्राग्लग्नमुष्णांशुसुताच्च शेषम् ।।७।।

षड्भाधिकं चेद् भगणाद्विशोध्य[3] कलीकृतं खाभ्रगजाभ्रभूभिः १०८००[4] ।
भजेदवाप्तं च ककुब्बलं स्यादतः परं कालबलं प्रवच्मि ।।८।।

व्याख्या ।—अर्कात् कुजात् च[5] अम्बुगृहं चतुर्थभावं विशोध्य[6] । कलत्रभावं सप्तमभावं जीवात्[7] बुधाच्च विशोध्य[8] । [मेषूरणं दशमभावं भार्गव-चन्द्रमोभ्यां विशोध्य प्राग्लग्नं तनुभावम् उष्णांशुसुतात् शनैश्चराद् विशोध्य[9]] यत् शेषं तच्चेत्[10] षड्भाधिकं तदा[11] भगणात् १२[12] विशोध्य कलीकृतं यदि तु राशिषट्कादूनं[13] शेषं तर्हि यथास्थितमेव कलीकृतं खाभ्रगजाभ्रभूभिः १०८०० भजेत्, यत् अवाप्तं लब्धं [तद्रूपादि ककुब्बलं दिग्बलं[14]] स्यात् । इदं दिग्बलम् एकप्रकारमेव । अस्योदाहरणं लिख्यते ।

भावं यथोक्तं संशोध्य चेच्छेषं रसभाधिकम् ।
चक्राद्विशोध्य तस्यांशास्त्रिभक्ता[15] दिग्बलं कलाः ।।१।।
इति सुगमोपायः ।।

र	च	म	बु	बृ	शु	श
०	०	०	०	०	०	०
३०	२७	७	०	२	४४	२०
४	४५	२३	९	२७	३१	४४

अथ कालबलानयनं प्रति[जानीते । अतः परं[16]] कालबलं प्रवच्मीति ।। इदं[17] बलं चतुर्धा । दिनरात्रिबलम् १ । पक्षबलं २ । त्रिभागबलम्[18] ३ । स्ववर्षमासदिनहोराबलम् ४ । इति ।।७-८।।

तत्र प्रथममिन्द्रवज्रा-वंशस्थवृत्ताभ्यामाह ।।

नक्तंबला भौम-शशाङ्क-मन्दा गुर्वर्क-शुक्रा दिनशक्तयः स्युः ।
सदेन्दुपुत्रो दिनशक्तिभाजां ग्राह्यो बुधैरुन्नतसंज्ञकालः ।।९।।
नतस्तमीवीर्यवतां[19] पलीकृतः ख-खाष्टचन्द्रै १८०० र्विहृतो बलं भवेत् ।
बुधस्य रात्रौ च दिवा च रूपकं[20] विधेयमेतत् समयोद्भवं बलम् ।।१०।।

व्याख्या ।—भौम-शशाङ्क-मन्दास्त्रयोऽपि[21] नक्तंबला रात्रिबलाः स्युः । गुर्वर्क-शुक्रा दिनशक्तयः स्युः[22] । इन्दुपुत्रो बुधः सदा दिने रात्रौ बलवानित्यर्थः । अत्र रात्रिबलानां

1B. अतः परम् अस्य इत्यधिकम् । 2B. गृहाद्विशोध्यं । 3B. ०शोध्यं । 4B. अङ्कभागो नास्ति । 5A. No 'च' । 6B. ०ध्यं च । 7A जीव । 8B. ०शोध्यं । 9B. बन्धनीस्थभागो नास्ति । 10B. No चेत् । 11B. No तदा । 12B. No '१२' । 13B. ०न्यूनं । 14B. बन्धनीमध्ये तद्रूपादिकं दिग्बलम् इति पाठः । 15B. ०स्त्रिंशद्भक्ता । 16B. बन्धनीस्थः पाठो नास्ति । 17B. काल । 18B. दिनरात्रिभागबलं । 19A. बला (?) । 20B. रूपयुक् । 21B. No अपि । 22A. No स्युः ।

ग्रहाणां मध्यरात्रे[1] पूर्णं बलम्, मध्याह्ने बलाभावश्च[2] । एवं दिन[3]बलानां ग्रहाणां[4] मध्याह्ने रूपं बलं मध्यरात्रे बलाभावश्च । अवान्तरे[5] त्रैराशिकेन बलमाह । दिन-शक्तिभाजामित्यादिना । बुधैः पण्डितैः दिनशक्तिभाजां दिनबलानां ग्रहाणां बलानयने उन्नतसंज्ञकः[6] कालो ग्राह्यः । तमीवीर्यवतां रात्रिबलानां ग्रहाणां बलानयने नतः[7] नत[8]कालो ग्राह्यः । ततो नतकाल उन्नतकालो वा पलीकृतः खखाष्टचन्द्रै १८०० विहृतो[9] यल्लभ्यते तद् बलं भवति । एतदुक्तं भवति[10] नतस्य पलानि[11] कार्याणि[12] अष्टादशशतै-र्भाज्यानि यल्लभ्यते तच्चन्द्र-भौम-शनैश्चराणां बलं भवति । एवमुन्नतस्यापि पलानि कार्याणि तानि खखाष्टचन्द्रै[13]र्भाज्यानि यल्लभ्यते रूपादि तत् सूर्य-गुरु-शुक्राणां बलं भवति । अथ बुधस्य बलमाह ।—बुधस्येति । बुधस्य एतत् समयोद्भवं बलम् इदं प्रथमं कालबलं रात्रौ च दिवा च रूपकं विधेयम्, बुधस्य सदाबलत्वेन क्षयवृद्ध्यो[र[14]]भावात्र तत्रानुपातः किन्तु रूपमेव बलमित्यर्थः । अस्योदाहरणं लिख्यते । नत[15]घटी १५ पलं ३६, उन्नतघटी १४ पलं[16] २४ । अथात्र सुगमप्रकारो लिख्यते ।—

शशाङ्कभौमसमन्दानां नतं द्विघ्नं बले कलाः ।
षष्टि ६०[17] शुद्धं तदन्येषां सदा[18] रूपं बुधस्य[19] तु ॥ ९-१०॥

र	च	म	बु	बृ	शु	श
०	०	०	१	०	०	०
२८	३१	३१	०	२८	२८	३१
४८	१२	१२	०	४८	४८	१२

अथ द्वितीयं[20] कालबलं पक्षबलम्[21] इन्द्रवज्रोपजातिकाभ्यामाह[22] ।

व्यर्कः शशी षड्भवनाधिकश्चेच् चक्राद् विशुद्धोऽथ कलीकृतोऽसौ ।
चक्रार्धलिप्ताविहृतो बलक्ष-पक्षे बलं स्यादथ कृष्णपक्षे ॥११॥

तदेव रूपाच्च्युतमेव कृत्वा जगुर्बुधाः पक्षबलं ग्रहाणाम् ।
बलक्ष-पक्षे शुभखेचराणां पापग्रहाणामसिते च पक्षे ॥१२॥

व्याख्या ।—व्यर्कः शशी चन्द्रमध्ये रविः शोध्य इत्यर्थः । असौ चेत् षड्भवनाधिकः तदा चक्राद् १२ विशुद्धः अन्यथा यथास्थित एव । पश्चात् कलीकृतः, तदनन्तरं चक्रार्धलिप्ता-१०८०० विहृतः यल्लभ्यते रूपादि तत् शुक्लपक्षे बलं स्यात् । [तदेव बलं रूपाच्च्युतं कृत्वा कृष्णपक्षे बलं स्यात् बुधा[23]] एवं ग्रहाणां पक्ष[24]बलं जगुः । इदं पक्षबलं[25] द्वयमस्ति

1B. मध्ये । 2B. No 'च' । 3B. No दिन । 4B. No ग्रहाणां । 5B. अथवान्तरे । 6B. उन्नतसंज्ञ । 7B. No नतः । 8B. नतस्तत् । 9B. विहृते । 10B. No 'एतदुक्तं भवति' । 11B. अतः परं ग्राह्याणि इत्यधिकम् । 12B. अतः परम् अष्टादशकाले इत्यधिकः पाठः । 13B. अतः परम् १८०० इत्यधिकम् । 14B. ०वृद्ध्योन । 15B. नतं । 16B. No पलं । 17A. No '६०' । 18B. अतः परं 'तु' इत्यधिकम् । 19B. बलस्य । 20B. द्वितीय । 21B. No बलम् । 22B. ०कयाह । 23B. बन्धनीमध्यस्थभागो नास्ति । 24A. No पक्ष । 25B. No बलं ।

ग्रहास्तु सप्त एवं सति कस्य किं बलमित्यत[1] आह । बलक्षपक्ष इति । यत् शुक्ल-पक्षे बलमागतमस्ति तत् शुभखेचराणां चन्द्र-बुध-गुरु-शुक्राणां ज्ञेयम् । यत् असिते-कृष्ण[2]पक्षे पक्ष[3]बलमागतमस्ति तत् पापग्रहाणां रवि-भौम-शनैश्चराणां बलं स्यात् ।

[अत्र केचित् क्षीणचन्द्रं पापयुतं बुधं च पापग्रहमिच्छन्ति । तदसत् । यतः एवं सति अमान्ते चन्द्रस्य रूपं पक्षबलं स्यात्[4]] "द्विघ्नं भानोरयनजबलं[5] पक्षवीर्यं तथेन्दोरि"ति वक्ष्यमाणचेष्टाबलमपि चन्द्रस्य पक्षबलतुल्यं[6] रूपमेव स्यात् । नैतद्[7]युक्तं चेष्टा-बलम् । यतो ग्रहचेष्टया दृश्यमानं बलं चेष्टाबलं तस्य च अमांतेऽवलम्भात्[8] । तस्मादत्र नैसर्गिकाः[9] पापा रविभौममन्दा एव[10] ज्ञेयाः । अस्योदाहरणम् । रविः ७।१७। १९।२५। चन्द्रः १।१०।२१।३३ व्यर्कः शशी ५।२३।२।८। अयं षड्भादूनोऽस्ति अतोऽस्य केवलस्य कलाः १०३८।२।८। चक्रार्धलिप्ताभिः १०८०० विहृता लब्धं रूपादि ०।५७।४१। इदं शुक्लपक्ष[11]बलम् एतदेव रूपाच्चयुतं जातं कृष्णपक्षबलं।०।२।१९[12] ; अत्र[13] सुगमोपायः ।

व्यर्कश्चन्द्रोऽधिकः षड्भाच्चक्राच्छुद्धोऽथ तल्लवाः ।
त्रिभक्ता बललिप्ताः स्युः[14] शुक्ले कृष्णे भुवश्च्युतः[15] ॥

श्रीकेशवज्योतिर्विदस्तु ॥ "शुक्लेऽन्त्ये तिथिहृद्गतैष्यतिथयो वीर्यं सतां भूच्युतं पापानामि"ति । अस्यार्थस्तु । शुक्लपक्षे गततिथयः सावयवा [ग्राह्याः कृष्णे तु गम्यतिथयः सावयवाः[16]] ताः पञ्चदशभिर्भक्ताः[17] य[18]ल्लब्धं रूपादि शुभग्रहाणां पक्षबलम् । तदेव रूपाच्च्युतम् अशुभग्रहाणां पक्षबल[19]मिति ॥११-१२॥

०	र	च	म	बु	बृ	शु	श
०	०	०	०	०	०	०	०
०	२	५७	२	५७	५७	५७	२
०	१९	४१	१९	४१	४१	४१	१९

*

[अथ तृतीयं कालबलं त्रिभागबलम्[20]]

उपजातिकयाह ।—

अह्नस्त्रिभागेषु बलं सरूपं बुधार्क-तिग्मांशुभुवां क्रमेण ।
कार्यं तुषारांशु.सितासृजां च रात्रः सदैवामरपूजितस्य ॥१३॥

व्याख्या ।—अह्न[21]स्त्रिभागेषु क्रमेण बुधार्कतिग्मांशुभुवां बलं सरूपं[22] कार्यम् । दिनस्य भागत्रये कृते प्रथमे त्र्यंशे बुधस्य, द्वितीये त्र्यंशे अर्कस्य, तृतीये त्र्यंशे तिग्मांशु-

1B. ०त्यत्र । 2B. No कृष्ण । 3A. No पक्ष । 4B. बन्धनीस्थभागो नास्ति । 5B. ०जं फलं । 6B. No तुल्यं । 7B. न चैतद् । 8B. 'वामावास्यान्तेऽनुपातं भात्' इति पाठः । अत्र 'अनुपलम्भादिति भवेत् 9B. तुल्यनैसर्गिक । 10B. ०न्दाश्च पापा । 11B. ०पक्षे । 12A. अतः परं 'अथ यथा स्वपक्षबलानि' इत्यधिकः पाठः । 13B. अथ । 14B. No स्युः। । 15B. ०श्च्युति । 16B. बन्धनीस्थः पाठो नास्ति । 17B. ०भिर्भाज्या । 18B. No यत् । 19B. No पक्षबलं । 20B. बन्धनीमध्ये अथ तृतीयबलम् इति पाठः । 21B. अथाह्न० । 22A. अतः परं ग्राह्यम् इत्यधिकम् ।

* अयं कोष्ठः A-पुस्तके नास्ति ।

भवः शनैः बलं सरूपं कार्यम् । एवं रात्रेस्त्रिभागेषु क्रमेण तुषारांशुसितासृजां चन्द्र-शुक्रभौमानां बलं सरूपं कार्यम् । अमरपूजितस्य गुरोर्बलं सदा सरूपं कार्यम् । अत्र रात्रेः प्रथमत्रि[1]भागेऽस्ति अतश्चन्द्रबलं सरूपं कार्यम् । सदैवामरपूजितस्येति वचनाद् गुरोर्बलमपि सरूपं कार्यम् । एवं जातं त्रिभागबलं लिख्यते ॥१३॥

अथ चतुर्थं कालबलं वर्षादिबलमुपजातिकयाह ।—

पादं स्ववर्षेऽथ दलं स्वमासे
दिने स्वकीये चरणोनरूपम् ।
रूपं स्वहोरास्विति कालवीर्यम्
उक्तं हि होरानिपुणैः पुराणैः ॥१४॥

र	चं	म	बु	बृ	शु	श
०	१	०	१	१	०	०
०	०	०	०	०	०	०
०	०	०	०	०	०	०

*

व्याख्या ।—ग्रहः स्ववर्षे पादं बलं करोति, [यो ग्रहो वर्षाधिपतिस्तस्य चरणं[2]] बलं भवतीत्यर्थः । एवं स्वमासे दलं बलं करोति । [यो मासाधिपतिस्तस्य रूपार्धं बलं भवतीत्यर्थः । स्वकीये दिने वारे चरणोनरूपं त्रयश्चरणा बलं भवतीत्यर्थः । स्वहोरासु रूपं बलं करोति[3]] जन्मसमये यस्य ग्रहस्य कालहोरास्ति तस्य रूपं बलं भवतीत्यर्थः । अत्र वाराधिपतिस्त्वति[4]प्रसिद्धः । होरापतिरुक्तो रत्नमालायां श्रीपतिभट्टैः ।

वारप्रवृत्तेर्घटिका द्विनिघ्नाः कालाख्यहोरापतयः शराप्ताः ।
दिनाधिपाद्या रवि-शुक्र-सौम्य-शशाङ्क-सौरेज्यकुजाः क्रमेण ।

इति । केचिद्बलनिमित्तं सूर्योदयमारभ्य होरा भवति न तु वारप्रवृत्तेरितीच्छन्ति । तन्न । प्रमाणाभावात् । वर्षाद्यधिपतीनां साधारणत्वाच्च ।

अथ वर्षेश-मासेशयोर्विचारः । स[5] यथा सूर्यसिद्धान्ते ।—

मासाब्ददिनसंख्याप्तं द्वित्रिघ्नं रूपसंयुतम् ।
सप्तोद्धृतावशेषे तु विज्ञेयौ मास-वर्षपौ ॥

अथ सूर्यसिद्धान्ते सृष्ट्यहर्गणः ७१४४०३९९७८६९ । अस्मिन् [मासदिनसंख्यया ३० भक्ते लब्धं २३८[6]]३४६६५९५ । इदं द्विघ्नं ४७६[7]२९३३१९० रूपसंयुतं ४७६२[8]६९ ३३१९१ । अस्मिन् सप्ततष्टे[9] शेषं ५[10] जातो गुरुर्मासेशः । अथ सृष्ट्यहर्गणः ७१४४०३९९७८६९ अब्ददिन ३६० संख्यया भक्तः आप्तं १९८४४५५५४९ इदं त्रिघ्नं ५९५३३६६६४७ रूपसंयुतं ५९५३३६६६४८ अस्मिन् सप्ततष्टे शेषं ५ जातो गुरुरेव वर्षेशः । अथ यदि[11] ब्रह्मसिद्धान्तोक्तकल्पाहर्गणादयं विधिः क्रियते तदा मासेशः शनिः वर्षेशः चन्द्रः । तद्यथा । कल्पाहर्गणः ७२०६३६१४

1B. No त्रि । 2B. बन्धनीमध्ये 'यः वर्षाधिपतिस्तस्य चरणतुल्यम्' इति पाठः । 3B. बन्धनीमध्ये 'स्वदिने पादोनरूपं पञ्चचत्वारिंशत् कला इत्यर्थः ।' इति पाठः । 4B. No अति । 5B. तौ । 6A. बन्धनीमध्ये मास-दिन-संख्याप्तं इति पाठः । 7B. ० । 8B. ० । 9B. ०प्तोद्धृते । 10A. No 5 । 11B. No यदि ।

* अयं कोष्ठः A-पुस्तके नास्ति ।

३९५६ मासदिन ३० संख्यया भक्तः आप्तं २४०२१२०४७९८[1] इदं द्विघ्नं ४८०४२४० ९५९७ रूपसंयुतं[2] ४८०४२४०९९९६[3] सप्ततष्टे[4] शेषं०, जातः शनिर्मासेशः । अथ कल्पाहर्गणः ७२०६७६१४३९५६ अब्ददिनसंख्यया[5] भक्तः आप्तं २००१७६७०६६, इदं त्रिघ्नं ६०० ५३० ११९८ रूपसंयुतं[6] ६००५३०११९९ सप्त ७[7] तष्टे शेषं २ जातश्चन्द्रो वर्षेशः[8] । अयमेवोक्तः श्रीकेशवदैवज्ञैः परमगुरुचरणै सुगमोपायेन ।

द्विष्ठो[9] द्युपिंडो रदभू १३२ युतोऽर्क १२ युक्
खांगाग्निभि : ३६० खाग्नि ३० हृतः फले युते ।

वेदै ४[10] गुणै ३[11] स्त्रिद्वि[12]हृतेऽद्रि७[13]शेषितोर्काद् ब्रह्मतुल्ये क्रमशोऽब्दमासपौ । इति ।

यथा ब्रह्मतुल्येऽहर्गणः १३६५०४। क्रमेण रदभूभिः १३२ अर्कै १२[14]श्च युतः १३६६३६।१३६५१६ प्रथमः खांगाग्निभिः ३६०[15] हृतो लब्धं ३७९, द्वितीयः[16] खाग्निहृतो लब्धं ४५५०; क्रमेण वेदै४र्गुणै ३ र्युते ३८३/ ४५५३। प्रथमं त्रिगुणं ११४९। द्वितीयं द्विगुणं ९१०६, उभयत्र सप्तभक्ते शेषं १।६ अर्कात् एको वर्षेशो गतः वर्तमानो द्वितीयश्चन्द्रो वर्षेशः । एवमर्कात् षड् मासेशा गताः, वर्तमानः सप्तमो मासेशः शनिः । अथ सूर्यसिद्धान्तोक्तमासवर्षेशयो[17]रानयनं सुगमोपायेन यथा[18] ।--

द्युपिण्डो ब्रह्मतुल्योत्थस्तिथियुक् खाग्निभिर्हृतः ।
फलं निरेकं द्विगुणं सप्ततष्टेऽत्र मासपः ॥१॥

गणः शरनृपैर्युक्तः १६५ खाग्निभि ३० र्विहृतः फलम् ।
त्रिघ्नं द्वियुक् सप्ततष्टं वर्तमानोऽब्दपो रवेः ॥२॥

एवं मतभेदेन वर्षेशमासेशयो[19]र्भेदोऽस्ति । आगमयोर्विरोधे तु गुर्वनुसृतमार्गानुसरणमेव[20] युक्तमिति ब्रह्मसिद्धान्तोक्तकल्पाहर्गणादेव मासेशवर्षपौ[21] लिख्येते । वर्षेशश्चन्द्रः[22] मासेशः शनिः. दिनेशचन्द्रः । अथ होरेशः । पश्चिमतो रेखा[23]योजनानि । ३० एतानि त्रिगुणानि ९० चतुर्भक्तानि जातानि देशान्तरपलानि ।२२।[24] धन[25]चरपलानि १३८[26] । अनयोर्योगे १६० 'सूर्योदयादूर्ध्वमृणे धनेऽधः' इत्युक्तत्वात् सूर्योदयात् पूर्वं २।४०। वारप्रवृत्तिः । अथेष्टकालः २८।१८ वारप्रवृत्तेर्धनघटीभिः[27] २।४० युतः ३०।५८। अथैता वारप्रवृत्तेः सकाशात् घटिका ३०।५८ द्विघ्नाः ६१।५६ शरा५[28]प्ताः गताः[29] काल-

---

1B. २४०११०४७९८ इति पाठः । 2B. रूपयुतं। 3B. ४८०४२४०९५९७। 4B. भक्ते। 5B. अतः परं '३६०' इत्यधिकम् । 6B. रूपयुतम्। 7B. No ७ । 8B. जातो वर्षेशश्चन्द्रः। 9B. द्विस्थो। 10B. No ४। 11B. No ३। 12A. ३६०। द्वित्रि। 13A. No ७। 14B. No १२। 15B. No 16B. ०तीय०। 17B. वर्षयो०। 18B. No यथा। 19A. ०मासपयो०। 20B. गुर्वनुसृतमार्गानुसारेण एवं। 21B. वर्षेशमासेशौ। 22B. No वर्षेशश्चन्द्रः। 23B रेखाया। 24B. अतः परं चतुर्थांशेन वर्जितैरित्यर्थः इत्यधिकम्। 25B. धनं। 26A. अतः परं धनम् इत्यधिकम्। 27B. ०प्रवृत्तीर्घटिकाभिः। 28A. No ५। 29B. गत०।

होराः १२ वर्तमानाः[1] शुक्रहोरा १३[2] होरेशः शुक्रः । वर्षादिबलानि । चन्द्रस्य वर्षबलं ०।१५ दिनबलं च[3] ०।४५ योगे रूपम्[4] । अथ कृतानां कालबलानां योगार्थं तान्येकत्र लिख्यन्ते । कालवीर्यं समाप्तमित्याह[5] इति कालवीर्यम् उक्तं हि होरानिपुणैः पुराणैरिति[6] ।।१४।।

र	च	म	बु	बृ	शु	श
०	१	०	०	०	१	०
०	०	०	०	०	०	३०
०	०	०	०	०	०	०

चतुर्धा कालबलस्यैक्यं

र	च	मं	बु	बृ	शु	श	
०	०	०	१	०	०	०	दिन
२८	३१	३१	०	२८	२८	३१	रात्रि
४८	१२	१२	०	४८	४८	१२	बल
०	०	०	०	०	०	०	पक्ष
२	५७	२	५७	५७	५७	२	बल
१९	४१	४१	४१	४१	४१	१९	
०	१	०	०	१	०	०	त्रि
०	०	०	०	०	०	०	भाग
०	०	०	०	०	०	०	
०	१	०	०	०	१	०	वर्षा
०	०	०	०	०	०	३०	दि
०	०	०	०	०	०	०	
०	३	०	२	२	२	१	
३१	२८	३३	५७	२६	२६	३	योग
७	५३	३१	४१	२९	२९	३१	

अथ यद्यपि क्रमप्राप्तं नैसर्गिकं बलं वक्तुमुचितं तथापि तस्य स्थिरत्वात् सुगमत्वाच्च चेष्टाबलं प्रथमं वक्तुमिच्छति[7] । तच्च द्विविधम् । आयनबलं चेष्टा केन्द्रोत्थं च । तत्राद्यं सार्धं[8]मन्दाक्रान्तयाह ।—

क्रान्तिः सौम्या स्वमिह [परमापक्रमे दक्षिणर्णं
शुक्रादित्यक्षितिसुतमरुत्पूजितानां विधेया ।
व्यस्ता शीतद्युतिरविजयोर्ज्ञस्य नित्यं विधेया
रामाभ्यस्तां तदनु[9]]परमापक्रमेणोद्धरेत् ताम् ।।१५।।
ग्राह्यं राशिप्रभृति च फलं लिप्तिकी[10]भूतमेतद्
व्योमाकाश-द्विरद-ख-कुभिर्भाजयेदायनं स्यात् ।

व्याख्या ।—इहायन[11]बलार्थं प्रथमतो ग्रहाणां क्रान्तयः कर्तव्याः, तत्करणप्रकारश्च ब्रह्मतुल्ये ।

स्युः क्रान्तिखण्डानि यमांगरामाः ३६२
ववऽब्ध्यग्रयो ३४१[12] गो-नव-वाहव २९९[13] श्च ।
षट्त्र्यश्विनः २३६ खेषुभुवो १५० द्विबाणा ५२
युक्तायनांश[14] ग्रहबाहुभागाः ।।१।।

तिथ्युद्धृता लब्धमितानि तानि योज्यानि भोग्याहतशेषकस्य ।
तिथ्यंशकैः क्रान्तिकला भवन्ति युक्तायनांशग्रहगोलदिक्काः ।।२।।

1A. ०मानः । 2A No १३ । 3B. No च । 4B. अतः परं वर्षादिबलानि लिख्यंते इत्यधिकम् । 5B. No कालवीर्यं समाप्तम् । 6B. No इति । 7B. वक्तुमुचितमेव । 8B. सार्धया । 9A. बन्धनीमध्यस्थः श्लोकांशो नास्ति । 10B. ०प्तिकं । 11B. इह पुनः । 12B. No ३४१ । 13B. No २९९ । 14B. ०शा ।

रवि	चन्द्र	भौम	बुध	गुरु	शुक्र	शनि	
१२८३ ३० द	१२०० २ उ	८५ २१ उ	१४३२ १ द	१४८९ ४ द	३९३ २८ द	४८६ ४१ उ	क्रान्ति कला

इति। एवं क्रान्तिं कृत्वा शुक्ररविभौमबृहस्पतीनां यदि सौम्या क्रान्तिस्तर्हि परमापक्रमे १४४० स्वं धनं विधेया। यदि दक्षिणा क्रान्तिस्तर्हि परमक्रान्तौ[1] ऋणं विधेया। शनिचन्द्रयोस्तु दक्षिणा क्रान्तिर्धनं सौम्या ऋणं कर्तव्येति[2]। बुधस्य तु उत्तरा दक्षिणा वा सदा धनमेव कर्तव्या। तदनन्तरं तां संस्कृतक्रान्तिं रामा३[3]भ्यस्तां त्रिगुणितां परमापक्रमेण १४४० भजेत्, आयनं बलं भवति[4]। [अत्र द्वितीयः सम्प्रदायोऽस्ति। यथा। स्वस्वपरमशरेण युक्ताः परमक्रान्तयो भवन्ति।[5]] तत्कालक्रान्तिरपि तत्कालशरेण संस्कृता स्फुटा भवति। अनया स्फुटक्रान्त्या स्फुटपरमक्रान्त्या[6] च उक्तवदेव आयनं बलं केचित् कुर्वन्ति। अत्र [प्रथमपक्षे तावदुदाहरणं[7]] लिख्यते[8]। अत्र रवेः क्रान्तिर्दक्षिणा १२८३।३० परमक्रान्तौ १४४० ऋणं कृता जाता[9] १५६।३०। इयं त्रिगुणा ४६९। ३०। परमापक्रमेण १४४० भक्ता लब्धं राशयः। शेषं ४६९।३० त्रिंशद्गुणं १४० ७०।९०० अधस्थं षष्ट्या विभज्य उपरि योजिते[10] जातं १४०८५ परमापक्रमेण १४४० भक्ते[11] लब्धमंशाः ९ शेषं १२५[12] पुनः षष्ट्या संगुण्य लब्धाः कलाः ।४६। एवं विकलाश्च ५२। एवं लब्धं राश्यादि ०।९।४६।५२ अस्य लिप्ताः ५८६।५२ एताः व्योमाकाश-द्विरद-ख-कुभिः १०८०० भक्ता लब्धमायनं बलं ०।३।१५। अत्र[सुगमसुगमप्रकारेण परमक्रान्तिसंस्कृतम् अष्टचत्वारिंशता भजेत्, लब्धमायनबलं कलादिर्भवति। यथात्र रविक्रान्तिः संस्कृता परमक्रान्तिः १५६।३०। अष्टचत्वारिंशद्भक्ता लब्धं कलादिकमायनबलं[13]] तदेव ०।३।१५। एवं यथोक्तप्रकारेण साधितान्यायनबलानि लिख्यन्ते।

र	च	मं	बु	बृ	शु	श	
० ३ १५	० ५ ०	० ३१ ४६	० ५९ ५०	० १ ५३	० ११ ४३	० ९ ५१	

अथ द्वितीयपक्षे उदाहरणं लिख्यते। तत्र रवेः शराभावाद्विशेषो नास्ति। चन्द्रादीनां तु विशेषः। तत्र परमक्रान्तिकरणार्थं परमशराः साध्याः। तत्र चन्द्रस्य[14] खाश्वाः ७० शराङ्गानि ६५ रसेषवो ५६ गिन-वेदाश्च ४३ धिष्ण्यानि २७ खगाः ९ शराश्चेति उक्तम्।

1B. अतः परं '१४४०' इत्यधिकम्। 2B. No इति। 3B. No '३'। 4B. स्यात्। 5A. बन्धनीस्थः पाठो नास्ति। 6B. No स्फुटपरमक्रान्त्या। 7B. बन्धनीमध्ये प्रथमपक्षतो बहुसम्मतत्वादुदाहरणम् इति पाठः। 8B. अतः परं तत्र रव्यादीनां क्रान्तयो लिख्यन्ते इत्यधिकम्। 9B. जातं। 10B. योगे। 11A. भक्ता। 12B, No १२५। 13B. बन्धनीमध्ये 'सुगमप्रकारः परमक्रान्तिसंस्कृतम् अष्टचत्वारिंशत् ४८ भक्ते लब्धमयनबलम्'। इति पाठः। 14B. No 'तत्र चन्द्रस्य'।

खण्डानाम् ऐक्ये चन्द्रस्य परमशरः २७० ; अथ भौमादीनां[1] परमशरज्ञानार्थम् उपायः । अत्र हि[2] "खेटात् पातयुतात्तथा ज्ञ-सितयोः शीघ्रोच्चतो दोर्ज्यका क्षेपघ्नी चलकर्णहृदि"ति शरसाधने क्षेपलिप्तानां दोर्ज्यागुणकश्चल[3]कर्णश्च भाजकोऽस्ति। तत्र भाजकस्य कर्णस्याल्पत्वे दोर्ज्यायाश्चाधिकत्वे भूयान् शरः स्यात् । अतोऽल्पकर्णाः साध्याः। ते च स्वस्वपरैरूनीकृतासु त्रिज्यासु संपद्यंते । पराश्च ब्रह्मतुल्ये । "कु-कुंजरा ८१ वेदकृता ४४ स्त्रिदस्राः २३ सप्ताहयो ८७ विश्व १३ मिताः पराख्या" इति । स्वस्वपरैरूनास्त्रिज्या १२०[4] जाता भौमादीनां परमाल्पकर्णाः। मं ३९। बु ७६ बृ २७ शुक्र ३३ शनि १०७ परमदोर्ज्या त्वियं १२० । अथ कुजादिक्षेपकाः "खेश्वरा ११० द्वीषुक्ष्माः १५२ षडगाः ७६ षडग्निशशिनः १३६ खत्रीन्दवो १३० लिप्तिका" इति। भौमादीनां मध्यमक्षेपलिप्ताः । मं ११० बु १५२ बृ ७६ शु १३६ शनि १३० ; अथ स्वस्वक्षेपलिप्ताः परमदोर्ज्यया १२० संगुण्य स्वस्वपरमाल्पकर्णैर्विभज्य लब्धानि परमाधिकशराः स्युः । यथा[5] भौमस्य क्षेपलिप्ताः ११० परमदोर्ज्या[6]गुणिता १३२०० भौमस्य परमाल्पकर्णेन ३९ भक्ता जाता भौमस्य परमशरलिप्ताः ३३८ ; एवं बुधादीनामपि जाताः परमशरलिप्ताः। अथ परमक्रान्तिः[7] १४४० स्व स्व परमशरलिप्ता युता जाताश्चन्द्रादीनां परमक्रान्तयः स्फुटाः[8] । अथ तात्कालिकस्फुटक्रान्त्यर्थं तात्कालिकशरः साध्यते। तत्र तात्कालिकराहुः । ११।१७।५५।३५ अयमेव चक्रशुद्धो जातः चन्द्रपातः १०।२२।४।२५[9]

परमशराः

चं	मं	बु	बृ	शु	श
२७०	३३८	२४०	२४०	४९४	१४६

अथ परमक्रान्तयः

च	मं	बु	बृ	शु	श
१७१०	१७७८	१६८०	१५३४	१९३४	१५८५

अथ भौमादीनां पाताः ; ते च मध्यमा ब्रह्मतुल्ये प्रोक्ताः ।

"पाताः कुजाद्राशयः ।

रुद्रेशांकदशद्विपा ११।११।९।१०।८ अथ लवा अष्टौ ८ ग्रहाः ९ कुंजराः ८ ।

शून्यं० शैलभुवः १७"

इति। एवं भौमादीनां[10] मध्यमपाता[11] राश्याद्याः[12] मं ११।८।०।० बु० ११।९।०।० बृ ९।८।०।० शुक्र १०।०।०।० श ८।१७।०।० अथैषां स्पष्टीकरणम्। "स्व[13] चंचलफलैर्व्यस्तैरमी संस्कृता मंदाभ्यां बुधशुक्रयोरि"ति। तत्र भौमस्य प्रागानीतं शीघ्रफलं [धनं व्यस्तं सज्जातमंशादि ऋणं ३७।२।१० ; बुधस्य यथागतं मन्दफलम्

1A. ०मादि। 2B. तत्र हि। 3A. ०कोऽस्ति। 4B. अङ्कभागो नास्ति। 5B. अथ। 6B. ०जंया। 7A. No अथ परमक्रान्तिः। 8B. अतः परं लिख्यन्ते इत्यधिकम्। 9A. अतः परम् अथ परमक्रान्तयः इत्यधिकम्। 10A. ०मादि। 11A. मध्यमा। 12B. ०श्यादयः। 13A. स्वस्व।

ऋणम् अंशादि १।२६।३६, गुरोः शीघ्रफलम्[1]] ऋणं व्यस्तं सञ्जातं[2] धनं १।५३।३८, भृगोर्यथास्थितं मन्दफलम् ऋणं १।३५।५०, शनेः शीघ्रफलमृणं व्यस्तं सञ्जातं[2] धनं ४।३९।३७, यथावत्[3] संस्कृता जाताः स्पष्टपाता लिख्यन्ते।

सपातग्रहाः

चं	भौ	बु	बृ	शु	श
०	३	१०	५	०	८
२	१०	१८	७	१३	२४
२५	१८	५२	५८	१९	२५
५८	५९	५५	३	३०	५८

स्पष्टग्रहाः

च	मं	बु	बृ	शु	श
१०	१०	११	९	९	८
२२	०	७	९	२८	२१
४	५७	३३	५०	३४	२२
२५	५७	३९	८	१०	३७

स्पष्टपाताः

च	मं	बु	बृ	शु	श
१	५	११	७	२	०
१०	९	११	२८	१४	२
२१	२४	१९	४	४५	५६
३३	९	३३	५५	२०	२१

अथ "खेटात् पातयुतात्तथा ज्ञ-सितयोः शीघ्रोच्चत" इत्युक्तत्वाद् बुधशीघ्रोच्चतः स्पष्टा भवन्ति[4]। अथ सपातचन्द्रात् "खाश्वाः शराङ्गानि[5]" इत्यादिना जातः चन्द्रसितपातात्युत्तरः[6] ११।२१। अथ भौमादीनां[7] शरसाधनार्थं प्राग्लिखितास्तात्कालिकाः कर्णा लिख्यन्ते।

भौमकर्णः[8] १२४, बुध[9] कर्णः १११, बृ १४३, शु ६०, श १२४; अथ सपातभौमस्य ३।१०।१८।५९ दोः २।१९।४८।१। ज्या ११७।५४ क्षेप- ११ घ्नी ११६६९ चलकर्ण १२४ हृत् लब्धं जातः शरः कलादि उत्तरः १०४।३५। एवं बुधादीनामपि जाताः शराः लिख्यन्ते। अथैषां शराणां क्रान्तिसंस्कारार्थं स्फुटीकरणम्। तदुक्तं सिद्धान्तशिरोमणौ।

सत्रिराशिग्रहद्युज्यानिघ्नस्त्रिज्योद्धृतः शरः।
स्फुटोऽसौ क्रान्तिसंस्कारे दृक्कर्मणि तथाऽक्षजे ॥१॥

चन्द्र	मंग	बुध	गुरु	शुक्र	शनि
११	१४०	१०१	२३	६२	१३६
११	३५	५४	५०	४०	१६
द	उ	द	उ	उ	द

इति। अस्यार्थः।—यस्य ग्रहस्य शरः स्पष्टः क्रियते स ग्रहः सत्रिराशिः राशित्रययुतः कार्य इत्यर्थः। तस्य राशित्रययुतस्य ग्रहस्य या द्युज्यानाम क्रांतिकोटिज्या तया निघ्नो गुणितः त्रिज्यया उद्धृतो १३०[10] भक्तः सन् शरः स्फुटो भवति। कुत्रायमुपयुज्यत इत्याह। क्रान्तिसंस्कारे तथाऽक्षजे दृक्कर्मणि चेति अथात्रोदाहरणम्। तत्र

च	मं	बु	बृ	शु	श
४	८	११	१०	९	३
१०	९	८	२८	३	२
२१	१४	२४	४	३३	५६
२३	९	१६	५५	२०	२१

राशित्रययुताश्चन्द्रादयो लिख्यन्ते। अथैषां सायनांशानां क्रांतयः चं ७५।१७। मं २४२७।४४। बु १०५।२६। बृ ३५४।३२ शु १३३०।११। श १३३१।२०। अथासौ कोटिज्या यथा। अत्र चन्द्रक्रान्तिः ७५।१७ अस्या राश्यादिकरणे जातं ०।१२।३१।७। "भुजोनं त्रिगृहं कोटिरि"ति जाता कोटिः १२।१७।२८।५३ अस्याः

1. बन्धनीमध्यस्थः पाठः B-पुस्तके नास्ति। 2B. सञ्जातं। 3B. यावत्। 4A. बुधशुक्रशीघ्रोच्चेष्टा लिख्यन्ते। 5B. शरेषव। 6A. चन्द्रशरकलादि उत्तरः। 7A. भौमः। 8A. मंक। 9B. बुधस्य। 10A. अङ्कभागो नास्ति।

ज्या जाता ११६।४४ ; इयमेव सत्रिराशिचन्द्र[1]द्युज्या । एवं सत्रिराशिभौमादीनामपि जाता द्युज्याः । अथ स्वस्वशराः प्रथमानीताः आभिः स्वस्व[2]द्युज्याभिर्गुणिताः त्रिज्यया १२०[3] भक्ता जाताः स्फुटशराः क्रांतिः संस्कारयोग्या । अथ संस्कारार्थं प्रागानीतमध्यमक्रान्तयो लिख्यन्ते । अथ स्वस्वस्फुटशरसंस्कृताः स्वस्वक्रम[4]जाताश्चन्द्रादीनां स्फुटः क्रांतयः ।

चं	मं	बु	बृ	शु	श		चं	मं	बु	बृ	शु	श	
११६ ४	१०९ ३५	११९ ३९	११८ ३९	१११ ३	१११ २	द्यु ज्याः	उ ११ ५	उ ३५ ३०	द १०१ २१	उ २२ ३६	उ ५७ ५९	द १२६ ५	एते शराः

अथा[5]यनबलम् । यथा । चन्द्रस्य परमा क्रांति. १७१० चन्द्रस्य स्फुटा क्रांतिः उत्तरा १२११।४ "व्यस्ता शीतद्युतिरविजयोर्ज्ञ[6]स्यो" त्युक्तत्वात् क्रांतिसौम्यापरमापक्रमे १७१० ऋणं कृता जाता ४९८।५६ इयं त्रिगुणिता १४९६।४८ इयं चन्द्रस्य परमापक्रमेण १७१० भक्ता लब्धं राश्यादि ०।२६।१५।३४। अस्य लिप्ताः १५७५।३४ एता व्योमाकाश-द्विरद-ख-कुभि १०८००[7] भक्ते लब्धमायनं बलं ०।८।४५। अथवाऽन्यथा[8] स्फुटक्रान्तिसंस्कृता परमक्रांतिः ४९८।५६ परमापक्रमेण १७१०[9] द्विगुणेन ३४२०[10] भक्ता लब्धं तदेवायनं बलं ०।८।४५ एवं भौमादीनामपि स्वस्वक्रांतिं स्वस्वपरमक्रांतिं चादाय[11] साधितान्यायनबलानि लिख्यन्ते ।

चंद्र	मङ्गल	बुध	गुरु	शुक्र	शनि	
१२०० २ उ	८५ २१ उ	१४३६ ११ द	१४८९ ४ द	४६३ २८ द	४८६ ४१ उ	क्रान्त- यः

चं	मं	बु	बृ	शु	श	
० ८ ४५	० ३३ ३	० ५७ २२	० ३ १८	० २३ १५	० २३ ११	आयन बलम्

एवमतिक्लेशेन केचिदायनबलं साधयन्ति । तदेव दर्शितं[1] गणकचक्रचूडामणिभिः श्रीकेशव-दैवज्ञैः स्वकृतजातकपद्धतेः टीकायाम् । तद्यथा । एतदायनबलं कैश्चिच्छरसंस्कृत-क्रांत्योक्तम् । तदसत् । यतो ग्रहस्य याम्योत्तराश्रितमुखेन अयनं गमनं तच्च ग्रहस्य मुखवलनं क्रांति [वशादेव न शरवशात्[13]] तदुक्तं महता[14] प्रबन्धेन सिद्धान्त-शिरोमणौ "बलमानयने क्षेपः क्षिप्तो यैस्ते कुबुद्धय" इति । एवमायनबल[15]साधने क्रान्तेः शरसंस्कारो नास्तीति सद्[16]युक्तिरित्यन्तेन ग्रन्थेन । किंचिदयनं पुरस्कृत्य प्रवर्तमान

1B. ०न्द्रस्य । 2B. No स्वस्व । 3B. अङ्कभागो नास्ति । 4A. क्रान्तयो । 5B. अथाभिरा० । 6A. No ज्ञस्य । 7A. अङ्कभागो नास्ति । 8-A. अथान्यथा । 9-B. १७०१ । 10B. ३४०२ । 11B. 'च ननु षड्बलानन्तरमयं संस्कारश्चादाय(?) इति पाठः । 12B दूषितं । 13. बन्धनीमध्ये A-पुस्तके 'दसत् यतो ग्रहस्य शादेवेन शास्यता' (?) इति पाठः । 14B. महा० । 15B. ०लम । 16A. स० ।

बलमायनं बल[1]मित्युच्यते। तच्च मध्यमक्रांतिवशादेव युक्तम्। स्पष्टक्रान्त्या तत्साधन एतद्व्यभिचारात्। तथाहि अत्र[2] चन्द्रो दक्षिणायने[3] बली अत उत्तरायणसमाप्तौ दक्षिणायनारम्भे च अयनबलाभावेन भाव्यम्। दक्षिणायनं पुरस्कृत्यैव एतद्बलस्य[4] प्रवृत्तेः। तदेतद्[5] व्यभिचरति[6]। यथा। स्फुटः चन्द्रः [२।१३।०।०, पातः ६, अयनांशाः १७; सायनचन्द्रः ३।०।०।०, अस्य क्रान्तिरुत्तरा १४४०, सपातचन्द्रः[7]] ९।०।०।०। अस्माज्जातः शरो दक्षिणः[8]। अयमेव क्रांतिसंस्कारयोग्यः यतः स्फुटत्वार्थं सत्रिराशिचन्द्रस्य[9] द्युज्या १२० गुणास्त्रिज्या १२० हर इति गुणहरयो[10]स्तुल्यत्वमस्ति। अतः शरसंस्कृता क्रांतिः स्फुटेयम् ११७०। अत्रैव दक्षिणायनारम्भः। अग्रिमदिने स्फुटक्रांतेर्ह्रासात्। अतोऽत्रायनसंधौ बलाभावेन भाव्यम्। नैतदत्र संभवति। यतश्चन्द्रस्य परमक्रान्तिः १७१० चन्द्रस्य स्फुटा क्रान्तिरुत्तरा ११७० "क्रांतिः सौम्या स्वमिह परमापक्रमे" इति "व्यस्ता शीतद्युति-रविजयोरि"त्युक्तत्वात् परमक्रान्तौ ऋणं कृता ५४० द्विगुणित[11]परमक्रान्त्या ३४२० भक्ता लब्धमायनबलं ०।९।२८, न चैतद्युक्तम्। अयन-[प्रवृत्तिपुरस्कारेणैतत्प्रवृत्तेः, एवमयनसमाप्तौ बलस्य परमत्वेऽपि व्यभिचारोऽत्र द्रष्टव्यः। किञ्च[12]] क्रमेण वर्धमानं बलं परमत्वप्राप्त्यैव ह्रसति। ततो ह्रासक्रमेण विनश्य पुनरुदेति चेत्युच्चबलादौ दृष्टमत्र व्यभिचरेत्। अत एवोक्तं श्रीकेशवदैवज्ञैः।

सदा क्रान्तिभागैर्युता ज्ञस्य सिद्धाः २४ शनीन्द्वोर्युतोनाः क्रमाद्याम्यसौम्यैः।
विलोमं परेषां गजांभोधिभक्तं भवेदायनं वीर्यमर्कस्य दृग्घ्नम्॥ इति।

आदिशर्मप्रभृतिभिरपि एतदेवाङ्गीकृतमस्ति। तदेवं सति यद्यभिनिवेशमात्रेण स्फुटक्रान्त्याऽयनबलं साधयन्ति तर्हि साधयन्तु नाम, वयन्तु गुर्वनुज्ञात[13]मार्गमेवानुसरामः। अलमतिविस्तरेण।

अथ सूर्यचन्द्रयोः[14]ग्रहयुद्धे च विशेषं मन्दाक्रान्तोत्तरपूर्वार्धाभ्यामाह।—

द्विघ्नं भानोरयनजबलं पक्षवीर्यं तथेन्दो-
र्युद्धे चेष्वोर्विवरविहृतं खेटवीर्यान्तरं हि ॥१६॥
याम्योदक्स्थद्युचरबलयोर्हानिवृद्धी विधेये
वीर्यैकत्वं सदृशकलयोः खेटयोः प्राग्विधाय ॥

व्याख्या।—भानोः सूर्यस्य अयनबलं द्विघ्नं कार्यं तथा इन्दोः पक्षवीर्यं द्विगुणं कार्यम्। अयमर्थः। वक्ष्यमाणचेष्टाबलं [भौमादीनाम् एवोक्तम् अस्ति न तु सूर्यचन्द्रयोः,

---

1A. No बलम्। 2A. अतः परं हि इत्यधिकम्। 3-B. ०यन। 4B. No 'स्य'। 5A. तदेव। 6B. ०चारेऽपि। 7A. बन्धनीस्थः पाठो नास्ति। 8B, ०ज्जाताः शरा दक्षिणाः। 9B. ०चन्द्रः अस्य। 10B. गुणहरगुणयो०। 11B. ०गुण। 12A. बन्धनीमध्ये 'प्रकृतिपुरस्कृतारे कि च'(?) इति पाठः। 13B. ०सृत। 14B. अतः परं विशेषमित्यधिकम्।

अतस्तयोरपि वक्तुमुचितम् । चेष्टाबलं[1]] च प्रत्यक्षोपलभ्यमानं बलमित्यर्थः । तच्च सूर्यस्य उत्तरायणे वर्धमानं दक्षिणायने चापचीयमानं दृश्यत इति अयनबलतुल्यमेव चेष्टाबलं सूर्यस्य । एवं चन्द्रस्य बलं शुक्लपक्षे वर्धमानं कृष्णपक्षे[2] च क्षीयमाणं चेष्टया दृश्यते । अतः पक्षबलतुल्यमेव चेष्टाबलं चन्द्रस्य । तच्चाग्रतो नोक्तमिति तुल्यबलयोगं विधार्यै-वोक्तम् द्विघ्नं भानोरयनजबलं पक्षवीर्यं तथेन्दोरिति । यदि तु वक्ष्यमाण-चेष्टाबलपंक्तौ सूर्यस्यायनबलतुल्यं चेष्टाबलं चन्द्रस्य च[3] पक्षबलतुल्यं चेष्टाबलं लिख्यते, तदा प्रागानीतं सूर्यस्यायनबलं चन्द्रस्य पक्षबलं च[4] यथास्थितमेव स्थाप्यं न द्विगुणमिति । अथ युद्धे विशेषमाह युद्धे चे[5]ति । युद्धे युद्धसमये चे[6]ज्जन्म भवति तदा [7]खेटवीर्यान्तरं ययो-र्ग्रहयोर्युद्धमस्ति तयोर्बलान्तरं विधाय तयोरिष्वो[8]र्वाणयोर्विवरेण अन्तरेण[9] विहृतं भक्तं यल्लभ्यते तत् याम्यस्थग्रहबले [हानिर्विधेया । उदक्स्थे ग्रहबले वृद्धिर्विधेया । किं कृत्वा ? सदृशकलयोः खेटयोः[10]] वीर्यैकत्वं षड्बलैक्यं विधाय[11] । एतदुक्तं भवति । आदौ सर्वेषां ग्रहाणां स्थानबलादीनि षड्बलान्यानीय तदैक्यानि कार्याणि[12] । तानि यथास्वं[13] संस्कृतबलानि भवन्ति । अथ यदि जन्मसमये भौमादिपञ्चकमध्ये द्वौ[14] ग्रहौ समकलौ भवतः तदा तयोः[15] शरौ[16] कार्यौ तयोरन्तरं च[17] कार्यम् । अथ तयोर्ग्रहयोः संस्कृत-बले पृथक् संस्थाप्य[18] तयोरन्तरं कार्यं शरान्तरेण[19] भाज्यम् यद्रूपादि लभ्यते तत् दक्षिण-दिक्स्थग्रहस्य संस्कृतबले शोध्यम् उदक्स्थग्रहस्य संस्कृत[20]बले योज्यम् । एवं कृते तयोर्बले स्फुटे स्तः इति । ग्रहदिग्ज्ञानं चोक्तं ब्रह्मतुल्ये । "ज्ञेयौ खेटौ निजशरदिशावेकदिक्केऽल्प-बाणो व्यस्ताशः स्यादितरखचरादि"ति । ननु षड्बलानन्तरमयं संस्कारश्चेत्तर्हि प्राग एव वक्तुमुचितस्तत्कथं स इहैवो[21]क्त इति चेत् । सत्यम्[22] । एतस्य संस्कारस्य चेष्टा-बलभेदज्ञानार्थम् इह लिखनम्[23] । यतो युद्धे दक्षिणदिक्स्थः चेष्टया हीनबलो दृश्यते । उत्तरदिक्स्थो बलयुक्तो दृश्यते अतो दक्षिणदिक्स्थबले हानिरुक्ता, उत्तरदिक्स्थबले वृद्धिश्चोक्तेति । अत्र ममेदं प्रतिभाति, प्रायो दक्षिणदिक्स्थो जितो भवति उदक्स्थश्च जयी भवति[24] । अतस्तद्बलयोः क्रमशो[25] हानिवृद्धी उक्ते[26] । यदि[27] तु "विपुलः स्निग्धो द्युतिमान् दक्षिणदिक्स्थोऽपि बलयुक्त" इति युक्तियुक्तं(?) वराहमिहिरवचनानुसारेण दक्षिणदिक्स्थो जयी भवति तदा दक्षिणदिक्स्थस्य बले[28] वृद्धिरुत्तरदिक्स्थस्य बले[29] हानिश्च

1A. बन्धनीस्थः पाठो नास्ति । 2B. कृष्णे । 3B. No च । 4B. No च । 5B. No च । 6B. No चेत् । 7A. इतः पूर्वं 'स्व' इत्यधिकम् । 8A. तयोरेव इष्वो० । 9B. No अन्तरेण । 10B. बन्धनीस्थः पाठो नास्ति । 11B. विधेयम् । 12B. कुर्यात् । 13B. No स्वं । 14B. यौ । 15B. तौ । 16B. सशरौ । 17B. No च । 18A. स्थाप्ये । 19B. शरेण । 20A. No ०स्य संस्कृत० । 21B. सदैवो० । 22B. अतः परं "सत्यमित्यव्ययम् अर्धाङ्गीकारे" इत्यधिकः पाठः । 23B. लिखितम् । 24B. अतः परम् 'इति' इत्यधिकम् । 25B. क्रमेण । 26B. ०वृद्धिरुक्तेति । 27A. यदा । 28B. बल । 29B. बल ।

विधेया । एवं "द्वावपि मयूखयुक्तौ विपुलौ स्निग्धौ समागमे भवतः । तत्रान्योन्यप्रीतिरि"ति लक्षणे कोऽपि पराभूतो न भवति, तदा नायं संस्कार इति[1] ।

अथ मुख्यचेष्टाबलं मन्दाक्रान्तोत्तरार्धेन मन्दाक्रान्तया चा[2]ह ।--

मध्यस्पष्टद्युचरविवरार्धेन युक्ताच्चलोच्चान्-
मध्ये स्पष्टादधिकवपुषि न्यूनके वर्जिताच्च ।।१७।।
जह्यान्मध्यग्रहमिति भवेत्तच्च चेष्टाख्यकेन्द्रं
षड्राशिभ्योऽधिकमपनयेन्मण्डलाच्छेषकस्य ।
कृत्वा[3] लिप्ताः शतहतगजाशाभि १०८०० राप्तं फलं य-
च्चेष्टावीर्यं तदिह गदितं हौरिकैर्बुद्धिवृद्धैः ।।१८।।

अस्यार्थः ।--चलोच्चात् शीघ्रोच्चात् मध्यग्रहं जह्यात् विशोधयेत् । तच्चेष्टाकेन्द्रं भवेत् । कथंभूताच्चलोच्चात् ? मध्ये ग्रहे[4] स्पष्टात् [अधिकवपुषि स्पष्टग्रहापेक्षया[5]] अधिके सति मध्यस्पष्टद्युचरविवरार्धेन युक्तात् । मध्ये स्पष्टान्न्यूनके सति मध्यस्पष्टद्युचरविवरार्धेन वर्जिताच्च । एतदुक्तं भवति । मध्य[6]स्पष्टयोर्ग्रहयोरन्तरं कृत्वा तस्यार्धं कार्यम् । मध्यमे स्पष्टापेक्षया अधिके सति तदर्धं [शीघ्रोच्चे योज्यम् । अन्यथा तदर्धं[7]] शीघ्रोच्चात् शोध्यम् । अथ संस्कृतात् शीघ्रोच्चात् मध्य[8]ग्रहं विशोधयेत् । शेषं[9] चेष्टाकेन्द्रं भवति । अत्रायं विशेषो ज्ञेयः । मध्यस्पष्टयोरन्तरं तथा कार्यं यथा स्वल्पमन्तरं भवति । तत्र यः शोध्यते स न्यूनो ज्ञेयः ; तेनेदं भवेत्, मध्यमः ०।१०।०।० स्पष्टः ११।१५।०।० अनयोरिदमन्तरं ०।२५।०।०। न त्विदं ११।१५।०।० मध्यमो ग्रहोऽधिकः न तु स्पष्ट इति । अत्र जह्यात् स्पष्ट[10]ग्रहमिति बहवः पठन्ति । तदयुक्तम्[11] । यतो जह्यान्मध्यमिति कृते फलद्वयार्धसंस्कृतमध्य[12]ग्रहेण शीघ्रोच्चमूनं सच्चेष्टाकेन्द्रं सदुक्तं[13] व्युत्[14]पादकं दृश्यते । जह्यात् स्पष्टमिति कृते सार्धफलद्वयसंस्कृतमध्यग्रहोनं चलोच्चमत्यं[15]तमयुक्तं स्यात् । अत एव श्रीधराचार्यैरुक्तम् ।

स्फुटश्चेच्छुध्यते मध्ये तच्छेषार्धं धनं चले ।
स्फुटं वा शुध्यते मध्यो तच्छेषार्धं क्षयो भवेत् ।। १।।
ततो मध्योनितं कृत्वा चक्रार्धादधिकं यदि ।
संशोध्य भगणात्तस्मात् षड्भिश्चेष्टाबलं हृतात्[16] ।।२।।

1B. अतः परं "ग्रन्थकर्तुरित्येतत् सं[म]तमस्ति इत्यवगम्यते । यतः सदृशकलयोरिति वचनादेव युद्ध इति प्राप्तेऽपि पुनर्युद्धपदोपादानं कृतम् । तेनेदमवगम्यते सदृशकलत्वेऽपि युद्धाभावश्चेन्नायं संस्कार इति" । इत्यधिकम् । 2B. No च । 3B. धृत्वा । 4B. ग्रहात् । 5B. बन्धनीमध्यस्थः पाठो नास्ति । 6A. मध्यम० । 7B. बन्धनीस्थः पाठो नास्ति । 8A. मध्यम । 9B. तेषां । 10B. मध्य० । 11B. तदुक्तं । 12B. मध्यम । 13B. अतः परं युक्तम् इत्यधिकः पाठः । 14A. चक्राद्युत्० । 15A-B. ०मन्य० । 16B. हतात् ।

तथा वामोदरपद्धतावपि ।।--

स्फुटमध्यमयोरैक्यं[1] दलितं शोधयेच्चलात् । चेष्टाकेन्द्रमिति ।

एवं जातं चेष्टाकेन्द्रं यदि[2] षड्राशिभ्योऽल्पं तदा यथास्थितं स्थाप्यं तस्य लिप्ताः कार्याः । यदि तु षड्राशिभ्योऽधिकं तदा मण्डलात् चक्रात् १२ विशोधयेत्[3] । शेषस्य लिप्ताः कृत्वा[4] शतहतगजाशाभिः १०८०० यदाप्तं फलं तदिह चेष्टावीर्यं गदितम् । कैः ? बुद्धिवृद्धैः हौरिकैः होराशास्त्रतत्त्वज्ञैः ।। अथा[5]स्योदाहरणम् । मध्यमो भौमः ४।४।३३।२५ ; स्पष्टो भौमः ५।९।१४।९ भौमशीघ्रोच्चं ७।१८।२१।१७ मध्यस्पष्टद्युचरविवरं १।४।४०।४४ ; अस्यार्धं ०।१७।२०।२२ ; अत्र मध्यस्पष्टान्न्यूनोऽस्ति अतोऽर्धेनानेन ०।१७।२०।२२ वर्जितं शीघ्रोच्चं जातं ७।१।०।५५ ; अस्मान्मध्यमे शोधिते जातं चेष्टाकेन्द्रं २।२६।२७।३० ; अत्र[6] सुगमोपायः ।। "स्फुटमध्यमयोरैक्यं दलितं शोधयेच्चलादि"ति ।। यथात्र स्फुटमध्यमयोरैक्यं ९।१३।४७।३४ दलितं ४।२१।५३।४७ ; इदं शीघ्रोच्चात् ७।१८।२१।१७ शोधितं २।२६।२७।३० जातं तदेव चेष्टाकेन्द्रम् ।। अत्रायं विशेषः ।। स्फुटमध्यमयोरैक्यं यदि चक्राधिकं भवेत् तदा चक्रं[7] न[8] त्याज्यम् । तथा मध्यस्फुट[9]योरेकतरस्य राशिस्थाने दश एकादश वा[10]स्युः अपरस्य राशिस्थाने शून्यमेको वा भवेत् । तदा स्फुटमध्यमयोरैक्यं चक्रं ५२ संयोज्य पश्चाद्दलं कार्यम् ।। दलं चक्राधिकं चेत् चक्रं विशोध्यमिति एवं बुधा[11]दीनामपि जातानि चेष्टाकेन्द्राणि ।

म	बु	बृ	शु	श	जातानि
२	३	११	६	७	
२६	१३	१६	२५	१०	भौमादीनां[12]
२७	५६	५६	५७	१७	
३०	४५	१४	१८	५०	चेष्टाकेन्द्राणि

अथ चेष्टाबलम् । तत्र चेष्टाकेन्द्रस्य षडूनत्वात् यथास्थितस्य लिप्ताः ५१८७।३० शतहतगजाशाभिः १०८०० आप्तं[13]चेष्टाबलं भौमस्य ०।२८।४९ ; अत्र सुगमोपायः ।

चेष्टाकेन्द्रं षडधिकं यदि चक्राद्विशोधयेत् ।
तदंशा वह्निभिर्भक्ताश्चेष्टावीर्यं कलादिकम् ।।

यथात्र भौमचेष्टाकेन्द्रं २।२६।२७।३० [षडूनत्वादेतस्यैवांशाः ८६।२७।३०[14]] त्रिभिर्भक्ता[15] लब्धं कलादि तदेव चेष्टावीर्यं०।२८।४९ ;एवं जातानि चेष्टाबलानि लिख्यन्ते । रवेस्तु[16] अयनबलतुल्यमेव चेष्टाबलम् [चन्द्रस्य तु पक्षमेव चेष्टाबलम्[17]] इति । एतयोर्योगेन जातानि स्फुटचेष्टाबलानि लिख्यन्ते ।

अथ नैसर्गिकबलमिन्द्रवज्रयाह ।--

मन्दावनीसूनु-शशांकपुत्र-वागीश-शुक्रेन्दु-दिवाकराणाम् ।
एकोत्तरं रूपमगैर्विभक्तं नैसर्गिकं वीर्यमुदाहरन्ति ।।१९।।

1B. ०मचारैक्यं । 2A. No यदि । 3B. अपनयेत् । 4B. कार्या । 5B. No अथ । 6B. अथ । 7B. चक्रात् । 8B. No न । 9A. मध्यमस्य स्पष्ट० । 10B. No वा । 11B. भौमा० । 12B. No भौमादीनां । 13B. अतः परं फलम् इत्यधिकम् । 14B. बन्धनीस्थः पाठो नास्ति । 15B. त्रिभक्तात् । 16B. रवेः सूर्यस्य । 17A. बन्धनीस्थः पाठो नास्ति ।

[व्याख्या :—मन्दावनीसूनु-शशाङ्कपुत्र-वागीश-शुक्रेन्दु-दिवाकराणाम् एकोत्तरं रूपम् अगैः विभक्तं सत् क्रमेण मन्दादीनां नैसर्गिकं वीर्यम् उदाहरन्ति[1] ।] अयमर्थ ।—रूपं सप्तभिर्भक्तं लब्धं शनेर्नैसर्गिकं बलं[2] ०।८।३४ ; द्वयं सप्तभक्तं[3] लब्धम् अवनीसूनोः भौमस्य निसर्ग[4]बलं ०।१७।८ ; त्रयं सप्तभक्तं लब्धं शशाङ्कपुत्रस्य बुधस्य[5] बलं ०।१७।४३ ; चतुष्टयं सप्तभक्तं गुरोर्बलं ।०।३४।१७ ; पञ्च सप्तभक्ताः[6] शुक्रस्य बलं ०।४१।५१ ; षट् सप्तभक्ताः[7] चन्द्र[8]बलं ०।५१।२५ ; सप्त सप्तभक्ता रवेर्बलं[9] १।०।० ; इदं निसर्ग[10] बलं सदा स्थिरमेव ।।

	र	चं	मं	बु	बृ	शु	श		र	चं	मं	बु	बृ	शु	श
अयन	०	०	०	०	०	०	०	चेष्टा-	०	०	०	०	०	०	०
बलं	३	५	३१	५९	१	१९	१९	बलम्	३	५७	२८	३४	४	५१	६
	१५	०	४६	५०	३	४७	४१		१५	४६	४२	१९	२१	२१	२५
	र	चं	मं	बु	बृ	शु	श		र	चं	मं	बु	बृ	शु	श
स्फुट	०	१	१	१	०	१	१	निसर्ग	१	०	०	०	०	०	०
चेष्टा	६	२	०	३५	५	११	६	बलम्	०	५१	१७	२५	३४	४२	८
बलं	३०	१	३५	९	२४	४	१५		०	२५	१८	४३	१७	५१	३४

अथ दृग्बलं शालिनीपूर्वार्धेनाह ।।—

सौम्यैर्दृष्टे दृष्टितुर्यांशयुक्तं वीर्यं पापालोकिते तद्विहीनम् ।।

पञ्चबलयोगेन जातं यद् ग्रह[11]बलं तद्[12]दृष्टितुर्यांशयुक्तं कार्यम् । कस्मिन् सति ? ग्रहैः सौम्यैर्दृष्टे सति । अथ पापालोकिते सति तद्विहीनं पापदृष्टिहीनं कार्यम् । अयं भावः । यस्य[13] ग्रहस्योपरि[14] या दृष्टयः सन्ति[15] तन्मध्ये शुभदृष्टीनामैक्यं कृत्वा चतुर्थांशो ग्राह्यः तद्धनाख्यं दृग्बलं भवति । पापग्रहदृष्टीनामैक्यं कृत्वा[16] चतुर्थांशो ग्राह्यः तदृणाख्यं दृग्बलं भवति ।। धनर्णदृग्बलयोरन्तरं स्फुटदृग्बलं भवति । शेषजातीयं[17] (?) । यथात्र रवेरुपरि चन्द्रादि-दृष्टयः चं०।५६।३१ ; मं ०।२७।८ ; बु ०।०।० ; बृ ०।०।० ; शु ०।६।५३। श ।०। ३७।४९ सौम्यदृष्टीनामैक्यं १।३।२४ ; अस्य चतुर्थांशो जातं धनं दृग्बलं ०।१५।५१ । अथ पापदृष्टीनामैक्यं १।१४।५७[18] अस्य चतुर्थांशम् ऋणं दृग्बलं ०।१६।१४ ; धनर्णदृग्बलयोरन्तरे कृते शेषमृणं दृग्बलं[19] ०।०।२३ ; एवं[20] चन्द्रादीनामपि जातानि [दृग्बलानि लिख्यन्ते[21]] ।। अथ कृतानां षड्बलानां योगकरणे शीघ्रोपस्थित्यर्थं तानि लिख्यन्ते ।। [तेषामैक्ये संस्कृतबलानि स्फुटानि बलानि तदधो लिख्यन्ते[22]] ।

1. बन्धनीमध्यस्थः पाठः A-पुस्तके नास्ति । 2B. वीर्यं । 3A. भक्ते , 4B. नैसर्गिक । 5B. No बुधस्य । 6B. भक्ते । 7B. भक्ते । 8B. चन्द्रस्य । 9A. रविबलमिति । 10B. नैसर्गिकं । 11B. षड् ग्रह । 12B. No तद् । 13B. अस्य । 14A. ग्रहोपरि । 15B. सम्भवन्ति । 16B. No कृत्वा । 17B. जातेयं । 18A. ५२।४।५७ । 19B. अतः परं स्फुटं इत्यधिकम् । 20B. अथ । 21B. बन्धनीमध्यस्थः पाठो नास्ति । 22B. बन्धनीमध्यस्थः पाठो नास्ति ।

	र	च	म	बु	बृ	शु	श		र	च	म	बु	बृ	शु	श
स्थान बलं	३ ४ ५६	२ ४३ ३३	२ २८ ४५	३ ३५ ५७	२ १२ १८	३ २४ ४१	१ २४ २६	निगर्ग बलं	१ ० ०	० ५१ २५	० १७ ८	० २५ ४३	० ३४ १७	० ४२ ५१	० ८ ३४
दिग् बलं	० ३० ४	० २७ ४५	० ७ २३	० १ ९	० २ १७	० ४४ २१	० २० ४४	चेष्टा वीर्यं	० ६ ३०	१ २ ४१	१ ० ३५	१ ३४ ९०	० ५ २४	१ ११ ४	१ ६ २५
काल वीर्यं	० ३१ १७	३ २८ ५३	० ३३ २१	० ५१ ४१	२ २६ २९	२ २६ २९	१ ३३ ३१	दृष्टि वीर्यं	० ० २३ ऋ	० ५ ४ ऋ	० ९ २८ ध	० ७ ६ ध	० ३ ४ ऋ	० १ ३७ ऋ	० २० ० ध

[एतानि स्फुटानि बलानि ; ऐक्येन जातानि[1]] ।

र	च	म	बु	बृ	शु	श
० ० २३ ऋ	० ५ ४ ऋ	० ९ २५ ध	० ७ ६ ध	० ३ ४ ऋ	० २२ ३७ ऋ	० २० ० ध
र	**च**	**म**	**बु**	**बृ**	**शु**	**श**
५ १२ २४	८ २८ ५३	४ ३६ ५२	७ २७ ३३	६ १७ ४१	८ १६ ५९	४ ५३ ४०

एवं ग्रहबलान्युक्त्वा शालिन्युत्तरार्धेन प्रमाणि काद्वयेन तामरसेन च भावबलान्याह ।

लग्नस्यापि स्वामिवीर्यं हि वीर्यं
युक्तं कार्यं तच्च जीवज्ञदृष्ट्या ॥२०॥
शुभावलोकिते पुनस्तदीयदृष्टिपादयुक् ।
असाधुना निरीक्षिते तदंघ्रिणा विवर्जितम् ॥२१॥
नृभे क्षिपेच्च रूपकं चतुष्पदाप्ययोर्दलम् ।
न कीटभे तु[2] किंचन स्फुटं भवेत्तनोर्बलम् ॥२२॥
जलज-चतुष्पद-कीटभसंज्ञाः सुख-दशमास्तगता बलवंतः ।
निजनिजसप्तमगा विबलास्ते तदितरगैरनुपातविधिः स्यात् ॥२३॥

1B. बन्धनीमध्ये 'एतेषामैक्यं जातं षड्बलैक्यं' इति पाठः । 2B. च ।

[व्याख्या—] लग्नस्यापीत्यत्र लग्नपदं भावपरम् । तथा च लग्नादे[1]र्भावस्यापि स्वामिवीर्यमेव वीर्यं भवति । यथात्र[2] तनुभावस्य मिथुनस्य स्वामी बुधः तद्बलमेव ७।२७।३३[3][धनभावेऽपि मिथुनराशिरस्ति अतो धनभाव[बल]मपि तदेव ७।२७।३३[4]] सहजभावे कर्कराशिरस्ति तदधिपश्चन्द्रः एतद्बल[5]मेव सहजभावबलम् ।८।२८।१३। सुखभावे सिंहोऽस्ति तत्पतेः सूर्यस्य बलं सुखभावबलम् ।५।१२।२४ ; सुतभावे कन्याऽस्ति तत्पते-र्बुधस्य बलं सुतभावबलम् ७।२७।३३। रिपुभावे तुलाऽस्ति तत्पतेः शुक्रस्य बलं रिपुभाव-बलम् ।८।१६।५९। जायामृतिभावयोर्धनुर्धरोऽस्ति तदधिपस्य[6] गुरोर्बलमेव जायामृतिभावयो-र्बलम् ।६।१७।४१। एवमन्येऽपि । अथ भावबलस्य[7] संस्कारमाह । युक्तं कार्यं तच्च जीवज्ञदृष्टयेति । तद्भावबलं गुरुदृष्ट्या बुधदृष्ट्या[8] च युक्तं कार्यम् । अथ भावे[9] शुभाव-लोकिते सति पुनः भूयः[10] तदीयदृष्ट्या[11] [शुभदृष्टिचतुर्थांशेन[12]] युक्तं कार्यम् असाधुना पापेन निरीक्षिते सति तदंघ्रिणा पापदृष्टिचतुर्थांशेन[13] वर्जितं कार्यम् ॥ यथात्र तनु-भावं प्रति[14] रव्यादि[15]दृष्टयः ॥ र ०।५१।११। चं ०। मं ०।१७।१९। बु ०।५३।४। बृ ०।२६।३५; शु ०।२९।१ ; श ०।५८।० । युक्तं कार्यं तच्च जीवज्ञदृष्ट्येत्युक्तत्वात् गुरु-बुधदृष्टियोगो धनम् १।४९।३९। अथ शुभग्रहदृष्टियोगस्य [२।१८।५८ चतुर्थांशोऽपि धनम् ०।३४।४४। एवं मिलित्वा धनं २।२४।२३। अथ पापदृष्टियोगस्य[16]] २।६।२०। चतुर्थांश ०।३१।।३१ ऋणम् । धनर्णयोरन्तरे शेषं धनं १।५२।४८। एतत्तनुबलेऽस्मिन् ७।२७।३३ युक्तं जातं ९।२०।२१ एवं दृग्बलसंस्कृतानि भावबलानि लिख्यन्ते ।

१	२	३	४	५	६	७	८	९	१०	११	१२
९	९	१०	६	७	८	६	६	५	६	८	४
२०	१३	१९	२६	३४	११	१२	१९	१८	७	५	४५
२१	२६	५८	५३	३१	५५	१९	८	५६	५१	१८	४१

तनुदिग्बलमाह[17] । नृभे क्षिपेच्च रूपक-मिति । तनुभावे[18] यदि नरराशिरस्ति[19] तदा रूपकं १ दिग्बलं तनुबले क्षिपेत्[20] । तनुभावे यदि चतुष्पदराशिर्जलजराशि [र्वा भवति तदा तद्[21]] बले दलं ०।३०।०[22] दिग्बलं योजयेत्[23] । तनुभावे यदि[24] कीटराशिर्भवति तदा न[25] किंचन, तत्र दिग्बलाभाव इत्यर्थः । एवं कृते सति तनोर्लग्नस्य बलं स्फुटं भवेत् ।

नृचतुष्पदादिस्वरूप[26]मुक्तं लघुजातके—

1B. लग्नस्यादे० । 2B. अथात्र । 3. अतः परं 'तनुभावबलम्' इत्यर्थकः कश्चन पाठोऽत्र अपेक्षित इति प्रतिभाति । 4A. बन्धनीस्थः पाठो नास्ति । 5B. तस्य बल० । 6B. तदधिपतेः । 7A. ०फलस्य । 8B. No बुधदृष्ट्या । 9A. No अथ भावे । 10A, No पुनः भूयः । 11 अत्र तदीयदृष्टिपादेन इति स्यात् ; B. दृष्टि । 12B. बन्धनीस्थः पाठो नास्ति । 13B. तुर्यांशेन । 14A. तनुभावोपरि । 15B. रव्यादीनां । 16B. बन्धनीस्थः पाठो नास्ति । 17B. No तनुदिग्बलमाह । 18B. अतः परं तनुबले क्षिपेत् इत्यधिकम् । 19B. ०शिर्भवति । 20B. No तनुबले क्षिपेत् । 21B. बन्धनीस्थः पाठो नास्ति । 22B No ०।३०।० । 23B. अतः परं वा भवति तनुभावः इत्यधिकम् । 24B. No यदि । 25B. No न । 26A. ०रूप० ।

मेषवृषधन्विसिंहाश्चतुष्पदा मकरपूर्वभागश्च ।
कीटः कर्कटराशिः सरीसृपो वृश्चिकः कथितः ॥१॥
मकरस्य पश्चिमार्धं कुंभो मीनश्च[1] जलचराः ख्याताः ।
मिथुनतुलाधरकन्या द्विपदाख्या धनुषि[2] पूर्वभागश्च ॥२॥

अत्र[3] कुम्भस्य जलचरमध्ये या[4] गणना कृता सा यममत[5] इति भाति[6] ॥ नृराशित्वे[7] बहुसंमतेः[8] ॥ तथाहि बृहज्जातके 'मत्स्यो घटी'त्यादिना राशिस्वरूपं वदता श्रीवराहमिहिरेण घटीति कुम्भ[9]स्वरूपमुक्तम् । घटीति घटवान् पुरुषः कुम्भराशिः इत्युक्तं भवति । होरामकरन्देऽपि । "सरिक्तकुम्भो मनुजश्च कुम्भः"इत्युक्तमस्ति । नह्यनेन[10] कुम्भस्य जलचरत्वं सिध्यति [अतः कुम्भो मनुज एव[11]] । यथाकथञ्चिज्जलसम्बन्धेन जलचरत्वं चेत्तदा ससस्यदहना प्लवगा च[12] कन्येत्युक्ते कन्याराशिरपि जलचरं स्यात्[13] । अत एव श्रीवराहमिहिराचार्या[14]भिप्रायं जानता तत्पुत्रेण पृथुयशसा षट्पञ्चाशिकायामुक्तम् ।

तुलोऽथ[15] कन्या मिथुनं घटश्च नृराशयस्तेषु शुभं वदन्तीति[16] ॥

तथा चैतत्[17]सिद्धम् । मिथुनतुलाधरकन्याकुम्भाः[18] धनुषि पूर्वभागश्च नरराशयः[19] । मेषवृषसिंहाः धनुषोऽपरार्धं मकरपूर्वार्धञ्च[20] चतुष्पदराशयः । मकरस्य पश्चिमार्धं मीनश्चेति जलचरौ[21] । कर्कवृश्चिकौ कीटराशी[22] ॥ अत्रायं विशेषः ॥ यत्र जलचरकीटयोः पृथगुपादानं नास्ति तत्र परस्परमन्तर्भावो ज्ञेयः । अत्र तनुभावे मिथुनराशिरस्ति स च नृराशिः । अतो जातं दिग्बलं रूपं १।०।० एतद्युतं तनुबलं[23] जातं स्फुटं ।१०।२०।२१ ; अथान्यभावानां दिग्बलमाह । जलजचतुष्पदकीटभसंज्ञा इति । अस्य[24] तात्पर्यार्थः । अथ[25] जलराशी[26] सुखभावे बलिनौ[27] दशमे निर्बलौ । चतुष्पदराशयो दशमे बलिनः सुखभावे निर्बलाः[28] । कीटराशी अस्ते बलिनौ तनौ निर्बलौ[29] । नृभे क्षिपेच्च रूपकमित्युक्तेः नृराशयो लग्ने बलिनः सप्तमभावे निर्बलाः । मध्ये त्वनुपातविधिना त्रैराशिकविधिना[30] बलं साध्यम् ॥ तद्यथा । जलचरराशिः सुखभावे परमबलः दशमे च निर्बलः । तथा च[31] जलराशे[32]र्दशमभावे [न सह यथा यथान्तरं भवति तथा तथा बलं वर्धते । तच्च राशिषट्कं यावत्, सुखभावे[33]] परमबलोक्तेः[34] । अतो जलचर[35]राशिभावस्य दशमभावेन[36] सहान्तरं तथा विधेयं यथा षडनं स्यात्[37] ।

1B. No च । 2A. धनुः । 3B. इति । 4B. No या । 5B. परमत । 6B. भ्रान्तिः । 7B. ०शित्वे । 8B. समेतः । 9B. कुम्भस्य । 10B. नह्यते च । अत्र नह्योतेन इति स्यात् । 11B. बन्धनीस्थः पाठो नास्ति । 12A. प्लवगाच्च । 13B. अतः परम् "अतः कुम्भो मनुज एव" इत्यधिकम् । 14A. No आचार्य । 15A. तुल्योऽथ । 16B. अतः परं वचनात् इत्यधिकम् । 17B. चेति । 18B. कुम्भ । 19B. नृराशयः । 20B. No मकरपूर्वार्धम् । 21B. जलचरः । 22B. राशिः । 23B. बले । 24B. ग्रहस्य । 25B. No अथ । 26B. राशिः । 27B. बली । 28B. निर्बलिनः । 29B. निर्बलिनौ । 30B. No त्रैराशिकविधिना । 31B. No च । 32B. राशि० । 33B. बन्धनीस्थः पाठो नास्ति । 34B. परमबलः । 35B. जलचरस्य । 36B. No दशमभावेन । 37B. षड्रूपं न स्यात् ।

ततोऽनुपातः । दशमभावेन राशिषट्केऽन्तरे यदि रूपं बलं तदेष्टेऽन्तरे[1] किमिति । तथाच[2] जलचरराशिभावस्य दशमभावेना[3]न्तरं कृत्वा षड्भिर्भजेत्[4] यल्लब्धं तत्तस्य भावस्य दिग्बलम् । एवं चतुष्पदादिष्वपि । अत्रेदं निबध्यते[5] ।

नृराशयः सप्तमतो विशोध्या[6] यौ वारिगौ तौ दशमाद्विशोध्यौ ।
[यौ कीटराशी तनुतो विशोध्यौ चतुष्पदाश्चापि चतुर्थभावात् ॥१॥

षड्भाधिका मण्डलतो विशोध्या[7]] भागीकृता राम ३ हृतात् फलं[8] यत् ।
कलादि[9] तद्दिग्बलमत्र सिद्धं तेनान्वितं स्वस्वबलं स्फुटं स्यात् ॥२॥इति ।

अस्योदाहरणम् । यथात्र धनभावः २।२८।५९। [अत्र मिथुनराशिरस्ति । स च नृराशिः, "नृराशयः सप्तमतो विशोध्या यौ वारिगौ तौ दशमाद्विशोध्यौ[10]] इत्युक्तेः सप्तमादस्मात् ८।४।५६। धनभावे शोधिते शेषं ५।५।५७।३[11] षड्नत्वात् एतस्य एव भागाः १५५।५७। राम३ हृता लब्धं कलादि दिग्बलं ।५१।५९ धनभावबलं ९।२३।२६ दिग्बलेनानेन ०।५१।५९ युतं जातं धनभावबलं स्फुटं १०।५।२५। एवं सहजभावादीनामपि जातानि स्फुटबलानि [लिख्यन्ते । तन्वादिभावरूपादिबलानि[12]] ।

तनु	धन	सह	सु	सुत	रिपु	जा	मृ	ध	क	आय	व्यय
१०	१०	१०	६	७	८	६	७	५	८	५	
३०	५	३५	२६	५८	२३	१२	३	२६	१७	२१	
२१	२५	५२	४३	२९	५४	१९	६	५७	१७	३३	

इति श्रीवल्लालदैवज्ञात्मजकृष्णदैवज्ञविरचिते श्रीपतिभट्टकृतजातक[13] पद्धत्युदाहरणे बलोदाहरणम् ॥३॥

[चतुर्थम् इष्टकष्टाध्यायोदाहरणम्]

एवं बलानि प्रसाध्य[14] इष्ट-कष्ट[15]-बलसाधनं सप्रयोजनं रथोद्धतया प्रतिजानीते[16] ।

इष्टकष्टबलनिर्णयाद्यतो जातकोदितफलस्य निर्णयः ।
शिष्यमोहविनिवृत्तये ततस्तत्प्रसाधन[17]मथाभिधास्यते ॥१॥

1A. ०न्तरेण । 2B. No च । 3B. दशमेना० । 4B. भक्ते । 5B. No अत्रेदं निबध्यते । 6A. विशोध्य । 7B. बन्धनीस्थः पाठो नास्ति । 8B. हृता बलं । 9A. बलादि । 10A. बन्धनीस्थः पाठो नास्ति । 11B. No ३ । 12A. बन्धनीस्थः पाठो नास्ति । 13B. No जातक । 14B. No प्रसाध्य । 15B. No कष्ट । 16B. आह । 17A. प्रयोजन० ।

ततः कारणात् तत्[1]प्रसाधनं तयोः इष्टकष्टबलयोः प्रसाधनम् अभिधास्यते । कस्यै ? शिष्यमोहविनिवृत्तये । ततः कुतः ? यतः[2] कारणात् जातकोदितफलस्य निर्णयः इष्ट-कष्टबलनिर्णयाद्भवति ।

तत्र[3] तत्साधनार्थम् उच्चरश्मी[4]नुपजातिकयाह ॥—

नीचोनिताः स्पष्टतरा ग्रहेन्द्राः[5] षड्भाधिका मण्डलतो निपातिताः ।
कलीकृता राशिकलाभिरन्विता भलिप्तिकाप्ताः खलु तुङ्गरश्मयः ॥२॥

स्पष्टतरा ग्रहेन्द्राः स्वस्वनीचेन राश्यादिना ऊनिताः सन्तः षड्भाधिकाश्चेत् तदा मण्डलतो निपातिता[6] विशोध्याः, अर्थात् षडूनाश्चेद् यथास्थिता एव । ततस्ते कलीकृताः ततो राशिकलाभिरष्टादशशतैः १८००[7] अन्विताः ततो भलिप्तिकाभि[8] १८०० राप्ताः तुङ्गरश्मय उच्चरश्मयो भवन्ति । अस्योदाहरणम् । यथात्र तात्कालिकः स्पष्टतरो रविः ७।१७।१९।२५ अयं स्वनीचेनानेन ६।१०।०।८ ऊनितो जातः १।७।१९।२५ षडूनत्वादयमेव कलीकृतः । २२३९[9]।२५ राशिकलाभि १८०० रन्वितः ४०३९।२५[10] अयं भलिप्तिकाभिः १८०० भक्तो लब्धा उच्चरश्मयः ॥२।१४।३९[11] ॥ अथात्र सुगमोपायः ॥

नीचोनितः स्पष्टतरो ग्रहेन्द्रः षड्भाधिको मण्डलतो विशोध्यः ।
राशौ सरूपे द्विगुणे लवाद्ये भवेयुरुच्चाख्य-मरीचयोऽत्र ॥

यथात्र[12] नीचोनो रविः १।७।१९।२५ राशिस्थाने सैके[13] २ लवाद्ये[14] द्विगुणे च[15] १४३८[16]।५० जातास्त एवोच्च[17]रश्मयः ॥२।१४।३८[18]।५० [अथान्यसुगमोपायः । निजोच्चबलमङ्क ६ घ्नं सैकं स्युरुच्चरश्मयः[19]] । यथात्र रवेः प्रागानीतमुच्चबलं[20] ०।१२।२६ इदं षड्गुणं १।१४।३६ सैकं[21] जाता उच्चरश्मयः २।१४।३६।[22] अत्रोच्च[23]बलस्यावयवपरित्यागादधःस्थानांके त्र्यमन्तरं परमं[24] भवति । उच्चबले यदि अङ्कचतुष्टयं गृह्यते तदा किमप्यन्तरं न भवतीति[25] । एवं चन्द्रादीनामपि जाता उच्चरश्मयो[26] लिख्यंते ।

र	च	म	बु	बृ	शु	श
२	६	२	४	२	१	१
१४	४५	२२	१३	१३	१३	३४
[27] ३६	१७	२८	५०	५०	५०	७

1B. No तत् । 2B. No यतः । 3B. No तत्र । 4A. मन्दावुच्चरश्मी० । 5B. ग्रहास्तु चेत् । 6A. No निपातिता । 7A. अङ्कभागो नास्ति । 8B. ०प्ताभि० । 9A. ५९ । 10A. No '२५' । 11B. '३२' । 12B. तथात्र । 13B. सैकः । 14B. लवाद्यो । 15B. द्विगुणो यः । 16B. ३९ । 17B. ०स्ततोच्च० । 18B. ३९ । 19A. बन्धनीमध्यस्थः पाठो नास्ति । 20B. प्रागानीतान्युच्चबलानि । 21B. अतः परं २।१४।३६। इत्यधिकम् । 22B. No २।१४।३६ । 23B. अत्र च । 24B. अत्र 'परम्' इति भवेत् । 25B. No इति । 26B. उच्चरश्मयो जाता । 27A. ३९ ।

अथोपजातिकाद्वयेन चेष्टारश्मिसाधनमाह ।—

चेष्टाख्यकेन्द्राणि कुजादिकानामुक्तानि भास्वानयनांशयुक्तः ।
त्रिभाधिकोऽथेन्दुरनेन हीनश्चेष्टाख्यकेन्द्रे हि तयोर्भवेताम् ॥३॥
चेष्टाख्यकेन्द्राण्यधिकानि षड्भाच्चक्राद्विशुद्धानि कलीकृतानि ।
सराशिलिप्तानि खखाष्टचन्द्रै[1]र्हृतानि चेष्टाख्यमरीचयः स्युः ॥४॥

कुजादिकानां चेष्टाख्यकेन्द्राणि उक्तानि 'मध्यस्पष्टद्युचरविवरार्धेने'त्यादिना [३।१७] रविचन्द्रयोस्तु चेष्टा[2]केन्द्रे पूर्वं नोक्ते अतस्तत्साधनमाह । अय[3]नांशयुक्तः त्रिभाधिकश्च भास्वान् [सूर्यः सूर्यस्य चेष्टाकेन्द्रं भवति[4]] अथ इनेन सूर्येण हीनः इन्दुः चन्द्रस्य चेष्टाकेन्द्रं[5] भवति । यथा[6]त्र रविः । ७।१७।१९।२५[7] अयनांशै ०।१७।१३।३८ र्युक्तः ।८।४।३३।३[8] राशित्रयाधिक[9]श्च जातं रवेश्चेष्टाकेन्द्रं ११।४।३३।३ । अथ इन्दुः ।१।१०।२१।३३[10] इनेन[11] हीनो[12] ।७।१७।१९।२५[13] जातं चेष्टाकेन्द्रं चन्द्रस्य[14] ।५।२३।३।८[15] ।

र	चं	मं	बु	बु	शु	श	
११	५	२	३	११	६	७[16]	चेष्टा-
४	२३	२६	१२	१६	२५	१०	केन्द्रा-
३३[17]	३	२७	५६[18]	५६	५७[19]	१७	णि
३	८	३०	४५	१४	१८[20]	५०	

अथ चेष्टाकेन्द्रेभ्यश्चेष्टारश्मिसाधनमाह । चेष्टाख्यकेन्द्राण्यधिकानि षड्भादिति । चेष्टा[21]केन्द्राणि षड्भा[22]धिकानि चेच्चक्राद्विशुद्धानि अन्यथा यथास्थितानि । ततः कलीकृतानि ततो राशिलिप्ताभिः १८०० सहितानि ततः खखाष्टचन्द्रैः १८०० हृतानि लब्धाश्चेष्टारश्मयः स्युरिति ॥ अस्योदाहरणम् ॥ तत्र प्रागानीतानि चेष्टाकेन्द्राणि लिख्यन्ते । अत्र रविचेष्टाकेन्द्रं ११।४।३३।३ षड्भाधिकमत[23] चक्राद्विशुद्धं[24] १[25]।२५।२६।५७ अस्य कलाः १५।२६।[26]५७ राशिकलाभिः[27] १८०० युक्ता ३३२६।५७ एवं खखाष्टचन्द्रै १८०० र्भक्ता लब्धाश्चेष्टारश्मयः । १।५[28]।५४ । अथा[29]त्र सुगमोपायः ॥

चेष्टाकेन्द्रेऽधिके षड्भाच्
चक्रात्तत्[30] प्रविशोधयेत् ।
राशौ सैके लवाद्ये तु
द्विघ्ने चेष्टामरीचयः ॥

एवं जाताश्चेष्टारश्मयो लिख्यन्ते ।

र	चं	मं	बु	बृ	शु	श	
१	६	३	४	१	६	५[31]	चेष्टा
५[32]	४६	५२[33]	२५	२६	८	३९	रश्मयः
५४	४	५१[34]	५३	७	५	२४	

1B. अतः परम् १८०० इत्यधिकम् । 2B. चष्टाख्य० । 3A अथाय० । 4B. बन्धनीमध्यो सूर्येन्द्वोः केन्द्रे भवतः इति पाठः । 5B. चन्द्रात् केन्द्रं । 6B. तथा० । 7B. No २५ । 8B. No ३ । 9B. ०दधिक० । 10B. १।१०।१२।२१ । 11A. अनेन । 12A. अतः परं 'रविः' इत्यधिकम् । 13B. No २५ । 14B. चन्द्रचेष्टाकेन्द्रम् । 15B. ५।२३।२।२८ । 16B. १ । 17A. ३२ । 18B. ५९ । 19B. २७ । 20B. ८ । 21B. चेष्टाख्य । 22B. राशिषट्का० । 23B. ०मस्ति । 24B. चक्राद्विशुद्धानि चेष्टाकेन्द्राणि इति पाठः । 25B. '०' । 26B. १६ । 27B. कला० । 28B. ५० । 29B. No अथ । 30A. ०त्ततः । 31B. ५० । 32B. ५३ । 33B. ५५ । 34B. १ ।

अथोच्चचेष्टाफले इन्द्रा[1]वज्रयाह ।—

रूपोनितानां ग्रहदीधितीनां रूपादिना रूपचयेन यत् स्यात् ।
श्रेढी[2]फलं तत्त्रिगुणांशुभक्तमित्युच्चचेष्टाख्यफले प्रसाध्ये ॥५॥

व्याख्या[3] ।——रूपोनितानां निरेकानां ग्रहदीधितीनां ग्रहरश्मीनां रूपादिना रूपचयेन च यत् श्रेढीफलं स्यात् तत्त्रिगुणांशु[4]भक्तं त्रिगुण[5]रश्मिभक्तं कार्यम्[6] । इत्यमुना प्रकारेण उच्च-चेष्टा[ख्ये प्रसाध्ये उच्चरश्मिभिरुच्चफलं चेष्टारश्मिभिश्चेष्टाफलं साध्यम् । एतदुक्तं भवति । श्रेढी[7]] फले हि त्रयमपेक्षितं पदम् आदिः चयश्च । प्रकृते तु रूपोनिता ग्रहरश्मयः पदम् । रूपादिः[8] रूपमेव चयः । एभ्यः श्रेढीफलं साध्यम् ॥ तत्र रूपादौ रूपचये च श्रेढीफलानयन[9]-मुक्तं लीलावत्याम् ॥

**सैकपदघ्नपदार्धमथैकाद्यंकयुतिः किल संकलिताख्या[10] ।
सा द्वियुतेन पदेन विनिघ्नी[11] इति ।**

तत् श्रेढीफलं यदि उच्चरश्मिजं तदा त्रिगुणोच्चरश्मिभक्तम् उच्चफलं भवति । श्रेढीफलं यदि चेष्टारश्मिजं तर्हि त्रिगुणचेष्टारश्मिभक्तं चेष्टाफलं भवति । अस्योदाहरणम् रवेरुच्चरश्मयः [२।१४।३९ रूपोनिताः[12]] १।१४।३९ इदमेव पदम् । अथेदं पदं[13] १।१४।३९ सैकपदेन २।१४।३९ गुणितं २।४७।३२ अस्यार्धं जातं श्रेढीफलं १।२३[14]।४६ इदं वारद्वयं षष्ट्या सवर्णितं ५०१६[15] त्रिगुण[16]रश्मिभिरेतैः ६।४३।५७ वारद्वयं[17] सवर्णितैः[18] २४२३७ भक्तं लब्धमुच्चफलं[19] रवेः[20] ०।१२।२६ । एवं चेष्टारश्मिभ्यश्चेष्टाफलं[21] साध्यम् । तद्[22] यथा रवेश्चेष्टारश्मयः १।५०।५४ एते[23] रूपोनिता जाता[24] ०।५०।५४ ; इदं सैकपदेन[25] गुणितं[26] १।३४।५ अस्यार्धं जातं श्रेढीफलं ०।४७।२ ; इदं वारद्वयं षष्ट्या सवर्णितं २८२२ त्रिगुणरश्मिभिरेतैः ५।३२।४२ वारद्वयं षष्ट्या सवर्णितैः १९९६२ भक्तं[27] लब्धं चेष्टाफलं [०।८।२९ । अथात्र सुगमोपाय. । निरेका रश्मयः षड्भिर्भक्ता[:] चेष्टोच्चजं फलम् । यथात्र रवेरुच्च-रश्मयः २।१४।३९ निरेकाः १।१४।३९ षड्भिर्भक्ता लब्धं चेष्टाफलं [उच्चफलं ?] ०।१२।२६[28]] एवं चन्द्रादीनामपि साध्यानि । वस्तुतस्तु स्थानबले "नीचोनो द्युचरोऽधिको यदि भवेदि"त्यादिना

1A-B. ०फलेन्द्र० । 2B. चेष्टा । 3B. No व्याख्या । 4B. ०णांश० । 5A. ०गुणित । 6A. No कार्यम् । 7A. बन्धनीस्थः पाठो नास्ति । 8A. No रूपादिः । 9A. फल० । 10A. अतः परं "सैकपदेन गुणितं यत् पदं तस्यार्धं श्रेढीफलं भवतीत्यर्थः" इत्यधिकम् । 11A No "सा द्वियुतेन पदेन विनिघ्नी" । 12A. बन्धनीस्थः पाठो नास्ति । 13B. No अथेदं पदम् । 14A. २७ । 15A. ५०२६ । 16B. त्रिगुणित । 17A. अतः परं 'षष्ट्या' इत्यधिकम् । 18B. सवर्णितम् । 19B. बलं । 20B. No रवेः । 21B. बलं । 22A. No तत् । 23B. एवं । 24A. पदं । 25B. अतः परं "१।५०।५४" इत्यधिकम् । 26B. गुणिता । 27B. भक्ते । 28B. बन्धनीमध्ये "०।१२।३६ ; अथ रवेश्चेष्टारश्मयो निरेका[:] ०।५०।५४ षड्भि र्द्भक्ता लब्धं चेष्टाफलम् ०।८।३९" इति पाठः ।

पूर्वमानी[1]तानि यानि उच्चबलानि तान्येव चेष्टाफलानि[2] भवन्ति । अथ[3] चन्द्रस्य पक्षबलमेव चेष्टाफलं[4] भवति[5] । रवेस्तु आयनबलतुल्यं य[6]च्चेष्टाबलं तच्चेष्टाफलं न भवति । किन्तु रवेश्चेष्टाकेन्द्रात् भौमादि[7]बलं साध्यं तदेव[8] चेष्टाफलं भवतीति ॥ अथ रव्यादीनामुच्च-फलानि[9] चेष्टाफलानि चैतानि[10] ॥५॥

र	चं	मं	बु	बृ	शु	श		र	चं	मं	बु	बृ	शु	श	
०	०	०	०	०	०	०	चेष्टा	०	०	०	०	०	०	०	उच्च-
८	५७	२८	३४	४	५१	४६	फलं	१२	५७	१३	३२	१२	२	५	फलम्
२९	४१	[11] ४४	[12] १९	[13] २१	२१	३४		२६	३३	४५	१२	[14] १८	११	४१	

[अथेष्टकष्टसाधन[15]]मुपजातिकयाह ।

तद्घातमूलं फलमिष्टसंज्ञं ते तुङ्गचेष्टाप्रभवे फले तु ।
विशोध्य रूपादवशेषघातमूलं हि कष्टाभिधमामनन्ति ॥६॥

तद्घातमूलं तयोरुच्चचेष्टाफलयोर्यो[16]घातः तस्य यन्मूलं तद् इष्टसंज्ञं फलम्[17] आमनन्ति पूर्वाचार्या होरिकाः । अथ[18] तुङ्गचेष्टाप्रभवे फले रूपाद्विशोध्य अवशेषघातस्य मूलं कष्टाभिधं कष्टसंज्ञं फलम् आमनन्ति ॥ अयमर्थः । उच्चफलं रूपाद् विशोध्य शेषं[19] स्थाप्यं चेष्टाफलमपि रूपाद् विशोध्य शेषं स्थाप्यं तयोः शेषयोः घातः कार्यः[20] । तस्य मूलं ग्राह्यम् । तत् कष्टफलं भवतीति[21] । अस्योदाहरणम् । तत्र रवेरुच्चफलं ०।१२।२६ चेष्टाफलं ०।८।२९ अनयोर्घातः ०।५[22]।४५ इदं वारद्वयं षष्ट्या सवर्णितं १०५, अस्य मूलं १०।१६ षष्ट्या भक्तं जातं घातस्य सूक्ष्मं मूलं ०।१०।१६ ; इदं रवेरिष्टफलम् ।

अथ कष्टफलोदाहरणम् ॥ तत्र रवेरुच्चफलं ०।१२।२६ रूपाद्विशोध्य शेषं ०।४७।३४ चेष्टाफलं ०।८।२९[23] रूपाद्विशोध्य शेषं ०।५१।३१ शेषद्वयस्य घातः ०।४०।५० [इदं वारद्वयं षष्ट्या सवर्णितं २४५०[24]] अस्य मूलं ४९।३० षष्टिभक्तं जातं घातस्य सूक्ष्ममूलं ०।४९।३० ; इदं रवेः कष्टफलम् । एवं चन्द्रादीनामपि । इष्टकष्ट[25]प्रयोजनं च

1B. पूर्वानी० । 2B. No चेष्टाफलानि । 3B. अतः परम् "भौमादीनां चेष्टाकेन्द्रोत्थानि यानि चेष्टाफलानि तान्येव भवन्ति" इत्यधिकम् । 4B. बलं । 5B. No भवति । 6B. No यत् । 7B. दीव । 8B. No बलं साध्यं तदेव । 9B. बलानि । 10B. लिख्यन्ते । 11B. ४९ । 12A. १८ । 13B. ११ । 14B. २८ । 15ब. बन्धनीमध्ये "अथ चेष्टाकष्ट०" इति पाठः । 16B. No यः । 17B. अतः परं भवति इत्यधिकम् । 18A. अथ ये । 19B. अवशेषकं । 20B. तयोः शेषकयोर्हतिः कार्या । 21A. No इति । 22B. १ । 23B. २२ । 24B. बन्धनीस्थः पाठो नास्ति । 25B. No इष्टकष्ट ।

इष्टेऽधिके ग्रहदशाफलं[1] इष्टमधिकम् अनिष्टमल्पम् । इष्टेऽल्पे इष्टमल्पम्[2] अनिष्टं बहु । द्वयोः[3] समत्वे दशाफलेऽपी[4]ष्टानिष्टसाम्यम् ॥६॥

र	चं	मं	बु	बृ	शु	श		र	चं	मं	बु	बृ	शु	श	
०	०	०	०	०	०	०	सूर्या-दीनां	०	०	०	०	०	०	०	सूर्या-दीनां
१०	५७	१९	३३	७	[6]१४	[7]१५	इष्ट फलं	४९	२	३७	२६	५१	२२	२७	कष्ट-फलं
१६	३७	५४	१५	[5]२१	३६	१६		[8]३०	२६	५९	४३	[9]३१	२२	१	

[अथ बलानां दृष्टीनां चेष्टानिष्ट[10]]फले च स्फुटत्वमाहोपजातिकया ।—

पृथक् पृथक् खेटबलानि ताभ्यां हन्याद्भवेतां हि बले स्फुटे ते ।
सर्वग्रहाणां च दृशः फलाभ्यां शुभाशुभाभ्यां निहताः स्फुटाः स्युः[11] ॥७॥

[फलाभ्याम् इष्टकष्टफलाभ्यां[12]] खेटबलानि ग्रहाणां षड्बलैक्यानि पृथक् पृथक्[13] हन्यात् गुणयेत्[14] ते बले स्फुटे भवेताम् । एतदुक्तं भवति । रवेः संस्कृतबलं षड्बलैक्यात्मकं रवेरिष्टेन कष्टेन च पृथक्[15] गुणयेत् । यत् इष्टेन गुणितं तत् स्फुटमिष्टबलं भवति । रवेः शुभफलं चेत् इष्टबलवशेनाल्पमधिकं वा[16] भवति । एवं कष्टेन गुणितं यत् रविषड्बलैक्यं तत् स्फुट[17]कष्टबलं भवति । रवेरशुभ[18]फलं चेत्[19] कष्टबलवशेन ज्ञेयमित्यर्थः । एवं चन्द्रादीनामपि ज्ञेयम् । अथ शुभाशुभाभ्यां फलाभ्याम् इष्टकष्टफलाभ्यां निहता गुणिताः सर्वग्रहाणां दृशश्च स्फुटाः स्युः ॥ इष्टेन गुणिता[20] दृष्टिः स्फुटा इष्टदृष्टिर्भवति । ग्रहदृष्टेः शुभ[21]फलं चेत् इष्ट[22]दृष्टिवशेन ज्ञेयम्[23] । [एवं कष्टेन गुणिता दृष्टिः कष्टदृष्टिर्भवति ग्रहदृष्टेरशुभफलं चेत् कष्टदृष्टिवशेन ज्ञेयमित्यर्थः[24]] ।

अत्रान्यो विचारः । दृश्यस्येष्टकष्टाभ्यां दृष्टयो गुणनीया उत द्रष्टु[25]रिष्टकष्टाभ्याम् । तत्र बहवो दृश्यस्येष्टकष्टाभ्यां दृष्टिगुणनं कुर्वन्ति । तदयुक्तमिति प्रतिभाति । दृश्यानां भावानाम् इष्टकष्टयोरभावात् । तादृशाना[26]मिष्टकष्टवशेन स्फुटीकरणमशक्यमेव स्यात् । किं च[27] व्युत्पत्तिबलादप्ययमेवार्थो लभ्यते[28] । तथाहि, "सर्वग्रहाणां च दृशः फलाभ्यामि"त्यत्र

1B. फलं लिख्यते । 2B. No अनिष्टमल्पम् इष्टेऽल्पे इष्टमल्पम् । 3B. द्वये । 4B. फलमपी० । 5B. २६ । 6B. १० । 7B. १६ । 8B. ३७ । 9B. ४१ । 10B. बन्धनीमध्ये "यथा बलानां चेष्टाफलेऽनिष्ट०" इति पाठः । 11B- पुस्तके "पृथक् पृथक् खेटबलानीति" इत्येवं प्रतीकमात्रम् । 12B. बन्धनीमध्ये "ताभ्यामिष्टकष्टाभ्याम्" इति पाठः । 13B. पृथक् इत्यस्यावृत्तिर्नास्ति । 14A. No गुणयेत् । 15B. No पृथक् । 16B. No वा । 17B. स्फुटं । 18B. रवेः शुभ । 19A. यत् । 20A. गुणित । 21B. अशुभ । 22B. कष्ट । 23B. अतः परम् "इत्यर्थः" इत्यधिकम् । 24B. बन्धनीस्थः पाठो नास्ति । 25A. तद्द्रष्टु० [No उत] । 26B. दृष्टीना० । 27B. किञ्चित् । 28B. उपलभ्यते ।

एकस्यैव[1] षष्ठ्यन्तस्योभयत्र संबन्धाद् यस्य ग्रहस्य दृष्टिः स्वस्ये[2]ष्टकष्टाभ्यां गुणिता स्फुटा भवतीत्यर्थः सम्पद्यते । तत्र षष्ठ्यन्तस्य द्रष्टृत्वं[3] दृश्यत्वं[4] वेति[5] परं विचारः । तत्र राज्ञो दृष्टिः गुरोर्दृष्टिरित्यादौ षष्ठ्यन्तस्य [दृष्टिविर्यवत्पुसन्नत्वाद् (?) द्रष्टृर्थे व्युत्पन्नत्वात्] राज्ञः कृपादृष्टिरितिवत् सेवककृपादृष्टिरिति [प्र]योगाभावाच्च प्रकृतेऽपि सर्वग्रहाणां दृष्टिरित्येवार्थो[6]] व्युत्पत्तिबललभ्य इत्यलमतिविस्तरेण ।।७।।

[अथ रव्यादीनामिष्टगुणानि षड्बलैक्यानि ।। अथ रव्यादीनां कष्टगुणितषड्बलैक्यानि[7] ।]

र	चं	मं	बु	बृ	शु	श		र	चं	मं	बु	बृ	शु	श	
०	८	१	४	०	२[10]	१	इष्ट-फलम्	४	०	२	३[12]	५[11]	३	२	कष्ट-फलम्
५३	८	३१[8]	८	४६[9]	२७	१९		१७	२०	५५	१९	२४	५	१२	
२७	१	४९	१	१७	४८	३७		४४	३७	१५	१७	१७	१६	१४	

इष्टगुणितग्रहदृष्टिचक्रम् ।।

श्री	र	चं	मं	बु	बृ	शु	श	इष्ट
	०	०	०	०	०	०	०	
र	०	७	०	०	०	०	२	गुण
	०	५३	४१	०	०	०	२८	
	०	०	०	०	०	०	०	
चं	५४	०	२८	४७	४९	६	०	ग्रह
	१६	०	२१	५७	१७	२१	०	
	०	०	०	०	०	०	०	
मं	९	९	०	१६	१४	१	१५	दृष्टि
	०	४९	०	१०	३०	४३	४३	
	०	०	०	०	०	०	[illegible]	
बु	०	२	८	०	१	१	१८	चक्रम्
	०	१०	०	०	०	२१	८	

तन्वादीनामिष्टगुणितदृष्टिचक्रम् ।।

	१	२	३	४	५	६	७	८	९	१०	११	१२
	०	०	०	०	०	०	०	०	०	०	०	०
र	८	६	४	२	०	०	०	१	३	०	४	४
	४५	४२	३८	३५	०	०	०	०	३२	३९	९	५१
	०	०	०	०	०	०	०	०	०	०	०	०
चं	०	८	२६	३९	१६	३५	४५	३४	२२	११	०	०
	०	५६	३५	५४	२७	३०	४८	३६	४२	१०	०	०
	१	०	०	०	०	०	०	०	०	०	०	०
मं	५	१	०	०	०	३	१७	०	५	५	२२	१३
	४८	४१	०	०	०	१६	४५	५	३२	१२	५४	२१
	१	०	०	०	०	०	०	०	०	०	०	०
बु	१२	२७	२४	१४	४	०	०	०	४	१३	२०	५
	२४	३३	५३	१	४४	०	०	०	३	७	५३	१३

1B. No एव । 2B तस्ये० । 3B. दृष्टत्वं । 4B. No दृश्यत्वं । 5A. चेति । 6A. बन्धनीमध्ये 'दृष्टये' इति पाठः । 7B. बन्धनीस्थः पाठो नास्ति । 8B. ४२ । 9B. १५ । 10B. १ । 11B. १२ । 12B. ४ ।

	र	च	म	बु	बृ	शु	श
	०	०	०	०	०	०	०
बृ	०	३	१	०	०	०	६
	०	०	९	०	०	०	१८
	०	०	०	०	०	०	०
शु	१	७	०	३	२	०	११
	१३	२७	०	२०	१०	०	२३
	०	०	०	०	०	०	०
श	१०	४	३	९	८	१६	०
	१५	१	२५	३७	४७	०	०

	१	२	३	४	५	६	७	८	९	१०	११	१२
	०	०	०	०	०	०	०	०	०	०	०	०
बृ	६	५	७	३	०	०	०	०	१	४	७	८
	५६	३४	२	५५	१८	०	०	०	३१	१०	२	१३
	०	०	०	०	०	०	०	०	०	०	०	०
शु	५	३	०	०	०	०	२	५	६	२	६	८
	१०	३	५५	०	०	०	५७	४२	१३	५४	४३	१७
	०	०	०	०	०	०	०	०	०	०	०	०
श	१५	९	९	४	१०	१२	८	१५	५	०	०	०
	४३	२२	२८	१७	५४	४४	४०	१२	२२	०	०	०

कष्टगुणग्रहदृष्टिचक्रम् ॥

	र	चं	मं	बु	बृ	शु	श
	०	०	०	०	०	०	०
र	०	३०	२	०	०	०	१
	०	१९	४०	०	०	०	२८
	०	०	०	०	०	०	०
चं	२	०	१	१	२	०	०
	१७	०	१४	५२	४	१६	०
	०	०	०	०	०	०	०
मं	१७	१८	०	३७	२७	०	३०
	१०	३८	०	११	२२	०	०
	०	०	०	०	०	०	०
बु	०	१	६	०	०	०	१४
	०	४४	२४	०	०	५	३४
	०	०	०	०	०	०	०
बृ	०	२०	८	०	०	०	४२
	०	५३	११	०	०	०	१
	०	०	०	०	०	०	०
शु	२	१५	०	७	४	०	२१
	३४	३०	०	२४	३८	०	३८
	०	०	०	०	०	०	०
श	१७	६	५	१५	१४	२६	०
	१	४१	४०	५८	३६	४३	०

कष्टगुणितदृष्टिभावचक्रम् ॥

	१	२	३	४	५	६	७	८	९	१०	११	१२
	०	०	०	०	०	०	०	०	०	०	०	०
र	४२	३२	२२	१२	०	०	०	४	१७	३६	२०	२३
	१३	४८	३०	२८	०	०	०	४८	५	५६	२	२३
	०	०	०	०	०	०	०	०	०	०	०	०
चं	०	०	१	१	०	१	१	१	०	०	०	०
	०	२२	७	४१	४	३०	२६	२६	५७	२८	०	०
	०	०	०	०	०	०	०	०	०	०	०	०
मं	१०	३	०	०	०	६	३३	१	१०	२	३७	२५
	५१	१४	०	०	०	१४	५५	९	१५	२६	५९	२८
	०	०	०	०	०	०	०	०	०	०	०	०
बु	२३	२२	१६	११	३	०	०	०	३	१०	१६	४
	३७	८	४४	१६	२५	०	०	०	१५	३२	४५	११
	०	०	०	०	०	०	०	०	०	०	०	०
बृ	४८	३९	४९	२७	२	०	०	०	१०	२९	४९	१
	३५	१	२०	२८	१०	०	०	०	४२	११	२०	३२
	०	०	०	०	०	०	०	०	०	०	०	०
शु	१०	६	१	०	०	०	६	१२	१९	६	१४	१७
	३५	२६	५७	०	०	०	२	२	३८	८	३१	३७
	०	०	०	०	०	०	०	०	०	०	०	०
श	२६	१५	१५	२७	१८	२१	१४	२५	८	०	०	०
	७	१७	४४	८	६	९	२४	१४	२६	०	०	०

अथ सप्तभिः श्लोकैः सप्तवर्गजं शुभाशुभ[1]बलमाह। अस्य प्रयोजनं तु वर्गफलं यदि शुभमस्ति तर्हि तस्य वर्गस्य शुभबलवशाज् ज्ञेयम्। वर्गफलं यदि अशुभमस्ति तर्हि तस्य वर्गस्याशुभफलवशाज् ज्ञेयमिति। तत्रादौ सप्तवर्गजं शुभमशुभं[2] च मन्दाक्रान्तया वसन्ततिलकया [चा]ह ॥—

स्वोच्चे रूपं चरणरहितं स्वत्रिकोणे स्वभेऽर्धं
नागांशानां त्रयमधिसुहृद्गेहगे मित्रभेऽङ्घ्रिः।
अंशोऽष्टानां समगृहगते भूपभागोऽरिगेहे
दन्तांशः स्यादधिरिपुगृहे नीचगे शून्यमेव ॥८॥

एतच्छुभाख्यमशुभं च पुनर्गृहेषु स्वोच्चादिवर्तिषु तदूनितरूपमेकम्*।
एवं गृहेषु शुभपापफलार्धमन्यवर्गेषु षट्सु नियतं मुनयः पुराणाः ॥९॥

व्याख्या।—आदौ ऊर्ध्वाधरा नव रेखास्तथा तिर्यग्रेखा दश कुर्यात्। एवं कृते ऊर्ध्वाधरपंक्तौ नव [कोष्ठका भवंति तिर्यक्पंक्तौ चाष्टौ। तत्राद्यकोष्ठं विहाय तिर्यक्पंक्तौ सप्तसु कोष्ठेषु रव्यादिग्रहाणां[3]] नामाद्याक्षराणि लिखेत्। [ऊर्ध्वाधरपंक्तौ अपि प्रथमकोष्ठं विहाय गृह-होराद्याद्याक्षराणि लिखेत्[4]]। नवमे[5] कोष्ठे योगेति पदं लिखेत्। एवं शुभकोष्ठका अशुभकोष्ठकाश्च पृथक् कार्याः। अथ ग्रहो यदि[6] स्वोच्चे भवति तर्हि रूपं शुभं गृहस्थाने लेख्यम्। स्वत्रिकोणे यदि भवति[7] तर्हि चरणरहितं रूपं शुभं लेख्यम्। स्वभे चेत्तदाऽर्धम्। अधिसुहृद्गेहे सति नागांशानां त्रयं ०।२२।३० शुभम्[8]। मित्रभे सति[9] अंघ्रिश्चतुर्थांशः १५ शुभः। समगृहे सति अष्टानामंशः ०।७।३०[10] शुभमित्यर्थः[11]। अरिगृहे शत्रुराशौ भूपभागः षोडशांशः ३।४५ शुभम्[12]। अधिरिपुगृहे अधिशत्रुराशौ दंतांशः द्वात्रिंशदंशः ०।१।५२।३० शुभम्[13]। ग्रहे[14] नीचगे सति शून्यमेव। ग्रहेषु स्वोच्चादिवर्तिषु सत्सु एतच्छु[15]भाख्यं ज्ञेयम्॥ अत्रायं विशेषः॥ यत्रोच्चं नीचं वा संभवति तत्र मित्रादिजं शुभं[16] ग्राह्यम्। अत्र केचिदधिपवशाद्योजयंति। यथा। ग्रहो यस्मिन् गृहेऽस्ति तद्गृह[17]स्वामी स्वोच्चे चेद्भवति तदा रूपं शुभम्। गृहेशः स्वमूलत्रिकोणे चेत् चरणत्रयमित्यादि। एतद् युक्तमिति प्रतिभाति। पूर्वमते तु बहुधा अशुभमेव बलमधिकमायातीति न युक्तम्। उदाहरणे तु[18] ग्रन्थकर्तुः सम्मत एव पक्षोऽस्माभिर्लिख्यते। अथाशुभमाह। तदूनितरूपमिति। तेन शुभेन ऊनितं यत् रूपं तदशुभं भवति। एवं शुभमशुभं च गृहेषु जातम्।

1A. ०वर्गजशुभ०। 2B. शुभाशुभं। 3A. बन्धनीमध्यें 'कोष्ठा'० इति पाठः। 4B. बन्धनीस्थः पाठो नास्ति। 5B. एवं मध्यमनवम। 6A. गृहादि। 7A. अतः परं "चेत्" इत्यधिकम्। 8B. No शुभम्। 9B. No सति। 10A. अङ्कभागो नास्ति। 11B. No इत्यर्थः। 12B. No शुभं। 13B. No शुभम्। 14B. गृहे। 15B. एते शु०। 16B. अतः परं 'न' इत्यधिकम्। 17B. No तद्गृह। 18B. No तु।

* 'वदन्ति तदूनमेकम्' इति मुद्रितपद्धतिपाठः। एवमेव 'मुनयः पुराणाः' इत्यस्यान्वय आञ्जस्येनोपपद्यते।

अथ होरादिवर्गेषु शुभमशुभं चाह। षट्सु अन्यवर्गेषु होरा-द्रेष्काणा[1]दिषु शुभपापफलार्धं ज्ञयम्। एतदुक्तं भवति। होराष्वपि गृहवत् [शुभमशुभं चानीय तयोरर्धं लेख्यम्। अस्योदाहरणं लिख्यते[2]] ॥ ८–९ ॥

शुभ	र	चं	मं	बु	बृ	शु	श	अशु	र	चं	मं	बु	बृ	शु	श
गृ	० २२ ३०	० ३ ४५	० ७ ३०	० ३ ४५	० २२ ३०	० ४५ ०	० १ ५२	गृ	० ३७ ३०	० ५६ १५	० ५२ ३०	० ५२ ३०	० ३७ ३०	० १५ ०	० ५८ ३०
हो	० १५ ०	० १५ ०	० ३ ४५	० ११ ४५	० ३ ४५	० ३ ४५	० ५६ १५	हो	० १५ ०	० १५ ०	० २६ १५	० २६ १५	० १८ १५	० २६ १५	० ५९ ५२
द्रे	० ३ ४५	० ३ ४५	० ३ ४५	० १ ५२	० ३ ४५	० ३ १५	० ५६ १५	द्रे	० २६ १५	० २६ १५	० २६ १५	० २८ ८	० २६ १५	० १५ ०	० ५९ ४५
स	० ७ ३०	० ७ ३०	० ७ ३०	० ७ ३०	० ११ १५	० १५ ०	० ५६ १५	स	० २२ ३०	० २२ ३०	० २२ ३०	० २२ ३०	० १८ ४५	० १५ ०	० ५९ ४५
न	० ३ ४५	० १ ५२	० ११ १५	० १५ ०	० १५ ०	० ३ ३०	० ५६ १५	न	० २६ १५	० २८ ८	० १८ ४५	० १५ १५	० १५ १५	० २२ ३०	० १८ ४५
द्वा	० ३ ४५	० ३ ४५	० ११ १५	० १ ५२	० ३ ४५	० ३ ३०	० ११ १५	द्वा	० २६ १५	० २६ १५	० १८ ४५	० ३८ ८	० २६ १५	० २२ ३०	० १८ ४५
त्रिं	० ३ ४५	० ३ ४५	० ३ ४५	० ७ ३०	० ११ १५	० २२ ३०	० ५६ १५	त्रिं	० २६ १५	० २६ १५	० २६ १५	० २२ ३०	० १८ ४५	० २२ ३०	० ५९ ४५
यो०	१ ० ०	० ३९ २२	० ५० ४५	० ४८ ४५	१ ११ १५	० ५६ १५	१ ५६ १५	यो०	३ ० ०	३ २० ३८	३ ११ १५	३ ११ १५	२ ४८ ४०	२ ३ ४५	३ ४१ ४५

अथैतयोः[3] शुभाशुभयोः स्फुटीकरणार्थं स्थापनमुपजातिकेन्द्रवज्राभ्यामाह[4]।—

1B. No द्रेष्काण। 2B. बन्धनीमध्यस्थः पाठो नास्ति। 3B. No एतयोः। 4A. ०वजयाह।

ये खेटभोच्चादि[1]फले शुभाशुभे सरूपवर्गार्धविभाजिते तथा ।
विधाय सत्कोष्ठकसप्तकावलीं विधारणाये मुखकोष्ठके ततः ॥१०॥
तद्राशिसंज्ञं भदलादिकेषु वर्गेषु तस्यार्धमतो विधेयम्[2] ।
[शेषेषु कोष्ठेषु च षट्सु तज्ज्ञैः पंक्तिद्वयेऽपि द्युचरस्य तस्य ॥११॥[3]]

व्याख्या ।—ये[4] शुभाशुभे खेटभोच्चादिफले पूर्वं कृते ते[5] सरूपवर्गार्धविभाजिते विधाय वर्गः सप्तवर्गः[6] सरूपो रूपसहितो यः[7] सप्तवर्गः अष्टावित्यर्थः, तस्यार्धं चत्वारः तैर्विभाजिते पूर्वकृतं शुभैक्यमशुभैक्यं च[8] पृथक्[9] चतुर्भक्तं कृत्वा तथा सत्कोष्ठकसप्तकावलीं विधाय ततस्तदनन्तरं ते चतुर्भक्ते[10] शुभाशुभे मुखकोष्ठके विधारणीये । ततः शुभमशुभं च राशिसंज्ञं भवति । अथ भ[11]दलादिकेषु होरादिकेषु वर्गेषु[12] शेषेषु कोष्ठेषु तस्य ग्रहस्य पंक्ति-द्वयेऽपि शुभपंक्तौ अशुभपंक्तौ च तस्य राशिसंज्ञस्यार्धं[13] विधेयम् । अस्योदाहरणम् ॥ यथा, रवेः शुभैक्यं १।०।० चतुर्भक्तम् ०।१५।० गृहकोष्ठके धार्यम् । अस्यार्धं ०।७।३० होरादिषट्कोष्ठके[14] धार्यम् । एवं रवेरशुभैक्यं ३।०।० चतुर्भक्तं ०।४५।० अशुभपंक्तौ मुखकोष्ठके धार्यम् । अस्यार्धं ०।२२।३० अशुभपंक्तौ होरादिकोष्ठकेषु[15] धार्यम् । एवं चन्द्रादीनामपि कृते[16] न्यासः ॥१०-११॥

रव्यादीनां न्यासशुभं चक्रम् । न्यासे अशुभचक्रम् ॥

श्री	र	चं	मं	बु	बृ	शु	श	श्री	र	चं	मं	बु	बृ	शु	श
गृह	० १५ ०	० ९ ५०	० ६ ५	० १२ ११	० १७ ४९	० २९ ४	० ४ १७	गृह	० ४५ ०	० ५० ९	० ४७ ४९	० ४७ ४९	० ४२ ११	० ३० ५६	० ५५ २६
होरा	० ७ ३०	० ४ ५४	० ६ ५	० ६ ५	० ८ ५४	० १४ ३९	० २ १३	होरा	० २२ ३०	० २५ ५	० २३ ५४	० २३ ५४	० २१ ५	० १५ २८	० २७ ४३
द्रे	० ७ ३०	० ४ ५४	० ६ ५	० ६ ५	० ८ ५४	० १४ ३९	० २ १३	द्रे	० २२ ३०	० २५ ५	० २३ ५४	० २३ ५४	० २१ ५	० १५ २८	० २७ ४३
सप्तां०	० ७ ३०	० ४ ५४	० ६ ५	० ६ ५	० ८ ५४	० १४ ३९	० २ १३	सप्तां०	० २२ ३०	० २५ ५	० २३ ५४	० २३ ५४	० २१ ५	० १५ २८	० २७ ४३

1B. खेचरोच्चादि । 2B. निधेयम् । 3B. बन्धनीस्थः पाठो नास्ति । 4B. No ये । 5B. सति । 6B. No सप्तवर्गः । 7B. ज्ञेय । 8B. No अशुभैक्यं च । 9A. पृथक् पृथक् । 10B. ०भक्तेषु । 11B. No 'भ' । 12B. No वर्गेषु । 13B. ०संज्ञम अस्यार्धं । 14B. कोष्ठकेषु । 15B. षट्केषु । 16B. कृत ।

	र	चं	मं	बु	बृ	शु	श		र	चं	मं	बु	बृ	शु	श
नवां०	० ७ ३०	० ४ ५४	० ६ ५	० ६ ५	० ८ ५४	० १४ ३२	० २ १३	नवां०	० २२ ३०	० २५ ५	० २३ ५४	० २३ ५४	० २१ ५	० १५ २८	० २७ ४६
द्वाद०	० ७ ३०	० ४ ५४	० ६ ५	० ६ ५	० ८ ५४	० १४ ३२	० २ १३	द्वाद०	० २२ ३०	० २५ ५	० २३ ५४	० २३ ५४	० २१ ५	० १५ २८	० २७ ४६
त्रिं०	० ७ ३०	० ४ ५४	० ६ ५	० ६ ५	० ८ ५४	० १४ ३२	० २ १३	त्रिं०	० २२ ३०	० २५ ५	० २३ ५४	० २३ ५४	० २१ ५	० १५ ८२	० २७ ४६

अथ शुभाशुभयोः स्फुटीकरणमुपजातिकाद्वयेनाह[1] ।—

राशीश्वरस्यापि फले तथैव स्वोच्चादिके सप्तगणप्रसूते ।
शुभाशुभाख्येऽथ तदीययुत्या संताडयेदादिमकोष्ठकस्थे ॥१२॥
उभे फले पूर्वनिवेशिते ये कर्मक्रमः शेषगणेऽपि चैवम् ।
होरादिके स्वेश्वरजैः फलैश्च पुनश्च हन्यात् सकलानि तानि[2] ॥१३॥

व्याख्या ।—यथा ग्रहस्य स्वोच्चादिके सप्तवर्गेषु शुभाशुभाख्ये साधिते तथैव ग्रहो यस्मिन् राशावस्ति तद्राशीश्वरस्यापि स्वोच्चादिके सप्तगणप्रसूते शुभाशुभाख्ये फले साधयेत् । अथ आदिमकोष्ठक[3]स्थे[4] पूर्वनिवेशिते पूर्वस्थापिते उभे फले शुभाशुभे तदीययुत्या राशीश्वरस्य शुभयोगेन अशुभयोगेन च[5] संताडयेत् गुणयेदित्यर्थः[6] । यथात्र रविर्वृश्चिके[7] अस्तीति राशीशो भौमः तस्य शुभयुतिः[8] ०।४८।४५ स्फुटीकरणार्थं पूर्वनिवेशितं गृहे[9] शुभं ०।१५।० युत्या गुणितं ०।१७।११[10] गृहस्थाने लिखेत् । एवं राशीश्वरस्य भौमस्य[11] अशुभयुतिः ३।११।१५ पूर्वनिवेशितं रवेः गृहाशुभं ०।४५।० अशुभयुत्या गुणितं २।२६।२३[12] अशुभपंक्तौ गृहस्थाने लिखेत् [एवमन्यमपि । अथ होरादिके शेषगणेऽपि स्वेश्वरजैः फलैरेवं कर्मक्रमः[13]] । एतदुक्तं भवति । रविर्यस्य[14] होरायामस्ति तस्य[15] होराया अधिपस्य शुभयुत्या होरास्थं शुभं गुणनीयम् अशुभयुत्या होरास्थ[16]मशुभं गुण[17]नीयम् । एवं द्रेष्काणादिष्वपि[18] ॥१२-१३ ॥

1B. ०कयाह । 2.B-पुस्तके श्लोकद्वयस्थाने "राशीश्वरस्येति ॥१२" इति पाठः । 3B. No क । 4B. अतः परं "गृहकोष्ठकस्थे" इत्यधिकम् । 5B. No च । 6A. No गुणयेदित्यर्थः । 7B. ०कराशौ । 8B. युक्ता । 9A. गृहं । 10B. ०।१२।१८ । 11B. No भौमस्य । 12B. २।२३।२६ । 13A. बन्धनीस्थः पाठो नास्ति । 14B. ०र्यस्यां । 15B. तस्या । 16B. होरास्थित० । 17B. गण० । 18A. अतः परं "पुनश्च हन्यादिति" इत्यधिकः पाठः ।

अथ[1]तयोः शुभाशुभयोः पुनः स्फुटी[2]करणमाहोपजातिकया ।—

वर्गेश-तत्स्थ[3]ग्रहवीर्यघातमूलेन राश्यादिकवर्गजानाम् ।
इत्थं[4] बलानां भवति स्फुटत्वं शुभाशुभानां मुनिसंमतं हि ॥१४॥

व्याख्या :—वर्गेशतत्स्थग्रहवीर्यघातमूलेन सकलानि तानि पुनश्च हन्यात् इति पूर्वश्लोकस्थेनान्वयः । वर्गेशो गृहादिस्वामी तत्र वर्गे तिष्ठतीति तत्स्थः यस्य शुभाशुभं[5] साध्यते स इत्यर्थः । तयोर्द्वयोर्य[6] वीर्यं शुभसाधने इष्ट[गुणषड्बलैक्ये, अशुभसाधने तु कष्टगुणषड्बलैक्ये तयोर्यो घातः एकेन अपरस्य[7]] गुणनं तस्य मूलेन तानि सकलानि यानि पूर्वगुणितानि शुभाशुभानि तानि पुनश्च भूयोऽपि गुणयेत् । इत्थं कृते राश्यादिकवर्गजानां शुभाशुभानां[8] बलानां मुनिसंमतं स्फुटत्वं भवतीति[9] । अस्योदाहरणम् । रवेः शुभसाधने रविः तत्स्थग्रहः । तस्येष्टं[10] गुणबलं [०।५३।२७ ; रविर्वृश्चिकेऽस्ति इति गृहेशो भौमः स च वर्गेशः तस्येष्टगुणबलं[11]] १।३१।४९[12] अनयोर्घातः । १।२१।४७ सूक्ष्ममूलार्थं वारद्वयं षष्ट्या सवर्णितं ४९०७, अस्य मूलं ७०।१६ षष्टिभक्तं जातं सूक्ष्ममलं १।१०।१६[13] पूर्वयुत्या गुणितं[14] रवेर्गृह[15] शुभं ०।१२।११ । पुनर्मलेन गुणितं जातं स्फुटं गृहे[16] शुभबलं ०।१४।१६ । एवं होरादि[17]बलान्यपि स्फुटानि कार्याणि । एवमशुभबलान्यपि साध्यानि ॥१४॥

इति श्रीवल्लालदैवज्ञात्मज-श्रीकृष्णदैवज्ञविरचिते श्रीपतिभट्टीयजातकपद्धत्युदाहरणे
इष्टकष्टसप्तवर्गज[18]शुभाशुभबलसाधनोदाहरणम् ॥४॥

शुभबलानि

	र	चं	मं	बु	बृ	शु	श
गृ	० १४ १६	० ५ ४१	० २४ ५१	० २६ २५	० २१ १	० २२ २४	० ५ ९
हो	० ६ ४०	० ३ ३३	० ६ ५	० ११ ४७	० ७ २२	० १८ ५६	० २ ३७
द्रे:	० ७ २२	० २० २१	० १२ २५	० १२ ५३	० १३ ७	० ४१ १२	० २ २४

अशुभबलानि

	र	चं	मं	बु	बृ	शु	श
गृ	८ २८ २४	१ ४६ ३०	७ ५४ २८	९ २२ ३५	८ ५४ १५	३ १७ २	७ १ ३७
हो	४ ३८ ५७	० ४८ ४९	१ २ ६	४ २८ ५५	५ २४ ४५	२ ४८ ५९	४ १६ १८
द्रे:	० ४२ ५२	१ २५ ३	२ ५७ ८	४ ४४ ५७	१ २६ ४	१ २८ ३०	३ ३० ४८

1B. अथ । 2B. स्पष्टी० । 3B. तस्य । 4B. इष्टं । 5B. शुभाद्वाशुभं । 6A. No 'ये' । 7B. बन्धनीस्थः पाठो नास्ति । 8B. No शुभाशुभानां । 9B. No इति । 10B. तस्येष्ट० । 11A. बन्धनीस्थः पाठो नास्ति । 12B. ३९ 13B. १८ । 14B. गुणित । 15B. ०ग्रंहः । 16B. गृह । 17B. No आदि । 18B. सप्तकवर्ग ।

	र	चं	मं	बु	बृ	शु	श		र	चं	मं	बु	बृ	शु	श
	०	०	०	०	०	०	०		४	१	१	३	४	१	३
स	२१	४	१७	४	१०	४१	२	स	३०	२०	५८	५९	२०	३८	३०
	२०	४५	१८	१२	३०	१२	३४		४८	५७	३१	२६	१	३०	४८
	०	०	०	०	०	०	०		५	१	४	४	५	२	३
न	६	१४	१२	१९	८	१०	२	न	५	२०	२७	१२	२५	२८	३०
	७	३	४८	४२	७	४९	३४		५	६	५	५८	३८	४४	४८
	०	०	०	०	०	०	०		२	१	४	४	२	२	२
द्वा	१८	२०	१२	१२	१	१७	८	द्वा	४८	२५	२७	४४	५७	२८	२९
	५६	११	४८	५३	४	३८	२२		५९	३	५	४७	३५	४४	२३
	०	०	०	०	०	०	०		५	१	३	३	४	२	३
त्रिं	६	२०	१२	४	१०	१७	२	त्रिं	५	२५	५७	४९	२७	२८	३
	७	११	२५	१३	३०	३८	३४		५	३	८	२६	२६	४४	४८

अथ गुणितशुभाशुभानां न्यासः*

शुभानां न्यासः 						अशुभानां न्यासः

श्री	र	चं	मं	बु	बृ	शु	श	श्री	र	चं	मं	बु	बृ	शु	श
	०	०	०	०	०	०	०		२	२	२	२	१	०	१
गृ	१२	११	३	१४	१४	५६	३	गृ	२३	४३	३४	१४	१५	३	५७
	११	३	५३	४८	२८	१९	३७		२५	४८	२४	२८	२७	४४	५
	०	०	०	०	०	०	०		१	२	१	०	१	०	०
हो	७	३	३	६	८	१४	२	हो	७	२३	१९	११	३	४६	२३
	३०	१३	५९	५	५४	३२	१२		३०	५२	५५	१२	१५	२४	१८
	०	०	०	०	०	०	०		०	१	१	१	५	०	०
द्रे	८	३	४	७	५	२८	११	द्रे	८	१९	१६	७	१०	३१	२९
	५४	५९	५६	१३	५०	९	४८		५४	५७	१०	३०	३०	५४	३२
	०	०	०	०	०	०	०		१	१	०	१	१	०	०
स	६	१	९१	१	७	२८	१	स	११	३२	३९	२८	७	३१	३९
	३६	२७	४७	४८	१४	९	४८		४२	५३	१७	३०	१२	५४	३२
	०	०	०	०	०	०	०		१	१	०	१	०	०	१
न	८	३	११	११	१०	७	१	न	३	१२	७	१६	५९	४९	२८
	५४	५९	४७	५३	३२	१४	४८		१९	५७	१२	१०	१९	१८	३२

* अयं कोष्ठः A-पुस्तके नास्ति ।

	र	चं	मं	बु	बृ	शु	श		र	चं	मं	बु	बृ	शु	श
द्वा	० १४ ३२	० ३ ५९	० ११ ४७	० ७ १३	० ७ १३	० ११ ४८	० ४ १७	द्वा	० ५६ २४	१ १९ ५७	० ७ १३	१ ७ १४	० ४३ २४	० ४६ १८	० २७ १६
त्रिं	० ८ ५४	० ३ ५९	० ४ ५६	० १ ४८	० ७ १४	० ११ ४८	० १ ४८	त्रिं	० ३ १७	१ १९ ७५	१ १६ १०	१ २८ ३०	१ ७ १२	० ४९ १८	१ २८ ३२

पञ्चमम् आयुर्दायोदाहरणम्

अथ प्रयोजनकथनपूर्वकमायुर्दायकथनमिन्द्रवज्रया प्रतिजानीते ।—

आयुर्ज्ञानादेव होराफलानां कर्तुं यस्मान्निर्णयः शक्यतेऽत्र[1] ।
आयुर्दायः संप्रदायागतोऽयं[2] सच्छिष्याणां प्रीतये कथ्यतेऽत्र ॥१॥

व्याख्या ।—अतः कारणात् अयम् आयुर्दायः [सच्छिष्याणां सन्तः शिष्या[3]]स्तेषां प्रीतये अत्र पद्धतौ कथ्यते । कीदृशोऽयम् ? संप्रदायागतः ब्रह्मवशिष्ठादिगुरूपदेशपरंपरया ज्ञातः । सच्छिष्याणामिति वदता दुष्टशिष्येभ्योऽयमायुर्दायो नोपदेश्य इत्युक्तं भवति । तस्मात् कस्मात् ? यस्मात् कारणात् होराफलानां जातकोक्तशुभाशुभानां निर्णयः आयुर्ज्ञानादेव कर्तुं शक्यते नान्यथा । एतदुक्तं भवति । जातस्य नरस्य शुभाशुभफलज्ञापनाय जातकशास्त्रप्रवृत्तिः । तत्रायुषोऽभावे[4] शुभमशुभं वा फलं कस्य भवेत् । अतः आयुर्ज्ञानमावश्यकं तस्मात् तत् कथ्यत इति ॥१॥

तत्रायुर्दायो द्विविधः । ग्रहयोगजो गणितश्च । ग्रहयोगजस्त्रिविधः नियतायुर्दायः १ परमायुर्दायः २ अमितायुर्दायश्च ३। स चोक्तोऽस्ति जातकफलग्रन्थेषु । अथ गणितागत[5]श्चतुर्विधः । अंशोद्भवः १, पिंडजः २, नैसर्गिकः ३, जीवशर्मोदितश्च ४ । तत्रांशोद्भवायुर्दायः कर्मयोग्यगुणकाधीनः । स च स्फुटगुणकाश्रयगुणकयोर्बधमुलं[6] । स्फुटगुणकास्तु[7] उच्चचेष्टागुणकयोर्वधमूलम् ॥ अतः प्रथमत उच्चचेष्टागुणकौ[8] स्फुटगुणकं च वसन्ततिलकोपजातिकाभ्यामाह[9] ॥—

---

1. अत्र 'अत' इति पाठष्टीकास्वरससिद्धः । 2B. ०ऽसौ । 3B. बन्धनीमध्ये "सन्तश्च ते शिष्याश्च सच्छिष्या" इति पाठः । 4B. ०युष्याभावे । 5B. गणित० । 6B. मूलं मूलं । 7B. ०गुणकोऽस्ति । 8B. अतः परं "तच्च" इत्यधिकम् 9B. ०जात्याह ।

एकोनदीधितिसमादिह गच्छतो यद् रूपादिरूपचयसंकलितं द्वयं स्यात् ।
चेष्टोच्चरश्मिजमथ स्वमरीचिभक्तं तज्जायतेऽत्र गुणक[1]द्वितयं तदाख्यम् ॥२॥
ऊने भवेतां निजदीधितिभ्यः श्रेढीफले ते यदि रूपयुक्ते ।
तदर्धिते स्वांशुभिरुद्धृते[2] ते[3] तद्घातमूलं गुणकः स्फुटः स्यात् ॥३॥

व्याख्या[4] ।—एकोनदीधितिसमात्[5] गच्छतः पदात्[6] चेष्टोच्चरश्मिजं रूपादिरूपचयसंकलितं द्वयं यत् स्यात् तत्[7] स्वमरीचिभक्तं[8] सत्[9] तदाख्यं गुणकद्वितयं चेष्टागुणक उच्चगुणकश्चेति द्वयं जायते । एतदुक्तं भवति । चेष्टारश्मयो रूपोनिताः पदं[10] कल्प्यं रूपमादिः रूपमेव चयश्चेति कल्प्यम्[11] । "सैकपद[12]घ्नपदार्ध[13]मथैकाद्यंकयुतिः किल संकलिताख्ये"ति प्रकारेण संकलितं साध्यं तत्[14] चेष्टारश्मिभक्तं सत् चेष्टागुणको भवति । [एवं रूपोनितोच्चरश्मिभ्यः संकलितं कृत्वा उच्चरश्मिभिर्भक्तं लब्धमुच्चगुणको भवति ।[15]] किंतु एवं तदैव कार्यं यदा संकलितं रश्मिभ्यो न्यूनं न भवति । यदि तु संकलितं रश्मिभ्यो न्यूनं भवति तदा कथमुच्चचेष्टागुणकौ कार्याविस्याह । ऊने भवेतामिति । ते श्रेढीफले संकलिते निजदीधितिभ्यः स्वरश्मिभ्यो यदि न्यूने भवेतां तदा स्वांशुभिरुद्धृते स्वरश्मिभिर्भक्ते[16] रूपयुक्ते[17] अर्धिते च कार्ये, चेष्टोच्चगुणकौ स्तः । एतदुक्तं भवति । यदि संकलितं रश्मिभ्यो न्यूनं भवति तदापि स्वमरीचिभिर्भक्तमिति प्राग्वदेव[18] चेष्टागुणका[19] उच्चगुणको वा साध्यः किन्तु रूपयुक्तोऽर्धितश्च कार्य इति विशेषः । अत्र केचित् । श्रेढीफले रूपयुक्ते[20] अर्धिते स्वांशुभिरुद्धृते[21] इति पाठक्रमेणार्थक्रमं बुद्ध्वा[22] अनुपातावुद्धिमान्[23] शक्य* रूपयुक्ते[24] इति स्थाने रश्मियुक्ते इति पठन्ति । [25]अस्योदाहरणम् । अत्र[26] रवेरुच्चरश्मयः २।१४।३९ एकोनदीधितिसमाद् गच्छत इति जातो गच्छः १।१४।३९ अस्यैव नामान्तरं पदमिति । सैकपदघ्नेत्यादिनास्य[27] संकलितं साध्यते । तत्र सैकपदं २।१४।३९ पदं १।१४।३९ इदं सैकपदेन गुणितं २।४७।३१[28] अस्यार्धं १।२३।४५ जातं संकलितं[29] रश्मिभ्यो न्यूनमस्ति अत "ऊने भवेतां निजदीधितिभ्य" इत्युक्तत्वादिदं स्वांशुभिरेतैः २।१४।३९ भक्तं ०।३७।१९ रूपयुक्तम् १।३७।१९ अर्धितं च ०।४८।४० [जातो रवेरुच्चगुणकः । ०।४८।४० ; रश्मियुक्त इति पाठे अयमेव गुणको भवति । यथात्र

1B. गुणकं । 2A. ०द्धृतः । 3A. ०च । 4B. No व्याख्या । 5B. सम । 6B. पादात् ; A अतः परं 'ये' इत्यधिकम् । 7A. ततः । 8A. भक्तः । 9A. सन् । 10B. पादं । 11B. प्रकल्प्य । 12B. पाद । 13B. पादार्ध० । 14A. तावत् । 15B. बन्धनीमध्यस्थः पाठो नास्ति । 16B. ०श्चक्रे । 17B. No रूपयुक्ते । 18B. प्रागेव । 19B. No गुणक । 20B. No रूपयुक्ते । 21B. 'ते' इत्यधिकम् । 22B. णानुक्रमबुद्ध्या । 23B. शुद्धिमां शुधिर्मा । 24B. शक्यरूपयुक्तं । 25B. इतः प्राक् 'अथ' इत्यधिकम् । 26B. तत्र । 27B. No अस्य । 28B. २९ । 29B. इतः परम् 'अतः संकलित' इत्यधिकम् ।

* अत्र 'अनुपाताशुद्धिमाशंक्य' इति भवेत् ।

श्रेढीफलं १।१३।४५ रश्मिभिः २।१४।३९ युक्तं ३।२८।२४ अर्धितं १।४४।१२ स्वांशुभिः २।१४।३९ उद्धृतं लब्धमुच्चगुणकः स एव ०।४८।४०[1]] । अथ यत्र संकलितं[2] रश्मिभ्योऽधिकं भवति तत्रो[3]दाहरणम् । तत्र चन्द्रस्योच्चरश्मयः ६।४५।१७ एते एकोनाः पदं ५।४५।१७ सैकपदेन ६।४५।१७ गुणितं ३८।५२।१७ अस्यार्धं १९।।२६।९ जातं संकलितम्, इदं रश्मिभ्यो न्यूनं नास्ति अत "ऊने भवेतां निजदीधितिभ्य" इत्यस्य विषयो नास्ति । किंतु संकलितं[4] १९।२६।९ स्वमरीचि[5] ६।४५।१७ भक्तमिति कृते लब्धमुच्चगुणकश्चन्द्रस्य २।५२।३८ । अथात्र सुगमोपायः ।

अल्पाश्चेत् किरणाः सैकाश्चतुर्भक्ता भवेद् गुणः[6] ।
अधिकाश्चेन्निरेकास्ते दलिता गुणको भवेत् ।।

यथात्र[7]रवेरुच्चरश्मयः २।१४।३९ अल्पाः सन्ति अतः सैकाः ३[8]।१४।३९ चतुर्भक्ता लब्धमुच्चगुणकः स एव ०।४८[9]।४० ;तथा चन्द्रस्योच्चरश्मयः ६।४५।१७, एते अधिकाः सन्ति अतो निरेकाः ५।४५।१७ दलिता २।५२।३८ जातः स एव चन्द्रोच्चगुणकः २।५२।३८ ;एवं जाता रव्यादीनामुच्चगुणकाश्चेष्टागुणकाश्च[10] लिख्यन्ते ।

र	चं	मं	बु	बृ	शु	श		र	चं	मं	बु	बृ	शु	श
०	२	०	१	०	०	०		०	२	१	१	०	२	२
४८	५२	५०	३६	४८	३३	३८		४२	५३	२६	४२	३६	३४	१९
४०	३८	३७	३६	१८	१७	३२		४३	२	२७	५६	३५	२	४२

[अथ स्फुटगुणकमाह[11]] तद्घातमूलं गुणकः स्फुटः स्यादिति । तयोः उच्च[12]चेष्टागुणकयोर्घातस्य[13] मूलं स्फुटगुणकः स्यात् । यथात्र[14] रवेरुच्चगुणकः[15] ०।४८।४० । रवेश्चेष्टागुणकः ०।४२।४३ अनयोर्घातः ०।३४।३९ अस्य मूलं ०।४५।३६ जातो रवेः स्फुटगुणकः [०।४५।३६[16]] । एवमेव सर्वेषां जाताः स्फुटगुणका लिख्यन्ते ।।२-३।।

र	चं	मं	बु	बृ	शु	श	
०	२	१	१	०	१	१	स्फुट
४५	५२	६	३९	४२	११	१३	गण
३६	५०	९	५२	०	३६	३२	काः

1B. बन्धनीमध्ये "रश्मियुक्ते इति पाठोऽपि" इतिमात्रः पाठः । 2B. संकलित । 3B. अत्रो० । 4B. संकलितमेव । 5B. ०चिभ्यः । 6B. ०गुणकः । 7A. यत्र । 8B. २ । 9B. ४४ । 10B. No च । 11A. बन्धनीमध्ये "चेष्टागुणकः" इति पाठः । 12B. उच्चगुणक० । 13B. ०र्घातस्तस्य । 14B. No अत्र । 15B. गुणकं । 16B. बन्धनीमध्यस्थः पाठो नास्ति ।

एवं [कर्मयोग्यगुणकार्थं स्फुटगुणकम्[1]] उक्त्वा तदर्थमेवाश्रयगुणकमपि[2] श्लोकाष्टकेन निरूपयंस्तावत् सिंहोद्धताद्वयेन सप्तवर्गजगुणानाह[3] ।।---

वर्गोत्तमे स्वभवने स्वनवांशके च स्वत्र्यंशके च गुणको द्वितयं निरुक्तम्[4] ।
अध्यर्धरूप ३/२ मधिमित्रगृहे सुहृद्भे सत्र्यंशकं ४/३ समगृहे खलु रूपमेकम् ।।४।।
त्र्यंशोनितं २/३ रिपुगृहेऽध्यरिभे दलं १/२ स्यादेभ्यो गुणो भवति यः खलु कश्चिदेकः ।
वेदो४द्धृतः सगुणको[5] गणकैः प्रदिष्टो होरादिवर्गगुणकस्तु भवेत्तदर्धम् ।।५।।

व्याख्या ।—"वर्गोत्तमे वा[6] स्वभवने वा स्वनवांशके वा स्वत्र्यंशके वा ग्रहे सति गुणको द्वितयं निरुक्तं द्वयं गुणको भवतीत्यर्थः । तत्र वर्गोत्तमा उक्ता लघुजातके । "वर्गोत्तमा नवांशाश्चरादिषु[7] प्रथम-मध्यांत्याः ।" चरराशौ प्रथम-नवांशो वर्गोत्तमः, स्थिरराशौ पञ्चम-नवांशो वर्गोत्तमः, द्विस्वभावराशौ नवम[8]नवांशो वर्गोत्तमः इत्यर्थः[9] । स्वभवने स्वराशौ स्वनवांशे[10] स्वत्र्यंशके[11] स्वद्रेष्काणे[12] एतच्चतुष्टयमध्ये यदि[13] एकस्मिन्नपि ग्रहो भवति तर्हि तस्य ग्रहस्य द्वयं २ गुणको भवेदि[14]त्यर्थः । अथ यदि उक्त-चतुष्टयमध्ये कुत्रापि ग्रहो नास्ति तदा अधिमित्रादीनां मध्ये कस्य गृहेऽस्तीति विचार्यम् । तत्र अधिमित्रगृहे सति अध्यर्धं[15] रूपं सार्धरूपं त्रयाणा[16]मर्धमिति यावत् ३/२ गुणको भवति । सुहृद्भे[17]मित्रराशौ सति सत्र्यंशकं[18]रूपं चतुर्णां त्र्यंशः ४/३ गुणको भवति[19] । समगृहे सति[20] रूपं १ गुणको भवति । रिपुगृहे सति त्र्यंशोनितं रूपद्वयस्य त्र्यंशः २/३ गुणको भवति । अध्यरिभे[21] अधिशत्रुगृहे[22] सति बलम् एकस्यार्धं[23] गुणको भवति । अत्र अधस्थानांकस्य छेद इति नाम । अथोक्तगुणकानां मध्ये यः कश्चिद् गुणको भवति सः वेदो४द्धृतश्चतुर्भक्तः सन् गणकैर्भगुणको गृहगुणको निरुक्तः । तु पुनः तदर्धं भगुणक[24]स्यार्धं होरादिवर्गगुणको भवेत् । अत्र सर्वत्र भाजकस्तले[25] लिख्यते । यत्र भाजकं द्वयं भवति, तत्र भाजकवधे कृते भाजको भवति । यथा वर्गोत्तमादिचतुष्टये गुणकः २ अयं चतुर्भक्तो २/४[26] जातो राशिगुणक. । अधिमित्रगृहे गुणकः[27] ३/२ [अयं चतुर्भक्तो जातो राशिगुणकः ३ एवमन्यत्रापि । राशिगुणकस्यार्धं होरादिगुणको भवति । अत्रार्धकरणे ऊर्ध्वांकस्य अर्धं कार्यं[28]] यत्र ऊर्ध्वांको विषमो भवति तत्र अधस्थानांको द्विगुणः कार्यः । यथा वर्गोत्तमादिचतुष्टये राशिगुणकः ५/४ अस्यार्धं ५/८

1B. बन्धनीमध्यस्थः पाठो नास्ति । 2B. ०कानपि । 3B. ०गुणकमाह । 4B. निरुक्तः । 5B. सभगणो । 6A. No वा । 7B. ०शा होरादिषु । 8B. नवमो । 9A. No इत्यर्थः । 10B. ०वांशके । 11B. ०त्र्यंशे । 12B. ०दृक्काणे । 13A. No यदि । 14B. भवती० । 15B. ०ध्यर्धः । 16A. सार्धत्रयरूपाणा० । 17B. सुहृद्गृहे । 18A. ०शक । 19B. अतः परम् 'इति' इत्यधिकम् । 20A. अतः परम् 'एकम्' इत्यधिकम् । 21B. No अध्यरिभे । 22B. गेहे । 23A. अतः परम् '१' इत्यधिकम् । 24B. तस्य गुणक० । 25B. भाजकस्तत् । 26B. २ । 27B. गुणकः तस्य अर्धं कार्यम् इति पाठः । 28B. बन्धनीमध्यस्थः पाठो नास्ति ।

होरादिगुणकः $\frac{३}{८}$ [अधिमित्रगृहे राशिगुणकः $\frac{३}{८}$[1]] अस्यार्धं ३ होरादिगुणकः। एवमन्यत्रापि। अथा[2]स्योदाहरणम्। अत्र रविर्वर्गोत्तमादिचतुष्टये नास्ति। अधिमित्रगृहेऽस्ति अतोऽध्यर्धरूपं $\frac{३}{२}$[3] जातो गुणकः। अयं वेदोद्धृतो जातो राशिगुणकः $\frac{३}{८}$ अस्यार्धं जातो होरादिगुणकः $\frac{३}{४}$ एवं जाता रवेः सप्तवर्गजगुणाः[4]। चन्द्रोऽपि वर्गोत्तमादिचतुष्टये नास्ति शत्रुगृहेऽस्ति। अतः त्र्यंशोनितं रूपं $\frac{२}{३}$ गुणकः। अयं वेदोद्धृतो जातो [राशिगुणकः $\frac{२}{१२}$ अस्यार्धं होरादिगुणकः $\frac{१}{१२}$। भौमोऽपि वर्गोत्तमादिचतुष्टये नास्ति समगृहेऽस्ति अतो रूपं गुणः $\frac{१}{१}$ अयं वेदोद्धृतः[5]] राशिगुणः[6] $\frac{१}{४}$ अस्यार्धं $\frac{१}{८}$[7] होरादिगुणकः[8]

गृह	हो	द्रे	स	न	द्रा	त्रिं
$\frac{३}{८}$	$\frac{३}{१६}$	$\frac{३}{१६}$	$\frac{३}{१६}$	$\frac{३}{१६}$	$\frac{३}{१६}$	$\frac{३}{१६}$

बुधो वर्गोत्तमादिचतुष्टयमध्ये स्वनवांशेऽस्ति अतो जातो गुणः[9] $\frac{२}{१}$. अयं वेदोद्धृतो राशिगुणः[10] $\frac{२}{४}$ अस्यार्धं होरादिगुणकः $\frac{१}{४}$। गुरुरपि स्वनवांशेऽस्ति अत उक्तवज्जातो राशिगुणः[11] $\frac{२}{४}$ होरादिगुणकश्च $\frac{२}{४}$। शुक्रोऽपि[12] वर्गोत्तमादिचतुष्टयमध्ये स्वगृहे स्वदृक्काणे[13] चास्ति अतो जातः स एव राशिगुणकः $\frac{२}{३}$ होरादिगुणकश्च $\frac{१}{४}$। शनिर्वर्गोत्तमेऽस्ति अतः स एव राशिगुणकः $\frac{२}{४}$ होरादिगुणकश्च $\frac{१}{४}$। एवं जाता गुणका लिख्यन्ते ॥४-५॥

र	चं	मं	बु	बृ	शु	श	
$\frac{३}{८}$	$\frac{२}{१२}$	$\frac{१}{४}$	$\frac{२}{४}$	$\frac{२}{४}$	$\frac{२}{४}$	$\frac{२}{४}$	गृह
$\frac{३}{१६}$	$\frac{१}{१२}$	$\frac{१}{८}$	$\frac{१}{४}$	$\frac{१}{४}$	$\frac{१}{४}$	$\frac{१}{४}$	होरा
$\frac{३}{१६}$	$\frac{१}{१२}$	$\frac{१}{८}$	$\frac{१}{४}$	$\frac{१}{४}$	$\frac{१}{४}$	$\frac{१}{४}$	द्रे
$\frac{३}{१६}$	$\frac{१}{१२}$	$\frac{१}{८}$	$\frac{१}{४}$	$\frac{१}{४}$	$\frac{१}{४}$	$\frac{१}{४}$	सप्तांश
$\frac{३}{१६}$	$\frac{१}{१२}$	$\frac{१}{८}$	$\frac{१}{४}$	$\frac{१}{४}$	$\frac{१}{४}$	$\frac{१}{४}$	नवां०

1A. बन्धनीमध्यस्थः पाठो नास्ति। 2B. No अथ। 3B. ०ध्यर्धरूपादि। 4B. ०गुणकाः। 5B. बन्धनीमध्ये '१२।४' इत्यङ्कमात्रम्। 6B. ०णकः। 7B. अङ्कभागो नास्ति। 8B. '१।८' इत्यधिकम्। 9B. गुणकः। 10B. जातो रश्मिगुणकः। 11B. गुणकः। 12B. No अपि। 13B. स्वदृक्काणके स्वत्रिंशे।

र	चं	मं	बु	बृ	शु	श	
३/१६	२/१२	१/८	१/४	१/४	१/४	१/४	द्वाद०
३/१६	२/१२	१/८	१/४	१/४	१/४	१/४	त्रिंशां

[यद्यप्येते गुणका भवन्ति तथापि वक्ष्यमाणगुणकानामेते गुण्या[1]] इत्युपजाति-कार्धेनाह ।—

एतेऽपि गुण्या गदिता महद्भिरपेक्षयाऽनन्तर-ताडकानाम् ।

अनन्तर-ताडकानां "गृहादिके वर्गगणे स्वकीये" इत्यादिवक्ष्यमाणगुणकानामपेक्षया एतेऽपि सप्तवर्गजगुणका अपि गुण्या महद्भिर्गदिताः । "गृहादिके वर्गगणे स्वकीये द्विको गुण" इत्यादिवक्ष्यमाणगुणकः सप्तवर्गजगुणा गुणनीया इत्यर्थः ॥

अथ प्रथमं ताव[2]द्राशिगुणकस्यैव विशेषमाह सार्धोपजातिका[3]द्वयेन ॥—

नगांशका रुद्रमिता११ ह्यधीष्टराशौ सुहृद्वेश्मनि मूर्छनांशाः ॥६॥
नवाश्विनो२९रूप१मुदासराशौ कु-द्वंद्रशका विश्वमिता १३/२१ द्विषद्भे ।
त्रयो नगांशा ३/७ अधि[4] शत्रुराशावेते भसंज्ञा अथ[5] राशिवर्जम् ॥७॥
वर्गोत्तमात्मीय-नवांश-दृक्कस्थिते ग्रहे तु द्वितयं गुणश्चेत्[6] ।
एतैरधीष्टादिगुणैर्निहन्यादुदीरितं राशिगुणं पुनस्तम् ॥८॥

व्याख्या ।—एते भसंज्ञा भवन्ति । राशिगुणकमात्रोपयुक्तत्वादेतेषां राशिसंज्ञा कृता । एते के इत्याह । नगांशका इत्यादिना । अधीष्टराशौ अधिमित्रगृहे रुद्रमिता नगांशा ११/७ । सुहृद्वेश्मनि मित्रगृहे नवाश्विनः एकोनत्रिंशत् मूर्छनांशाः एकविंशांशाः २९/२१ । उदासराशौ समराशौ रूपं १ ; द्विषद्भे शत्रुगृहे विश्वमितास्त्रयोदश कुद्वंद्रशका एकविंशांशाः १३/२१ । अधिशत्रुराशौ त्रयो नगांशाः त्रयः सप्तमांशाः ३/७ । अथ भसंज्ञानामेतेषाम्[7] उपयोगमाह— अथ राशिवर्जमिति । अथ राशिवर्जं वर्गोत्तमात्मीयनवांशदृक्कस्थिते ग्रहे सति चेत् द्वितयं गुणोऽस्ति तदा तम् उदीरितं राशिगुणं "वेदोद्धृतो भगुणक" इति प्रागुक्तं राशिगुणम्, एतैरधीष्टादिगुणैः अधिमित्रादिगुणैः निहन्यात् गुणयेत्[8] । एतदुक्तं भवति । ग्रहो यदि स्वराशौ न भवति किं तु अधिमित्रादिगृहस्थितो भवति । अथ तादृशस्य ग्रहस्य वर्गोत्तमनिमित्तं स्वद्रेष्काणनिमित्तं स्वनवांशनिमित्तं वा[9] यदि द्वितयं गुणको[10]ऽस्ति तदा "वेदोद्धृतो भगुणक"

1B. बन्धनीमध्ये "यद्यपि एते गुणकानामन्ते गुण्याः" इति पाठः । 2B. No तावत् । 3B. ०जातिक । 4B. ह्यधि० । 5B. निज । 6B. गुणश्च । 7B. अतः परम् 'अङ्कानाम्' इत्यधिकम् । 8A. No गुणयेत् । 9B. वरं । 10B. गुणो० ।

इति तदुत्पन्नस्य राशिगुणस्यायं विशेषः। स यथा। यस्य ग्रहस्य पूर्वं द्वितयं गुण उत्पन्नः स यदि अधिमित्रगृहेऽस्ति तदा तस्य राशिगुणः रुद्रमितैर्नगांशै ११/७ र्गुणनीयः। राशिगुणस्य ऊर्ध्वांकः एकादशभिर्गुण्यः अधस्थानांकः सप्तभिर्गुणनीयः[1] इत्यर्थः। एवं स ग्रहो यदि मित्रगृहेऽस्ति तदा नवाश्विभिर्मूर्छनांशैः २९/२१ राशिगुणको गुणनीयः। राशिगुणस्योर्ध्वाङ्क एकोनत्रिंशद्गुणः कार्यः, अधस्थानांकः[2] एकविंशतिगुणः कार्यः। एवं स ग्रहो यदि समगृहेऽस्ति तदा [रूपगुणकः यथास्थित एव राशिगुणक इत्यर्थः। एवं स यदि शत्रुगृहेऽस्ति तदा विश्वमितैः कुट्टंशकै १३/२१ राशिगुणको गुणनीयः ऊर्ध्वांकस्त्रयोदशगुणः अधस्थानांक एकविंशतिगुणः कार्यः। एवं स ग्रहो यदि [अधि] शत्रुगृहेऽस्ति तदा[3]] त्रिभिः सप्तांशैः[4] ३/७ राशिगुणको गुण्यः, ऊर्ध्वांकस्त्रि[5]गुणः अधस्थानांकः सप्तगुणः कार्य इत्यर्थः। अथा[6]स्योदाहरणम्[7]॥ अत्र "वर्गोत्तमे स्वभवने स्वनवांशके च[8] स्वत्र्यंशके च गुणको द्वितयं निरुक्त"मिति बुधगुरुशुक्र[9]-शनैश्चराणां द्वितयं गुणक उत्पन्नोऽस्ति। तत्र शुक्रस्तु[10] स्वगृहेऽस्ति अतो बुधगुरुशनीनामेव राशिगुणकस्य[11] विशेषः। अत्र बुधः शत्रुगृहेऽस्ति अतः 'कुट्टंशका विश्वमिता द्विषद्भे' इति जातो गुणकः १३/२१ बुधस्य राशिगुणोऽयं[12] २/४ अस्योर्ध्वांके[13] २ त्रयोदशगुणे २६। अधस्थानांके[14] ४ एकविंशतिगुण च ८४ जातो बुधस्य राशिगुणकः २६/८४। अथ गुरुरधिमित्रगृहेऽस्ति अतो नगांशका विश्वमिता [रुद्रमिता ?] गुणाः ११/७ गुरुराशिगुणस्य[15] २/४ ऊर्ध्वांके एका[16]दशगुणे अधस्थानांके सप्तगुणे च[17]जातो गुरो राशिगुणः[18] २२/२८। शनिरधिशत्रुगृहेऽस्ति अतस्त्रयो नगांशा गुणकः ३/७ शनिराशिगुणकस्य २/४ ऊर्ध्वांके त्रिगुणे अधस्थानांके सप्तगुणे च जातः शनिराशिगुणकः ६/२८। एवं राशिगुणकस्य संस्कारे कृते जातम् ॥८॥

	रं	चं	मं	बु	बृ	शु	श
मू	३/८	२/१२	१/४	२६/८४	२२/२८	२/४	६/२८
हो	३/१६	१/१२	१/८	१/४	१/४	१/४	१/४
द्रे	३/१६	१/१२	१/८	१/४	१/४	१/४	१/४

1B. सप्तगुणनीयम्। 2B. ०स्थानाम्। 3B. बन्धन्यन्तर्गतो भागो नास्ति। 4A. ०प्तमांशैः। 5B. ०त्रिंश २,० । 6B. No अथ। 7B. अतः परं 'लिख्यते' इत्यधिकम्। 8B. No च। 9B. No शुक्र। 10A. No तु। 11A. No ०स्य। 12B. ०णकोऽयं। 13B. ०र्ध्वांकैः। 14B. ०नाङ्कैः। 15B. ०णकस्य। 16A. त्रयो०। 17A. No च। 18B. ०णकः।

	र	चं	मं	बु	बृ	शु	श
स	३/१६	१/१२	१/८	१/४	१/४	१/४	१/४
न	३/१६	१/१२	१/८	१/४	१/४	१/४	१/४
द्वा	३/१६	१/१२	१/८	१/४	१/४	१/४	१/४
त्रिं	३/१६	१/१२	१/८	१/४	१/४	१/४	१/४

एवं स (?) यथा[1] संभवं राशिगुणस्य[2] विशेषमुक्त्वा[3] उपेन्द्रवज्रया [ह्युपजातिकार्धेन चानंतर[4]] ताडकानाह ।—

गृहादिके वर्गगणे स्वकाये द्विको गुणस्त्र्यंशविवर्जितः ५/३ सः ।
अधीष्टभे मित्रगृहे नवांशा विश्वे[5] च रूपं च समस्य गेहे ॥९॥
नवांशकाः पञ्च ५/९ त्रिरोधि[6]राशौ गुणांशकः ३ स्यादधिवैरिणो भे ।

व्याख्या । गृहादिके वर्गगणे स्वकीये सति द्विको गुणो भवति । अधीष्टभे सति त्र्यंशविवर्जितः सः द्विकः गुणो भवति ५/३ । मित्रभे सति विश्वे नवांशाः १३/९, समस्य गेहे सति [रूपं] १/१ [7] विरोधि[8]राशौ शत्रुभे[9] पंचनवांशकाः ५/९; अधिवैरिणः अधिशत्रोः भे सति गुणांशकः स्यात् १/३ [10] । इत्येवं सप्त[11]वर्गेषु अनंतरताडका भवन्ति । अस्योदाहरणम् । यथात्र रविरधिमित्रगृहेऽस्ति अतस्त्र्यंशविवर्जितः स[12] अधीष्टभे इति जातो गृहे अनंतरताडकः[13] ५/३ ; स्वीय[14]होरायामस्ति अतो [गृहादिके वर्गगणे स्वकीये द्विको गुण इति[15]] होरायां [जातोऽनन्तरताडकः २[16]] समस्य द्रेष्काणेऽस्ति अतो रूपं च समस्य गेहे [इति रूपमनन्तरताडकः १/१ ; मित्रसप्तांशेऽस्ति अतो मित्रगृहे नवांशा विश्व इति जातः

1B. No स यथा । 2B. ०गुणकस्य । 3B. विशेषे त्यक्त्वा । 4B. बन्धनीमध्ये "उपजात्याह । अर्धेन च अंतर" इति पाठः । पाठोऽयं विशृङ्खलः । नवमपद्यमुद्दिश्य उपेन्द्रवज्रयेति यदुक्तं तदपि प्रकृते न संवदति 'विश्वे च रूपम्' इत्यादिचतुर्थचरणस्य इन्द्रवज्रालक्षणाक्रान्ततया अस्याप्युपजात्यन्तःपातित्वस्य न्याय्यत्वात् । अतोऽत्र सार्धोपजातिकयाहेति युक्तः पाठः । 5B. अतः परं '१३।२' इत्यधिकम् । 6B. विरोधः । 7B. १ । 8B. विरोध० । 9B. अतः परं 'तत्र' इत्यधिकम् । 10B. -१/३ ° । 11B. सप्तसु । 12A. No सः । 13B. अतः परम् 'स्यात्' इत्यधिकम् । 14B. गृहादिके वर्गगणेति रविः स्व० । 15B. बन्धनीमध्यस्थः पाठो नास्ति । 16B. बन्धनीमध्ये 'द्विकगणः शोध्यः' इति पाठः ।

सप्तांशानन्तरताडकः $\frac{१३}{९}$; स समस्यैव नवांशक-द्वादशांश-त्रिंशांशे[ष्व]स्ति अतो रूपञ्च समस्य[1]] इति नवांशादिषु जातोऽनन्तरताडकः $\frac{१}{१}$। एवं रवेः सप्तवर्गेषु जाता अनंतरताडका लिख्यन्ते[2]।

गृ	हो	द्रे:	स	न	द्वा	त्रि
५	२	१	१३	१	१	१
३	१	१	९	१	१	१

अथा[3]नन्तरताडककृत्यमाश्रयगुणं[4] कर्मयोग्यगुणं च उपजातिकोत्तरार्धेन [सार्धोपजातिकया] चा[5]ह ॥—

पूर्वं भपूर्वा गुणका य उक्ता वर्गेषु सप्तस्विह गुण्यसंज्ञाः ॥१०॥

गुण्या गुणैः स्वैरधिकारलब्धैरुक्तगुणः स्यादधिमिश्रितै[6]स्तैः।

स्मृतो बुधराश्रयसंज्ञितो यस्तस्य स्फुटस्यापि वधो भवेद् यः॥११॥

तद्वर्गमूलं खलु कर्मयोग्यम् आयुर्विधाने गुणकार[7] उक्तः।

व्याख्या। पूर्वं

"वर्गोत्तमे स्वभवने स्वनवांशके च स्वत्रंशके च गुणको द्वितयं निरुक्तम्"।

इत्यादिना सप्तसु वर्गेषु[8] ये[9] भपूर्वा गुणका राशिगुणकपूर्वकं गुणका उक्तास्ते इह कर्मणि गुण्यसंज्ञा ज्ञेयाः। अथ "गृहादिके वर्गगणे स्वकीये द्विको गुण" इत्यादिना इदानी-[10]मुक्तैरधिकारलब्धैः स्वस्वाधिकारप्राप्तैः स्वैर्गुणैरनन्तरताडकैस्ते[11] गुण्या[12] गुणनीयाः[13]॥

अस्योदाहरणम्। यथात्र[14] रवेः पूर्वो गृहगुणकः $\frac{३}{८}$[15], इदानीं गृहेऽनन्तरताडकः $\frac{५}{३}$ ऊर्ध्वांकेन ५[16] ऊर्ध्वांके ३[17] गुणिते १५, अधस्थानांकेन ३ अधस्थांके ८[18] गुणिते २४ जातो गृहगुणकः $\frac{१५}{२४}$। एवं होरास्थः पूर्वगुणको $\frac{३}{१६}$ होरास्थेनानंतरताडकेन $\frac{२}{१}$ गुणितो जातो होरागुणकः $\frac{६}{१६}$। [एवं द्रेष्काणस्थः पूर्वगुणो $\frac{३}{१६}$ द्रेष्काणस्थेन अनन्तरताडकेन $\frac{१}{१}$ गुणितो जातो द्रेष्काणगुणः $\frac{३}{१६}$[10]] एवं सप्तांशस्थः पूर्वगुणः[20] $\frac{३}{१६}$ सप्तांशस्थेन अनन्तरताडकेन $\frac{१३}{९}$ गुणितो जातः सप्तांशगुणकः $\frac{३९}{१४४}$; एवं गुणिताः सप्तवर्गजगुणा लिख्यन्ते। अथाश्रयगुणकसिद्धि[21]माह। गुणः[22]; स्यादधिमिश्रितै[स्तैरिति। अधिमिश्रितै[23]] रेकीकृतैस्तैर्जातैः गृहादिगुणकैर्यो गुणः स्यात् स बुधैराश्रयसंज्ञः[24] स्मृतः॥

1A. बन्धनीमध्यस्थः पाठो नास्ति। 2B. लिख्यते। 3B. यथा। 4B. गुणकं। 5B. No च। 6A. ०मित्रभै०। 7B. गुणके च। 8B. सप्तवर्गेषु। 9B. No 'ये'। 10A. No इदानीं। 11B. स्तै। 12B. No गुण्या। 13B. गुणनीयः। 14A. अथात्र। 15B. गुणः ३। 16A. No ५। 17A. No ३। 18A. No ८। 19B. बन्धनीमध्यस्थभागः B–पुस्तके नास्ति। 20B. ०गुणकः। 21B. सिद्ध०। 22B. गुणांशकः। 23A. बन्धनीमध्यस्थः पाठो नास्ति। 24B. संज्ञितः।

अत्र पाटीगणिताभिज्ञैर्यद्यपि समच्छेदतया योगः[1] कर्तुं शक्यते तथापि तदनभिज्ञार्थं[2]-मन्यथोच्यते। तद्यथा। गृहादिगुणकान् स्वस्वभाजकेन भक्त्वा फलानि ग्राह्याणि, ततस्तद्योगे कृते आश्रयगुणको[3] भवति।

यथात्र रवेर्गुहर्गुणकः १५/२४[4] हारेण २४[5] ऊर्ध्वांके १५[6] भक्ते लब्धं गृहे[7] ०।३७।३० एवं रवेर्होरागुणकः ६/१६, हारेण ऊर्ध्वांके ६ भक्ते लब्धं होरायां ०।२२।३०। एवं सर्वत्र[8] जातानि [फलानि तेषां योगात्मका आश्रयगुणकाश्च लिख्यन्ते[9]]।

	र	चं	मं	बु	बृ	शु	श		र	चं	मं	बु	बृ	शु	श
गृ	५/३	५/९	१/१	५/९	५/३	२/१	१/३	गृ	४/२४	१०/१८	१/४	१३०/७५६	११०/८४	४/४	६/८४
हो	२/१	२/१	१/१	५/३	१/१	१/१	१/३	हो	६/१६	२/१२	१/८	५/१२	१/४	१/४	१/१२
द्रे:	१/१	१/१	१/१	५/९	१/१	२/१	१/३	द्रे:	३/१६	१२/१२	१/८	५/३६	१/४	२/४	१/१२
स	१३/९	१३/९	१३/९	१३/९	५/३	२/१	१/३	स	३९/१४४	५३/१०८	१३/३२	१३/३६	५/१२	२/४	१/१२
न	१/१	५/९	५/३	२/१	२/१	१३/९	१/३	न	३/१६	१२/१०८	५/२४	२/४	२/४	१२/३६	१/१२
द्वा	१/१	१/१	५/३	५/९	१/१	१३/९	१/१	द्वा	३/१६	१/१२	५/२४	५/३६	१/४	१३/३६	१/४
त्रिं	१/१	१/१	१/१	१३/८	५/३	१३/९	१/३	त्रिं	३/१६	१/१२	१/८	१३/३६	५/१२	१२/३६	१/१२

	र	चं	मं	बु	बृ	शु	श
गृ	० ३७ ३०	० ५ ३३	० १५ ०	० १० १२	१ १८ ३४	१ ० ०	० ४ १७
हो	० २२ ३०	० १० ०	० ७ ३०	० २५ ०	० १५ ०	० ३० ०	० ५ ०

1A. योग्यः। 2B. तदभिज्ञानार्थं०। 3B. संगुणको। 4A. No १५।२४। 5A. No २४। 6A. No १५। 7A. No गृहे। 8B. No सर्वत्र। 9B. बन्धनीमध्ये 'पृ०ठे विस्तराल्लिखितः' इति पाठः।

	र	चं	मं	बु	बृ	शु	श
	०	०	०	०	०	०	०
द्रे:	११	५	१०	८	१५	३०	५
	१५	०	५०	२०	०	०	०
	०	०	०	०	०	०	०
स	१६	७	१२	२१	२५	३०	५
	१५	१३	३०	४०	०	०	०
	०	०	०	०	०	०	०
न	११	२	१२	३०	३०	२१	५
	१५	४६	३०	०	०	४०	०
	०	०	०	०	०	०	०
द्वा	११	१२	७	८	१५	२१	१५
	१५	३०	३०	२०	०	४०	०
	०	०	०	०	०	०	०
त्रिं	११	५	७	२१	२५	२१	१५
	१५	०	३०	४०	०	४०	०

र	चं	मं	बु	बृ	शु	श
२	०	१	२	३	३	८
१	४०	१३	५	२३	२०	४४
१५	३३	२०	१९	३४	०	१७

जाता रव्यादीनामाश्रयगुणाः[1] । अथाश्रयगुणार्थं[2] सुगमोपायः । अत्र[3] मत्कृताः श्लोकाः ।

स्वस्य वर्गे गजभुवो १८ ऽधिमित्रस्य शरेन्दवः ।
त्रयोदश स्युर्मित्रस्य[4] समस्य नव कीर्तिताः ॥१॥

शत्रोर्वर्गे तथा पञ्च रामाः स्युरधिवैरिणः ।
गृहे तु द्विगुणा ज्ञेया ३६।३०।२६।१८।१०।६ स्तद्योगे भाज्यसंज्ञकः ॥२॥

वर्गोत्तमे वा स्वांशे[5] वा स्वदृक्काणे[6] स्वके[7] गृहे ।
षड्गुणो[8] भाजकः ३६ प्रोक्तस्तदभावेऽन्य[9] उच्यते ॥३॥

अष्टाब्धयो ४८ भाजकः स्यादधिमित्रगृहे स्थिते ।
युगेषवः ५४ सुहृद्गेहे समगेहे[10] कराद्रयः ७२ ॥४॥

1B. ०णकाः । 2B. ०णकार्थं । 3B. तत्र । 4B. विश्वसंख्या सु[हृ]द्वर्गे । 5B. स्वनवांशे । 6B. स्वद्रेक्काणे । 7B. च स्व । 8B. षड्गुणा । 9B. प्रोक्तास्तदाभावोऽन्य । 10B. समगृहे ।

शत्रोर्गृहेऽष्टाभ्रभुवो १०८ वेदेन्द्रा १४४ अधिशत्रुभे
भाजकेन हृते भाज्ये लब्धमाश्रयजो गुणः ॥५॥
वर्गोत्तमादित्रितये[1] संस्कारोऽप्यस्ति तं[2] शृणु ।
तत्राधिमित्रगेहे चेद्दिशः १० स्वर्ग २१ हृता ०।२८।३४ धनम् ॥६॥
मित्रगेहे करशरा[3] ५२ नवाष्टेन्दु १८९ हृता ०।१६।३० धनम् ।
[शत्रोर्गृहे शून्यपक्षो २० नवाष्टेन्दु १८९ हृता ०।६।२१ ऋणम् ॥७॥[4]]
अधिशत्रुगृहे नेत्र २ स्वर्गभक्ते २१ भवे ०।५।४३ दृणम्[5] ।
स्वभेऽथ सप्तमे वापि संस्कारो नैव विद्यते ॥८॥

अस्योदाहरणम् । तत्र[6] रविरधिमित्रगृहेऽस्ति अतो "ऽधिमित्रस्य शरेन्दव" इति १५ पञ्चदश प्राप्ताः[7] । 'गृहे तु द्विगुणा ज्ञेया' इत्युक्तत्वात् गृहे त्रिंशत् जाता (३०) । होरा तु स्वस्य[8] वर्तते अतः 'स्वस्य[9] वर्गे गजभुव' इति होरायाम् १८ । द्रेष्काणः समस्यास्ति अतः 'समस्य नव कीर्तिता' इति जाता[10] द्रेष्काणे[11] ९ । सप्तांशो मित्रस्यास्ति अतः 'त्रयोदश स्युर्मित्रस्ये'ति'[12] जाताः सप्तांशे १३ । नवांशः[13] समस्यास्ति[14] अतः 'समभे नव कीर्तिता' इति जाता नवांशादित्रिके ९ । एवं जाता रवेः सप्तसु वर्गेषु अङ्का लिख्यन्ते[15] ॥ अथैषां योगे ९७

	हो	द्रे	स	न	द्वा	त्रिं
३०	१८	९	१३	९	९	९

जातो भाज्यः । अथ भाजकः । अत्र वर्गोत्तमादित्रितये किमपि नास्ति । अतः 'अष्टाब्धयो [भाजकः स्यादधिमित्रगृहे स्थित' इति जातो भाजकः ४८[16]], अनेन भाज्ये ९७ भक्ते जात आश्रयगुणकः[17] २।१।१५ ; एवमुक्तरीत्या जाता भाज्यांका[18] भाजकांका आश्रयगुणा[19]श्च लिख्यन्ते । अत्र बुधो वर्गोत्तमादित्रितयमध्ये स्वनवांशेऽस्ति, अतो बुधाश्रयगुणस्य संस्कारः कार्यः । स यथा[20]। बुधः शत्रुगृहेऽस्ति "शत्रो[21]र्गृहे शून्य[22] पक्षा २० नवाष्टेन्दु १८९ हृता ऋण"मिति जातम् ऋणं ०।६[23]।२१, अनेन ऊनो[24] बुधाश्रयगुणो २।११।४० जातः संस्कृतः २।५।१९ । गुरुरपि स्वनवांशेऽस्ति अतो गुरुगुणकस्यापि[25] संस्कारः क्रियते[26] । स यथा । गुरुरधिमित्रगृहेऽस्ति "तत्राधिमित्रगेहे

1B. ततीय । 2B. तत् । 3A. शरकरा । 4B. बन्धनीस्थः पाठो नास्ति । 5B. शत्रोर्गृहे नेत्र २ स्वर्ग २१ भक्ते ५।४३ लब्धं भवेदृणम् । 6B. अत्र । 7B. अतः परं '१५' इत्यधिकम् । 8B. होरायां स्व । 9B. स्वस्व । 10B. जातो । 11B. द्रेष्काणो । 12B. No इति । 13B. अतः परं 'द्वादशांशाः' इत्यधिकम् । अत्र 'नवांशादित्रिकम्' इत्युचितः पाठः । 14B. ०स्व वर्त्तते । 15B. लिख्यते । 16 . बन्धनीमध्ये 'भाजकाः ४८' इति पाठः । 17A. जाताश्रयगुणाः । 18A. भाजका । 19 . गुणका० । 20B. च । 21B. रिपो० । 22A-B. पूर्ण । 23B. १ । 24A. पुनो । 25B. ०स्यैव । 26A. संस्काराः क्रियन्ते ।

चेद्दिशः १० स्वर्ग २१ हृता धन''मिति जातं धनं ०।२८।३४, गुरोराश्रयगुणः २।५५।०[1]। धनेन योजितो[2] जातः संस्कृत आश्रयगुणः[3] ३।२३।३४ ; शुक्रो यद्यपि स्वद्रेक्काणे[4]ऽस्ति संस्कारो युक्तस्तथापि "स्वभेऽथ समभे वापि संस्कारो नैव विद्यते" इति शुक्रस्य यथास्थित एवाश्रयगुणः[5] ३।२०।७ ; अत्र[6]शनिर्वर्गोत्तमेऽस्ति अतः शनिगुणकस्य संस्कारः क्रियते । शनिरधिशत्रुगृहेऽस्ति अतः "अधिशत्रुगृहे नेत्र (२) स्वर्ग (२१) भक्ते भवेदृण''मिति जातमृणं ०।५।४३। शनेराश्रयगुणः[7] ऋणेन ०।५।४३ हीनो जातः संस्कृतः शनेराश्रयगुणः ०।४४।१७[8]। अन्येषां तु संस्कारनिमित्ताभावात् यथास्थिता एवाश्रयगुणकाः । एवं जाता रव्यादीनामाश्रय गुणका लिख्यन्ते[9] । एवं सुगमोपायेनापि जाताः पूर्वसमा एवाश्रयगुणकाः ।

	र	चं	मं	बु	बृ	शु	श
गृ	३०	१०	१८	१०	३०	३६	६
हो	१८	१८	९	१५	९	९	३
द्रे:	९	९	९	५	९	१८	३
स	१३	१३	१३	१३	१५	१८	३
न	९	५	१५	१८	१८	१३	३
द्वा	९	९	१५	५	९	१३	९
त्रिं	९	९	९	१३	२५	१३	३
यो	९७	७३	७२	७९	११५	१२०	३०
भाज०	४८	१४	७२	३६	३६	३६	३६
आश्रय गुण	२ १ १५	० ४० ३३	१ १३ २०	२ ११ ४०	२ ५ १९	३ २० ०	० ५० ०

[अत्र योगो भाज्यो भक्त आश्रयगुणो भवति[10]]

1B. ०गुणकः २।५५।२० । 2B. युतो । 3B. ०गुणकः । 4B. स्वद्रेक्काणे । 5B. ०गुणकः । 6B. No अत्र । 7B. ०गुणकः । 8B. ०गुणकः ०।५०।० । 9B. No "लिख्यन्ते" । 10B. बन्धनीमध्यस्थः पाठो नास्ति ।

र	चं	मं	बु	बृ	शु	श
२	०	१	२	३	३	०
१	४०	३	५	२३	२३	४४
१५	३३	२०	९	३४	०	१७

अथ कर्मयोग्यगुणकमाह ।—

तस्य स्फुटस्यापि वधो भवेद्यः ॥११॥
तद्वर्गमूलं खलु कर्मयोग्य
आयुर्विधाने गुणकार[1] उक्तः । इति ।

व्याख्या । तस्याश्रयगुणकस्य अथ च स्फुटस्य प्रागुक्तस्फुटगुणकस्य यो वधः [परस्परं गुणनं भवेत् तद्वर्गमूलम् आयर्विधाने "आयुर्लिप्ताः स्वगुणगुणिता" ति [व]क्ष्यमाणा[2]युर्गुणिते कर्मयोग्य: कर्मणि योग्यः कर्मयोग्यो गुणकार उक्तः । उक्तानामुच्चगुणकादीनां मध्ये आयुःकर्मणि अयमेवोपयुज्यत इत्यर्थः । तद्वर्गमूलमिति तस्य वधस्य[3] यो वर्गस्तस्य मूलमिति नार्थः यतो वधस्य[4] वर्गे[5] कृते मूले च[6] गृहीते वधतुल्यमेव स्यान्न विशेषः अत[7]स्तद्वर्गमूलमिति तस्य वधस्य वर्गमूलं न तु धनमलमित्यर्थः सिद्धः । अस्योदाहरणम् । तत्र रवेराश्रयगुणः[8] २।१।१५ रवेः प्रागानीतस्फुटगुणकः ०।४५।३६ अनयोर्वधः १।३२।९ अस्य मूलं जातः कर्मयोग्यगुणकः १।१४।२१ । एवं जाता रव्यादीनां कर्मयोग्यगुणका लिख्यन्ते ।

र	चं	मं	बु	बृ	शु	श
१	१	१	१	१	१	०
१४	२३	९	५१	३२	५९	५७
२१	३९	३९	४६	२८	४०	०

अथोपजातिकोत्तराधन आयुःकलाविधानमाह ।—

ग्रहस्य लिप्ताः ख-ख-सिद्ध-(२४००) भक्ताः
प्रोक्ताः कलाः शेषमिहायुषोऽत्र ॥१२॥

व्याख्या[9] । राश्यादिकस्य[10] लिप्ताः कार्याः ताः ख-ख-सिद्धैश्चतुर्विंशतिशतैः[11] भाज्याः । अत्र यत् शेषं ताः आयुषः कलाः प्रोक्ताः । अस्योदाहरणम् । अत्र रविः । ७।१७।१९।२५ राशयः ७[12] त्रिंशद्गुणाः २१० अंशैर्युता[13] जाता अंशाः २२७, एते षष्ट्या गुणिताः-१३६२० कलाभिर्युता [जाता ग्रहस्य लिप्ताः[14]] १३६३९[15] ।२५ ; एताः ख-ख-सिद्ध-२४०० भक्ताः : शेषम् आयुषः कलाः १६३९।२५ ; एवं चन्द्रादीनामपि जाता आयुःकलाः ॥१२॥

1B. गुणको य । 2B. बन्धनीमध्ये 'परस्परेणा०' इति पाठः । 3B. वर्गस्य । 4 . वर्गस्य । 5B. वधे । 6B. No च । 7B. यत० । 8B. ०गुणकः । 9B. No व्याख्या । 10A. ०दिक । 11B. अतः परं '२४००' इत्यधिकम् । 12B. No ७ । 13B. अतः परं '१७' इत्यधिकम् । 14B. बन्धनीमध्ये 'जाताभिः ग्रहलिप्ताभिः' इति पाठः । 15B. १३६३३९ ।

सूर्य	चन्द्र	मङ्गल	बुध	बृह	शुक्र	शनि
१६३९ २५	२१ ३३	१३५४ ९	५·४ ११	२२८४ ५५	१४१३ २०	१७६ २१

अथेन्द्रवज्राद्वयेन उपजातिकया च आयुःकलानां चक्रपातार्ध[1]हानिमाह ।—

लग्नं ग्रहोनं यदि षड् गृहेभ्यो हीनं तदानीं हरसंभवः स्यात् ।
नैवाधिके तत्र खगोनलग्ने लिप्तीकृते राशिकलाविभक्ते ॥१३॥

आयुःकलानां स हरः स्फुटः स्याद् रूपाद् यदूनः स हरस्तदानीम् ।
रूपाद्विशुद्धो गुणकस्तु तासामेवं हि पापद्युचरोनलग्ने ॥१४॥

शुभोन[2]लग्ने तु हरो द्विनिघ्न आयुःकलाभ्यो हरलब्धलिप्ताः ।
विशोधनीया यदि रूपकोनो हरस्तदानीं गुणकेन गुण्याः ॥१५॥

व्याख्या ।—ग्रहोनं[3] लग्नं ग्रहाल्लग्ने[4] शोधिते सति इत्यर्थः । शेषं यदि षड्-गृहेभ्यः षड् राशिभ्यः हीनं भवति तदानीं हरसंभवः स्यात् । शेषे षड्राशिभ्योऽधिके सति नैव हरसंभवः इति[5] । अथ हरसंभवे सति हरविधानमाह । खगोनलग्न[6] इति । खगेन ग्रहेण ऊनं य[7]ल्लग्नं तस्मिन् लिप्तीकृते कलीकृते ततो राशिकलाभिरष्टादशशतैः १८०० विभक्ते यल्लब्धं स आयुःकलानां स्फुटो हरः स्यात् । अथ हरो यदि[8] रूपादूनो भवेत्तदा रूपाद्विशुद्धः सन् तासामायुःकलानां गुणकः स्यात् । परं पापद्युचरोनलग्ने पापग्रहेणोनीकृते लग्ने[9] एवं भवति । पापग्रहस्य हर[10] एवं साध्य[11] इत्यर्थः ॥१३-१४॥

शुभग्रहस्य हरसाधने विशेषमाह ।—शुभोनलग्ने त्विति । शुभग्रहस्य हरसाधनेऽपि शुभग्रहेण ऊने लग्ने कृते प्राग् वदेव[12] हरः साध्यः किं तु स[13] हरो द्विनिघ्नो[14] द्विगुणः कार्यः । अत्रान्यो[15] विशेषः । शुभोनलग्ने कृते प्राग्वद्धरे कृते यदि स हरः रूपादूनो भवेत् तदा तस्यार्धं विधाय रूपाच्छोध्यम् । शेषं शुभग्रहस्य आयुःकलानां गुणको भवतीति । अस्योदाहरणम् । अत्र लग्नं २।४।५६।२८[16] रविणा ७।१७।१९।२५[17] ऊनं जातं ६।१७।३७।३ ; अत्र ग्रहोनलग्नस्य षड्राशिभ्योऽधिकत्वा"न्नैवाधिक" इत्युक्तत्वाद्रवेः हरसंभवो नास्ति । [अथ लग्नं चन्द्रेण ऊनं १।१०।२१।३३ जातं ०।२४।३४।५५ ; अत्र "लग्नं ग्रहोनं यदि षड् गृहेभ्यो हीनं तदानीं हरसंभवः स्यात्" इत्युक्तत्वाच्चन्द्रस्य हरसंभवोऽस्ति[18] ।] अथ तत्साधनम्[19] । खगोनलग्नेऽस्मिन् ०।२४।३४।५५ लिप्ती[20]कृते १४७४।५५ राशि-

1B. No अर्ध । 2B. शुभे तु । 3B. ०होन । 4A. लग्नाद् ग्रहे । 5A. No इति । 6B. लग्नं । 7B. No यत् । 8B. No यदि । 9B. ०णोनितलग्ने । 10B. No हर । 11B. साध्यते । 12B. प्रागेव । 13B. No स । 14B. No द्विनिघ्नो । 15B. अत्रान्य । 16B. २७ । 17B. २९ । 18. बन्धनीस्थः पाठः B-पुस्तके नास्ति । 19B. अतः परं 'चन्द्रस्य साधनम्' इत्यधिकम् । 20B. विलिप्ती ।

कला-१८०० विभक्ते लब्धो हरः ०।४९।१०। अयं यदि पापग्रहस्य स्यात्तदा रूपाद्विशुद्धः सन् ०।१०।५०[1] गुणकः स्यात्। इह तु चन्द्रः सौम्यग्रहोऽस्ति अतो रूपादल्पस्य हरस्य ०।४९।१० अर्धं कृत्वा ०।२४।३५ रूपाच्छोधितं ०।३५।२५ जातश्चन्द्रायुःकलानां गुणकः। अत्र[2] भौमगुरुशुक्राणामपि हरसंभवो नास्ति। बुध-शन्योस्तु हरसंभवोऽस्ति, स साध्यते। बुधेन ८।८।२४।१६ ऊनीकृते लग्ने ५।२६।३२।१२ लिप्तीकृते १०५९२।१२ ; राशिकला-[3] विभक्ते १८०० अस्मिन् लब्धं हरः ५।५३।४। 'शुभोनलग्ने तु हरो द्विनिघ्न' इति द्विगुणः[4] सन् जातो बुधहरः ११।४६।८। अथ शनिना[5] ०।२।५६।२१ लग्नमूनं २।२।०।७ अस्मिन् लिप्तीकृते ३७२०।७ राशिकलाविभक्ते लब्धं हरः २।४।०। [शनेः पापग्रहत्वात् यथास्थित एवायम्, न द्विघ्नः २।४।०। एवं जाते चन्द्रस्यायुःकलानां गुणकः ०।३५।२५ ; बुधस्य हरः ११।४६।८ ; शनेरपि हरः २।४।०[6]], अन्येषां तु हरसंभवो नास्त्येव। अथा[7]त्र सुगमोपायः।—

ग्रहोनलग्नं षड्भाल्पं यद्यस्ति हरसंभवः।
तत्र ग्रहोनलग्नस्य भागोद्य[8] द्विगुणो हरः ॥१॥

रूपादल्पे हरे रूपाद्विशुद्धे गुणको भवेत्।
रूपाधिकः शुभहरो द्विगुणः सन् स्फुटो भवेत् ॥२॥

गणको रूपसंयुक्तोऽ[9]र्धितः स्पष्टोऽस्य[10] जायते।

अथ हरकृत्यमाह।—आयुःकलाभ्यो हरलब्धलिप्ता[11] इति। ग्रहस्य आयुःकलाः पृथक् स्थाप्याः, एकत्र हरेण भाग गृहीते लब्धलिप्ताः द्वितीयस्थानस्थिताभ्यः [कलाभ्यो विशोधनीयाः। अथ यदि रूपको हरो भवति तदेवं न कार्यं किन्तु यत्र यो गुणकः कृतोऽस्ति तेन[12]] आयुःकलाः केवलं गुणनीयाः। एवं कृते चक्रपातार्धहानिर्भवति।

अस्योदाहरणम्। तत्र चन्द्रायुःकलाः २१।३३ चन्द्रगणक[13] ०।३५।२५[14] गुणिताः १२४३।१३ जाताश्चक्रपाता[15]र्धहानिसंस्कृताश्चन्द्रायुःकलाः १२४३।१३ ; बधस्यायुःकलाः ५०४।१६ बुधहरेण ११।४६।८ भक्ता लब्धाः कलाः[16] ४२।५१ ; एताः बुधायुःकलाभ्यः शोधिता जाताः संस्कृताः बुधायुःकलाः ४६१।२५ ; अथ शनेरायुःकलाः १७६।२१[17]। शनिहर-२।४।० भक्ता लब्धाः कलाः ८५।१९ ; एताः[18] शनेरायुःकलाभ्यः १७६।२१ शोधिता जाताः संस्कृताः शनेरायुःकलाः ९१।२[19] ; अत्रायं विशेषः। यद्येकत्र द्वित्रादयो ग्रहा भवन्ति तदा तेषां मध्ये[20] बलाधिकस्यैव चक्रपातार्धहानिः कार्या नान्येषामिति। एवं चक्रपातार्धहानिसंस्कृता आयुःकला लिख्यन्ते[21] ॥१५॥

1B. ०।१०।५। 2B. अथ। 3B. ०लाभिः। 4B. गुणं। 5B. शनि। 6B. बन्धनीस्थः पाठो नास्ति। 7B. No अथ। 8B. भागादि। 9B. रूपको गुणसंयुक्तो०। 10B. ०ष्टोऽत्र। 11B. लिप्तिका। 12A. बन्धनीस्थः पाठो नास्ति। 13A. गण। 14B. २४। 15B. No पात। 16B. भक्ते लब्धं। 17B. २२। 18B. एते। 19B. २६। 20B. No मध्ये। 21B. लिख्यते।

सू	चं	मं	बु	बृ	शु	श
१६३९	१२४३	२३५४	४६१	२२८४	१४१३	९१
३५	१३	९	२५	५५	२१	२

अथेयं चक्रपातार्धहानिः[1] सर्वेष्वप्यायुर्दायेषु कार्येति शालिन्याऽऽह ।—

एवं कार्या चक्रपातार्धहानिराथ्युर्दाये ह्यंशजे पिण्डजेऽपि[3] ।
नैसर्गाख्ये जीवशर्मोदिते च हारं कृत्वा त्वेककोनं गुणं च ॥१६॥

व्याख्या। एवं[4] "लग्नं ग्रहोनं यदि षड्गृहेभ्यो हीनम्" इत्यादि[5] पूर्वोक्तप्रकारेण हारं कृत्वा तथा एककोनं[6] रूपाद्विशोध्य गुणकं च कृत्वा अंशजे पिण्डजे नैसर्गाख्ये[7] जीवशर्मोदिते च वक्ष्यमाणे आयुर्दाये[8] चक्रपातार्धहानिः कार्या ॥१६॥

अथ वर्षाद्यायुरानयनं मन्दाक्रान्तयाऽऽह।—

आयुर्लिप्ताः स्वगुणगुणिता व्योमशून्याश्वि २००[9] भक्ता
ह्यब्दा मासा दिवसघटिका[:] स्युर्विनाड्यः क्रमेण ।
एवं सर्वद्युचरजनितं ह्यायुरानीय लग्ना-
दायुः साध्यं कथितविधिना किंतु लग्ने विशेषः ॥१७॥

व्याख्या। सति संभवे चक्रपातार्धहानि[10]संस्कृता अन्यथा [यथास्थिता जाता या आयुर्लिप्ताः[11]] आयुःकलाः ताः[12] स्वगुणगुणिताः स्वस्य कर्मयोग्यगुणकेन गुणितास्तथा व्योमशून्याश्विभक्ताः लब्धमब्दा मासा दिवसघटिका विनाड्यः पलानि[13] च स्युः। अत्रायं विधिः। यस्य ग्रहस्य चक्रपातार्धहानिसंभवोऽस्ति तस्य[14] संस्कृता [आयुःकला ग्राह्याः[15]] यस्य चक्रपातार्धहानिसंभवो नास्ति तस्य यथास्थिता एव आयुःकला ग्राह्या[:], ता आयुःकला तदधो विकलाश्च स्वस्य कर्मयोग्यगुणकेन गुणनीयाः। विकलाः षष्ट्या विभज्य लब्धमुपरि योजयेत्। ततो व्योमशून्याश्विभिः २०० भागो देयः[16] यल्लब्धं तानि वर्षाणि भवन्ति। शेषं कला विकलाश्च द्वादशभिर्गुणयेत्, विकलाः षष्ट्या विभज्य लब्धं कलासु योजयेत्। पुनरपि तासां कलानां व्योमशून्याश्विभिः २००[17] भागो देयः यल्लब्धं ते मासा भवन्ति। पुनः शेषं त्रिंशता संगुण्य [षष्ट्या [विभज्य] लब्धं कलासु संयोज्य द्विशत्या

1B. हानिसंस्कृता। 2A. ०निश्चा०। 3B. ०जे च। 4B. अग्रे। 5B. तदानीं हरसंभवन्ति (?) इति पाठः। 6B. अतः परं 'रूपादल्पहारं' इत्यधिकम्। 7B. ०र्गिकाख्ये। 8B. अतः परं 'च' इत्यधिकम्। 9A. अङ्कभागो नास्ति। 10B. हानिः। 11B. बन्धनीमध्ये 'यथास्थितजातायुर्लिप्ता' इति पाठः। 12B. No 'ताः'। 13A. फलानि। 14B. अतः परं 'हानिः' इत्यधिकम्। 15B. बन्धनीस्थः पाठो नास्ति। 16A. ग्राह्यः। 17B. अङ्कभागो नास्ति।

भागो देयः यल्लब्धं ते दिवसा भवन्ति। पुनः शेषं षष्ट्या संगुण्य विकलाभिः संयोज्य द्विशत्या [भक्ते] लब्धं घटिका भवन्ति। शेषं पुनः षष्ट्या संगुण्य[1]] द्विशत्या भक्ते[2] लब्धं पलानि भवन्ति। एवमुक्तप्रकारेण सर्व-द्युचरजनितं सकलग्रहसम्भवम् आयुर्वर्षादिकमानीय ततः कथितविधिना लग्नाद[3]प्यायुः साध्यम्। तद् यथा। लग्नस्य राश्यादेर्लिप्ताः कार्या[:]। ता[:] ख-ख-सिद्ध २४००[4] भक्ताः कार्याः, शेषं लग्नस्यायुःकला भवन्ति। अथ आयुर्लिप्ता[:] स्वगुणगुणिता इति विधौ लग्नस्य गुणकाभावात् आयुःकलाः केवलं व्योमशून्याश्विभक्ता लब्धं वर्षाणि। ततः पूर्ववत् मासादिकमपि ग्राह्यम्, तद्वर्षादिर्लग्नायुर्भवति। किं तु लग्ने लग्नायुषि विशेषोऽस्ति,। स चाग्रिमश्लोके वक्ष्यते।

अथास्यो[5]दाहरणम्। तत्र रवेरायुःकलाः १६३९।२५[6] रवेः कर्मयोग्यगुणकेन ११।४।२१ गुणिताः २०[7]३१।३१ व्योमशून्याश्विभक्ता लब्धं वर्षाणि १० ; शेषं ३१[8]।३१ द्वादशगुणं[9] षष्ट्या लब्धम् उपरि संयोजिते[10] जातं [३७८।१२, द्विशत्या २०० भागे लब्धमासा १, शेषं १७८।१२ त्रिंशता संगुण्य षष्ट्या लब्धम् उपरि संयोज्य जातं[11]] ५३४६ द्विशत्या भागे लब्धं दिवसाः २६ ; शेषं १४६ षष्ट्या संगुण्य ८७६० द्विशत्या भागे लब्धं घटिकाः[12] ४३ ; शेषं १६० षष्ट्या संगुण्य ९६०० द्विशत्या भाग लब्धं पलानि ४८। एवं जातं रवेर्वर्षादिकम् आयुः[13] १०।१।२६।४३।४८ एवं चन्द्रादीनामपि [ज्ञेयम्[14]] अथ लग्नस्यायुः साध्यते। राश्यादि लग्नं २।४।५६।२८ अस्य लिप्ताः ३८९६।२८ ख-ख-सिद्धभक्ताः शेषं लग्नस्यायुःकला १४९६।२८। एता[15] व्योमशून्याश्विभक्ता लब्धं वर्षाणि७[16] शेषं ९६।२८ द्वादशभिः संगुण्य ११५७।३६ [द्विशत्या भागे लब्धं मासा[:]५, शेषं १५७।३६ त्रिंशद्गुणं[17]] ४७२८[18] द्विशत्या विभज्य[19] लब्धं[20] दिनानि २३। शेषं १२८ षष्टिगुणं ७६८० द्विशत्या विभज्य लब्धं घटिकाः ३८। शेषं ८० षष्टिगुणं ४८०० द्विशत्या विभज्य[21] लब्धं पलानि २४ ; एवं लग्नायुर्वर्षादिकं जातं ७।५।२३।३८[22]।२४[23] ॥१७॥

लग्नायुषीन्द्रवज्रया विशेषम् आह[24]—

लग्ने तु वीर्याश्रयधिके च तुल्यैर्वर्षैर्युतं तस्य विधेयमायुः।
भागादिकादप्यनु[25]पातलब्ध-मासादिना संयुतमत्र कार्यम् ॥१८॥

1B. बन्धनीस्थः पाठो नास्ति। 2B. भागे। 3B. No लग्नात्। 4A. अङ्कभागो नास्ति। 5B. No. अस्य। 6A. No '२५'। 7B. '२१'। 8B. १३१। 9A. ३७२।३१ इत्यधिकोऽङ्कः। 10B. ०योज्य। 11A. बन्धनीमध्यस्थः पाठो नास्ति। 12B. घटी। 13A. वर्षादिकं रवेरायुः। 14 A–पुस्तके बन्धनीमध्ये "जातमायुर्लिख्यते" इति पाठः। 15. अतः परं B–पुस्तके '२००' इत्यधिकम्। 16A. No '७' 17B. 'त्रिंशत्' इतिमात्रः पाठो बन्धनीमध्ये। 18A. '२४'। 19A. भक्तं। 20B. No लब्धम्। 21A. भक्तं। 22B. '२८'। 23A. ३४। 24B. लग्नायुर्विशेषमिन्द्रवज्रयाऽऽह। 25B. ०काच्चाप्यनु०।

अत्र अंशायुर्दाये लग्ने वीर्याभ्यधिके लग्नबले षडधिके सति तस्य[1] लग्नस्य आयुः भतुल्यै-र्लग्नराशितुल्यैर्वर्षै[2]र्युतं विधेयम् । अथ[3] लग्नस्य भागादिकादपि अनुपातलब्धेन मासादिना च संयुतं कार्यम्, एवं कृते[4] स्फुटं[5] लग्नायुर्भवति । अत्रानुपातो यथा । इह हि एकस्मिन् राशौ एक[6]वर्षं भवति । तत्र राशेरंशास्त्रिंशत्[7] ३० वर्षस्य[8] मासा द्वादश १२ तथा त्रिंशद्[9]भागै३०[10]र्द्वादश मासा लभ्यन्ते तदा[11] लग्नस्य भागादिना किमिति । अनुपातः । अत्र भागादिकस्य द्वादश१२[12]गुणकः त्रिंशद्३०[13] भाजकः । गुणहारौ[14] षड्भिरपवर्तितौ[15] जातो गुणः२ भाजकः५ तथा[16] च लग्नस्य भागादि द्विगुणं कृत्वा पञ्चभिर्भक्त्वा लब्धं मासाः, शेषं त्रिंशद्गुणं पञ्चभिर्भक्ते[17] लब्धं दिनानि, शेषं षष्टिगुणं पंचभिर्भक्ते लब्धं घटिकाः, शेषं षष्टिगुणं पञ्चभिर्भक्ते[18] लब्धं पलानि[19] । इत्यनुपातलब्धेन मासादिनापि[20] लग्नायुः संयुतं कार्यम् । अथास्योदा[21]हरणम् । अत्र लग्नबलं ९[22]।२०।२१ रूपषट्का[23]दधिकमस्ति[24] अतो लग्नराशितुल्यैर्वर्षैर्लग्नायुः ७।५।२३।३८।२४ युक्तं कृतं[25] ९।५।२३।३८।२४ । अथ लग्नस्य भागादिना[26] ४।५६।२८ द्विगुणं ९।५२।५६ पंचभक्तं लब्धं मासाः[१]शेषं ४।५२।५६ त्रिंशद्गुणं[27] षष्ट्या उपर्युपरि संयोज्य १४६।२८ पंचभिर्भक्त्वा लब्धं दिनानि २९ ; शेषं १।२८ षष्टिगुणं(६०) विकला(२८) युक्तं ८८ पञ्चभिर्भक्तं[28] लब्धं घटिकाः १७ ; शेषं ३ [षष्टिगुणं १८० पञ्चभिर्भक्तं ५ लब्धं[29]] पलानि ३६, इति अनुपातलब्धं मासादि १।२९।१७।३६ । [अनेन युक्तं लग्नायुः ९।७।२२।५६।०[30]] । [अथायुर्योगार्थं सर्वेषाम् आयूंषि वर्षादिकानि लिख्यन्ते[31]] ॥१८॥

र	च	मं	बु	बृ	शु	श	ल	योग
१०	०	१३	४	१७	१४	०	९	६९
१	१	७	३	७	१	५	७	११
२६	१	२८	१७	८	३	५	२२	२५
४३	५६	५९	७	२१	५२	४०	५६	३७
४८	४९	४७	४८	३१	०	०	०	४३

अथ पिंडायुः । [रव्यादीनामायु-र्वर्षपिण्डम्[32]] उपजातिकयाऽऽह ।—

1B No तस्य । 2B. No वर्षै० । 3A. अथ च । 4B. अतः परं 'सति' इत्यधिकम् । 5B. No स्फुटं । 6B. एकं । 7B. अंशत्रिंशत् । 8B. वर्षं । 9B. त्रिंशद्भिः । 10A. अङ्को नास्ति । 11B. तथा । 12A अङ्को नास्ति । 13A. अङ्को नास्ति । 14B हारो । 15B. ०वर्जितो । 16B. तदा । 17B भक्तं । 18B. भक्त्वा । 19B. विकलाः । 20B. No अपि । 21B. अत्रोदा० । 22B. १० । 23B. षड्भा० । 24A. अतः परं "अतो लग्नं वीर्याभ्यधिकमस्ति" इत्यधिकम् । 25B. No कृतं । 26B. ०दिकं । 27A. गणे । 28B. भक्त्वा । 29A. बन्धनीमध्ये 'एवं' इतिमात्रः पाठः । 30. A-पुस्तके बन्धनीमध्ये "अतोऽत्रापि लग्नायुः ९।५।२३।३८।२४ युक्तं ९।७।२२।५६।० जातं स्फुटं लग्नायुः" इति पाठः । 31B. बन्धनीमध्ये "एवं रव्यादीनामंशायुर्लिख्यते" इति पाठः । 32. बन्धनीस्थः पाठः B-पुस्तके नास्ति ।

नवेन्दवो १९ वाणयमाः २५शरक्ष्मा१५
दिवाकराः १२पञ्चभुवः १५कुपक्षाः२१।
नखाश्च २० भास्वत्प्रमुखग्रहाणां
पिण्डायुषोऽब्दा निजतुङ्गगानाम्[1] ॥१९॥

व्याख्या।--निजतुंगगानां स्वपरमोच्चगानां[2] भास्वत्प्रमुखग्रहाणां सूर्यादिग्रहाणां पिण्डायुषः अब्दाः वर्षाणि भवन्ति। के ते अब्दा इति[3] आह। नवेन्दव इति। नवेन्दवः[4] १९ सूर्यस्य, चन्द्रस्य वाणयमाः २५, भौमस्य शरक्ष्माः १५, बुधस्य दिवाकराः १२, गुरोः पञ्चभुवः १५, भृगोः कुपक्षाः २१, शनेः नखाः २०। एतदुक्तं भवति। सूर्यादीनामुच्चानि उच्चबलार्थं प्रागेव लिखितानि। तानि[5] यथा। तत्र रविः[6] स्वोच्च[7] ०।१०।०।० समो राश्यादिश्चेद् भवति तदा एकोनविंशतिवर्षाणि १९ रवेः पिण्डायुः [भवति। एवं चन्द्रादीनामपि[8]]॥ १९॥

[अथ यदा ग्रहः स्वोच्चसमो[9]] न भवति तदा पिण्डायुः कथं साध्यम्? तदाहोपेन्द्रवज्रा-रथोद्धताभ्याम्।—

निजोच्चशुद्धः खचरो विशोध्यो भमण्डलात् षड्भवनोनकश्चेत्।
यथास्थितः षड्भवनाधिकश्चेत् कलीकृतः संगुणितो निजाब्दैः ॥२०॥
तत्र खाभ्ररसचन्द्रलोचनै २१६०० रुद्धृते सति यदाप्यते फलम्।
वर्ष-मास-दिन-नाडिकादिकं तद्धि पिंडभवमायुरुच्यते ॥२१॥

व्याख्या--खचरो ग्रहो[10] राश्यादिग्रहः निजोच्चशुद्धः स्व[11]परमोच्चात् शोधितः सन् चेत् षड्भवनोनकः राशिषट्कादल्पः तदा भमण्डलात् १२ द्वादशराशिभ्यो विशोध्यः। चेत् षड्भवनाधिकः तदा यथास्थित एव, भमण्डलान्न शोध्य इत्यर्थः। ततः[12] कलीकृतः एतावता[13] पिण्डायुषि आयुःकला भवन्ति। एता आयुःकलाः प्राग्वच्चक्रपातार्धहानिसंस्कृताः कार्याः। ततः[14] लिप्ता[15]गुणिता[16] निजाब्दैः नवेन्दवो वाणयमेत्यादिना[17]। अत्र[18] गुणिते लिप्तागणे खाभ्ररसचन्द्रलोचनैः २१६०० उद्धृते भक्ते सति यत् फलम् [आप्यते यल्लब्धं भवति[19]] तत् वर्ष-मास-दिन-नाडिकादिकं पिण्डभवं पिण्डजमायुरुच्यते। तत्र[20] प्रथमतः खाभ्ररसचन्द्रलोचनैः २१६००[21] भक्ते लब्धं वर्षाणि, शेषं प्राग्वद्द्वादशभिः संगुण्य [खाभ्ररसचन्द्रलोचनै-

---

1. श्लोकेऽस्मिन् तत्र तत्र व्यस्तविन्यस्ता अङ्काः A-पुस्तके अत्रैवैकत्र लिखिताः सन्ति। 2A. तुल्यानां। 3B. इत्यतः। 4 B. No नवेन्दवः। 5A. No तानि। 6B. रवेः। 7B. स्वोच्चं। 8B. बन्धनीमध्ये "चन्द्रस्वोच्चं १।३।०। समश्चेद्भवति तदा पञ्चविंशतिवर्षाणि २५ चन्द्रस्य पिण्डायुः, एवं भौमादीनामपि ज्ञेयम्। रव्यादीनां परमोच्चानि लिख्यन्ते" इति पाठः। 9B. बन्धनीस्थः पाठो नास्ति। 10A. No ग्रहः। 11A. No स्व। 12B. तत्। 13B. एतावत्। 14B. No ततः। 15B. सलिप्ता। 16B. गणो। 17B. ०यमा इत्यादिगुणिता। 18B. तत्र। 19A. बन्धनीस्थः पाठो नास्ति। 20B. ततः। 21B No २१६००।

विभज्य[1]] लब्धं मासाः, पुनस्तच्छेषं त्रिंशद्गुणं भक्ते[2] लब्धं दिनानि । पुनस्तच्छेषं षष्टिग भक्ते[3] घटिकास्ततः पलानि। यद्वा प्रथमतः खाभ्ररसचन्द्रलोचनैर्भक्ते लब्धं[4] वर्षाणि ; ततः शेषम् अष्टादशशतै १८००[5] भक्ते[6] लब्धं मासाः । ततः शेषं षष्ट्या विभज्य लब्धं दिनानि । ततः कलाशेषं घटिकाः विकलाः पलानि चेति।

अत्रोदाहरणम् । तत्र रविः ७।१७।१९।२५ ; रवेः परमोच्चात् ०।१०।०[7] शोधितः[8] ४।२२।४०।३५ अयं षड् वनोनकोऽस्ति अतो भमंडलात् १२ शोधितः ७।७।१९।२५। कलीकृतः[9] १३०३९।२५[10] आयुःकलाः एताश्चक्रार्धहान्या ॑स्कार्याः । परं तु रवेर्हरसम्भवोऽत्र[11] नास्ति । अ[तो] यथास्थिता एवायुःकलाः । रवेः पिण्डायुर्वर्षै-१९ गुणिताः २४७४८[12]।५५[13] खाभ्र-रस-चन्द्र-लोचनैः २१६०० भक्ते[14] लब्धं वर्षाणि ११ शेषं १०१४८।५५ [अष्टादशशतैर्भक्तं लब्धं मासाः ५ ; शेषं ११४८।५५ षष्ट्या विभज्य लब्धं दिनानि १९, शेषं ८।५५ घटिकाः पलानि च[15]]। एवं जातं रवेः पिण्डायुर्वर्षादिकं[16] ११।५।१९।८।५५ । अथ चन्द्रो राश्यादिः । १।१०।२१।३३ निजोच्चात् १।३।०।० शुद्धः ११।२२।३८।२७ षड्भवनाधिकोऽस्ति अतो यथास्थित एव कलीकृतः[17] २११५८।२७ ; एताश्चन्द्रस्य पिण्डजा[18] आयुःकलाः । अथ चक्रार्धहानिः । तत्र चन्द्रस्य हरो रूपादल्पोऽस्तीति रूपाद्विशोध्य प्रागानीतचन्द्रस्य गुणकः[19] ०।३५।२५ । "यदि रूपकोनो हरस्तदानीं गुणकेन गुण्य" इत्युक्तत्वात् आयुःकलाः २११५८।२७ गुणकेन ०।३५।२५ गुणिता जाता[20]श्चक्रार्धहानिसंस्कृता आयुःकलाः १२४८९।२१।४६[21] निजाब्दै-२५ गुणिताः[22] ३१२२३४।४ खाभ्ररसचन्द्रलोचनैर्भक्ता लब्धं वर्षाणि १४ ; शेषं ९८३४[23] अष्टादशशतभक्तं लब्धं मासाः ५, शेषं ८३४ षष्टिभक्तं लब्धं[24] दिनानि १३, शेषं[25] ५४।४ [घटिकाः पलानि चेति[26]]। एवं चन्द्रस्य वर्षादिकं पिण्डायुः १४।५।१३।५४।४[27] । एवं भौमादिकानाम्[28] अपि जातानि लिख्यन्ते ॥ २०–२१ ॥

र	चं	मं	बु	बृ	शु	श
११	१४	९	८	९	१०	५
५	५	२	५	०	१०	७
१९	१३	१८	७	३	१७	२४
८	५४	३२	७	४६	४०	२१
५५	४	१४	१२	१५	०	४०

1. बन्धनीमध्ये A-पुस्तके 'भक्ते' इतिमात्रः पाठः । 2B. No भक्ते । 3B. भक्त्वा । 4A. No लब्धं । 5A. अङ्कभागो नास्ति । 6B. भक्त्वा । 7A. अङ्कभागो नास्ति । 8B. शोधिते । 9B. कला कृता । 10B. 'एता' इत्यधिकम् । 11B. No अत्र । 12B. २४७७४ । 13B. ५ । 14B. भक्त्वा । 15B. बन्धनीस्थः पाठो नास्ति । 16B. ०र्वर्षाणि । 17B. कलाकृतः । 18B. पिण्डायुजा । 19B. गणः । 20B. No जाता । 21B. No ४६ । 22B. अतः परं 'जाता' इत्यधिकम् । 23B. ३४।४ इति पाठः । 24B. जातं । 25B. No शेषं । 26B. बन्धनीस्थः पाठो नास्ति । 27B. ४५ । 28B. ०दीनाम् ।

अथ पिण्डायुषि हानिविशेषं रथोद्धतयाऽनुष्टुभा[1] चाह—

त्र्यंशकं हरति शत्रुभे ग्रहः स्वायुषोऽत्र न तु वक्रचारगः ।
सूर्यलुप्तकिरणोऽर्धहारकः प्रोज्झ्य भार्गव-दिनेशनन्दनौ ॥२२॥

खचरो जायते योऽर्ध[2]त्र्यंशयोरपहारकः ।
आयुषः स हरेदर्धं त्र्यंशं शुक्र-शनैश्चरौ[3] ॥२३॥

व्याख्या। शत्रुभे शत्रुगृहे यो ग्रहोऽस्ति स ग्रहः स्वायुषः त्र्यंशकं हरति । तु पुनः **वक्रचारगो वक्रगतिः** शत्रुक्षेत्रे स्थितोऽपि[4] स्वायुषस्त्र्यंशं[5] न हरति । अथ सूर्यलुप्तकिरणः अस्तगतो ग्रहः स्वायुषः अर्धहारकः[6] [अर्धमायुर्हरतीत्यर्थः[7]] । किन्तु भार्गव-दिनेशनन्दनौ शुक्रशनैश्चरौ प्रोज्झ्य हित्वा । [शनि-शुक्रावस्तंगतावपि अर्धं न हरतः[8]] । अथ यो ग्रहः अस्तगतः सन् शत्रुक्षेत्रेऽस्ति तस्य विशेषमाह खचरो जायत इति । यः खचरो ग्रहः अर्धत्र्यंशयोरपहारको जायते अस्तंगतत्वादर्धहारकः शत्रुगृह[9]गतत्वात् त्र्यंशहारकश्च जायते स[10] ग्रहः आयुषोऽर्धमेव हरेत् न तु त्र्यंशमपि । शुक्र-शनैश्चरौ तु त्र्यंशमेव हरतः नार्धम्, [11]प्रोज्झ्य भार्गव-दिनेशनन्दनाविति तयोरर्धहानेरभावात् । अत्रायं विशेषः । "त्र्यंशकं हरति शत्रुभे ग्रहः"[12] इत्यत्र स्वाभाविकशत्रुर्ज्ञेयो न तु तात्कालिकः शत्रुः । नन्वेवं चेत् चन्द्रस्य शत्रोरभावात् त्र्यंशहानिः कदापि न स्यादिति चेत् सत्यम् । न ह्ययं नियमोऽस्ति[13] त्र्यंश[14]हानिः सर्वेषां संभवतीति[15] । किन्तु यथा रवेरर्धहानिर्न संभवति तथा चन्द्रस्य त्र्यंश[16]हानिरपीति । किं च सप्तवर्गजबले "अधिशत्रुभवने रवांशकः" इति[17] चन्द्रस्यासंभवेऽपि यथाऽन्यग्रहबलार्थमुक्तं तद्वत् प्रकृतेऽप्यस्तु । तात्कालिकमैत्री हि[18] तत्रैव प्रवर्तते यत्राधिमित्राधिशत्रुविचारोऽप्यस्ति न तु केवलशत्रुमित्रविचारौ[19] । प्रकृते तु तात्-कालिकमैत्रीविचारे[20] शत्रुभेऽधिशत्रुभे च हानिविशेषेण भाव्यम् न तूभयत्र त्र्यंश एव[21] हानिः संभवतीति । श्रीमत्केशवज्योतिर्विदामप्ययमेवाशयोऽस्तीति प्रतिभाति । यतस्तैः स्वपद्धति-टीकायां शुक्र-शनैश्चरयोरर्धहान्यसंभवार्थमिदमुक्तम् । यतः शनि-सितौ सूर्य-[22] वैरिणौ ततस्तौ सूर्यसान्निध्येनास्तंगतावपि स्वायुषोऽर्धं न हरतः इति[23] । अत्र हि शुक्र-शनैश्चरयोः [सूर्य-वैरित्वादर्धहानिर्नास्तीति प्रतिपादितम् । अत्र तात्कालिकमैत्रीविचारे शुक्र-शनैश्चरयोः समतया अर्धहानिरपि स्यात् । स्वाभाविकमैत्रीविचारे तु कदापि तयोरर्धहानिर्न स्यात् । शनि-

---

1A. No अनुष्टुभा । 2B. यश्च । 3A. ०दर्ध-त्र्यंशयोरपहारकः (?) । 4B. No अपि । 5B. ०युषि त्र्यंशं । 6A. No अर्धहारकः । 7A. बन्धनीमध्ये 'अर्धं हरति' इति पाठः । 8B. बन्धनीमध्ये "शुक्रशनैश्चरौ अस्तंगतौ अर्धं न हरतात्यर्थः" इति पाठः । 9B. No गृह । 10B. No स । 11B. इतः पूर्वम् 'अर्धम्' इत्यधिकम् । 12B. अतः परं 'स्वायुषः' इत्यधिकम् । 13A. अतः परं 'यः' इत्यधिकम् । 14A. अर्ध । 15B. No इति । 16A. ०न्द्रस्यार्ध० । 17A. No इति । 18B. No हि । 19B. विचारे । 20B. विचारः । 21A. ०मेव । 22A. No 23B. No इति ।

शुक्रयोरर्धहानिः कदापि नास्तीति सर्वसंमता। तच्च[1]] स्वाभाविकमैत्र्यैव निर्वहतीति स्वाभाविकमैत्र्यैव तेषामपि संमता[2]स्तीति। अस्योदाहरणम्। अत्र[3] भौमः शत्रुगृहेऽस्ति अतो भौमायुष[4]स्त्र्यंशहानिः। तत्र भौमायुर्वर्षादि ९।२।१८।३२।१५ अस्य त्र्यंशः ३।०।३६[5]।१०।४५ अस्मिन् शोधिते जातं भौमायुर्वर्षादि ६।१।२२।२१।३० । शनिर्यद्यपि शत्रुगृहे[6] [तथापि वक्रगतिरस्तीति न त्र्यंशहानिः 'न तु वक्रचारग' इत्युक्तत्वात्। अन्ये तु शत्रुगृहे न संति[7]] गुरुस्तु अस्तंगतोऽस्ति अतः "सूर्यलुप्तकिरणोऽर्धहारक" इत्युक्तत्वात् गुरोरायुषोऽर्धहानिः। तत्र गुरोरायुर्वर्षादि ९।०।१३।४६।१५ अस्यार्धं ४।६।६।५३।७।३० अस्मिन् शोधिते जातं गुरोरायुर्वर्षादि ४।६।६।५३।७।३० । एवं गुरु-भौमयो[8]र्जातमायुः। अन्येषां तु यथा [स्थितम् एवायुः ॥२२-२३॥

मं	वृ
६	४
१	६
२२	६
२१	५३
३०	७
	३०

अथ सिंहावलोकितन्यायेन चक्रार्धहानौ विशेषम् उपजातिकयाह।—

चक्रार्धहानौ बहुषु द्वयोर्वा खचारिणोरेकगृहस्थयोस्तु।
सत्याभिधानस्य [मतेन सत्यं] स्वांशं हरत्येव
बलोत्कटो यः[9]] ॥२४॥

व्याख्या।—चक्रार्धहानौ चक्रार्धहानिसंस्कारे कर्तव्ये सति बहुषु ग्रहेषु एकराशिगतेषु अथवा द्वयोः खचारिणोः एकगृहस्थयोर्मध्ये यो बलोत्कटो ग्रहः यस्य ग्रहस्य षड्बलैक्यमधिकं भवति स एव ग्रहः स्वांशं हरति नान्य इति सत्याभिधानस्य सत्याचार्यस्य मतेन यदुक्तं तत् सत्यम्। श्रीपतेरपि इदमेव संमतमित्यर्थः। एतदुक्तं भवति। येषां ग्रहाणां हरसंभवोऽस्ति तेषां मध्ये द्वित्रादयो[10] यदा एकराशिगताः स्युस्तदा एकराशिगतानां तेषां मध्ये यस्य बलमधिकं तस्यैव हरः कार्यो नान्यस्य। हानिरपि तस्यैव कार्या नान्यस्य ॥२४॥

अथास्मिन्नेव विषये देवलमुनिमतं द्रुतविलम्बितेनाह।—

हरयुतिर्विहृता ग्रहसंख्यया स हि हरोऽपचयश्च ततः फलम्।
अधिकवीर्यवतोऽम्बरचारिणो निगदतीति मुनिः किल देवलः ॥२५॥

व्याख्या।—देवलो मुनिरिति निगदति। इतीति किम्? हरयुतिर्ग्रहसंख्यया विहृता

1B. बन्धनीमध्ये "सूर्यसम्मतास्तमयेन हानिः। अपि तत् स्वाभाविकमैत्रीविचारेऽपि कदापि तयोरर्धहानिर्न स्यात्। शनिशुक्रयोरर्धहानिः कदापि न स्यादिति। सर्वमेतच्च" इति पाठः। 2B. सम्भवो०। 3B. No अत्र। 4B. No 'ष'। 5B. २। 6B. अतः परं 'नास्ति' इत्यधिकम्। 7B. बन्धनीस्थः पाठो नास्ति। 8A. भौमगुर्वो०। 9A. बन्धनीमध्ये "चक्रार्धहानौ विशेषः खचारिणोरेकगृहे च बलोत्कटो यः स्तः" इति पाठः। 10B. अतः परं 'वा' इत्यधिकम्।

स हि हरो भवति। अथाधिकवीर्यवतः अम्बरचारिणो ग्रहस्य ततो हरात् यत् फलं सः अपचयो **हानिर्भवतीति।** एतदुक्तं भवति। देवलमतेऽपि एकराशिगतानाँ ग्रहाणां मध्ये बलोत्-**कटस्यैव चक्रार्धहानिर्भवति।** किन्तु[1] हरसाधने विशेषः। स यथा। यावन्तो ग्रहा एकराशि-**गताः सन्ति तेषां पृथक्** हराः कार्याः, तेषां हराणां योगश्च कार्यः। द्वौ ग्रहौ एकराशिगतौ चेत् **तदा स हरयोगो द्वाभ्यां** भाज्यः। ग्रहत्रयमेकराशिगतं चेत् हरयोगस्त्रिभिर्भाज्यः। [ग्रहचतुष्टयमेकराशिगतं चेद्धरयोगः चतुर्भिर्भाज्यः[2]] एवं पञ्चकादिष्वपि[3]। एवं कृते यल्लभ्यते स स्फुटहरो भवति ; तेन स्फुट-हरेण अधिकबलस्य ग्रहस्य आयुःकला भाज्याः। लब्धम् आयुःकलाभ्यः शोध्यम्। यदि हरो रूपादल्पो[4] भवेत् तदा रूपं[5] हराद्[6] विशोध्य तेन **गुणकेन** आयुःकला गुणयेत्। एवमधिकबलस्य ग्रहस्य चक्रार्धहानिः कार्येति देवलमतम्। इदं श्लोकद्वयं "एवं कार्या[7] चक्रपातार्धहानिरि"त्यतः प्राक् "शुभोनलग्ने तु[8] हरो द्विनिघ्न" इत्यस्याग्रे युक्तं भवति। अत्र तु लेखकादिदोष-वशादागतमिति प्रतिभाति ॥२५॥

अथ क्रूरे लग्नगे सति[9] पिण्डायुषि अन्यं विशेषं शालिनीद्वयेनाह।—

> लिप्तीभूतैर्लग्नभागैर्निहन्या-
> दायुर्दायं खेचराणां पृथक्स्थम्।
> व्योमाकाशर्त्विन्दुपक्षै २१६०० र्भजेत् तत्
> स्वायुर्दायाच्छोध्यमब्दादि लब्धम् ॥ २६ ॥
>
> एतत् क्रूरे लग्नगे सौम्यदृष्टे तस्माद्दायात्तत्फलार्धं विशोध्यम्।
> एतद्दाये नांशसंज्ञे विधेयं पिण्डायुर्वत् कर्म नैसर्गिकेऽपि ॥२७॥

व्याख्या।—खेचराणां रव्यादिग्रहाणां पृथक्स्थमायुर्दायं लिप्तीभूतैर्लग्नभागैर्निहन्यात् **गुणयेत्।** तथा गुणितमायुर्दायं व्योमाकाशर्त्विन्दुपक्षैः २१६०० भजेत् तत् अब्दादिकं **वर्षादिकं** लब्धं स्वायुर्दायात् शोध्यम्। एतत् सर्वदा न कार्यं किन्तु क्रूरे ग्रहे लग्नगे **सति कार्यम्।** एतदुक्तं भवति। भावचक्रे लग्ने यदि पापग्रहो भवेत् तदा लग्नस्य **राशिं**[10] दूरीकृत्य भागादिकस्य कलाः कार्याः ; ताभिः कलाभिः सूर्यस्य आयुर्दायो गुणनीयः। व्योमाकाशर्त्विन्दुपक्षै-२१६०० भाज्यः लब्धं वर्ष-मास-दिन-घटी-पलात्मिकं ग्राह्यम्, तत् सूर्यस्यायुर्दायात् शोध्यम्। शेषं रवेः स्फुटमायुर्भवति। एवं चन्द्रादीनामप्यायुर्दायाः स्फुटाः कार्याः। नायं संस्कारो लग्नायुषः "खेचराणामि"त्युक्तत्वात्। अथ लग्नगे पापग्रहे सौम्यदृष्टे सति विशेषमाह। सौम्यदृष्टे तस्माद्दायात् तत् फलार्धं[11] विशोध्यमिति। लग्नगे पापे सौम्यदृष्टे सति यदागतं वर्षादि लब्धं तत् पूर्णं[12] न शोध्यं किन्तु तस्यार्धमेव शोध्यमिति।

1A. No किन्तु। 2A. बन्धनीस्थः पाठो नास्ति। 3A. चतुष्टयादिकेऽपि। 4A. रूपाल्पो। 5A. हरः। 6A. रूपाद्। 7B. अतः परं 'च' कारोऽधिकः। 8B. No तु। 9B. No सति। 10B. राशीन्। 11B. पादार्धं। 12A. सम्पूर्णेन।

अत्र संस्कारेऽन्यैर्विशेष उक्तोऽस्ति। स यथा। यदिह[1] वर्षादि लब्धं तत लग्नग-पापग्रहस्य भावफलेन गुणितं सत् शोध्यं, पापे[2] सौम्यदृष्टे सति तस्यार्धं शोध्यम्। इदमनुपातसिद्धं युक्तमिति प्रतिभाति। अथ यदि लग्ने [द्वौ त्रयो वा[3]] पापाः सन्ति तर्हि तेषु बलाधिकस्य भावफलेन वर्षादि लब्धं[4]-गुणितं सत् शोध्यम्। [अथ बलसाम्यं चेत् यस्य पापस्य भावफलमधिकं तस्य भावफलेन गुणितं सत् शोध्यम्[5]।] अत्रान्योऽपि[6] विशेषो ज्ञेयः। लग्नगः पापो यदि लग्नेशो भवति तदेयं हानिर्न कार्या। "यो यो भावः स्वामि[7]दृष्टो युतो वे"त्यादिना तस्य पुष्टत्वप्रतिपादनात्।

एतत् सर्वमुक्तं ह्यालुग[8]पद्धतौ—

लग्ने चेदशुभस्तदोदयग्रहान् हित्वा शनिघ्नं फलं
क्रूरस्योदयभावजं यदि तनौ द्वौ ते बलिष्ठस्य च।
चेत् साम्येऽधिकभावजेन बलयोस्तेन ग्रहायुःकला
निघ्नाः खाभ्ररसेन्दुदस्र २१६०० विहृता लब्धं त्यजेत् स्वायुषः॥
क्रूरः सोऽपि शुभेक्षितो यदि तदा तल्लब्धखण्डं त्यजे-
न्नैतत् कर्म विलग्नगे तनुगते क्रूरेऽपि नाशायुषि[9]॥

तथा श्रीकेशवीयपद्धतावपि—

दायाँशा द्युसदां पृथक् तनुलवा दिग् १०घ्नाः[10] खषट्त्र्यद्धृता३६०,
आप्तघ्नोनास्तनुगे[11] खले यदि च सद्दृष्टेऽर्धयाऽथापरे[12]।
निघ्नोग्रोदयभावजेन तनुगोग्रौ चेद्बलिष्ठस्य तत्-
साम्ये पुष्टफलेन नेति तनुपेऽस्मिन्नांशजेऽसौ क्रिया।

तथा रामकृष्णपद्धतावपि—

क्रूरे लग्नोत्थं फलं भावजं यत् पूर्णं न्यूनं चेति मध्येऽनुपातात्।
एवं लब्धेनोनिताश्चायुरंशाः खेटानां तद्युक्तियुक्तं यतः स्यात्॥ इति।

यदिदमुक्तं[13] तदंशायुर्दाये न कार्यमित्याह एतद्दाये नांशसंज्ञे विधेयमिति। "शत्रुक्षेत्रे हानिरस्तंगतस्य हानिः पापे लग्नगे चापि हानि"रिति एतद्धानित्रयं पिण्डायुषि यदुक्तं तत् अंशसंज्ञायुर्दाये न विधेयं न कार्यमिति। अथ नैसर्गिकमायुर्दायमाह पिण्डायुर्वत् कर्म नैसर्गिकेऽपि। नैसर्गिकेऽप्यायुर्दाये पिण्डायुर्वत् कर्म कार्यम्[14]। नैसर्गिकायुर्दायसाधने "कलीकृतः सन् गुणितो निजाब्दैरि"त्यत्र "नखा[:]शशी द्वौ नवकं धृतिश्चे"ति वक्ष्यमाणाब्दा ग्राह्याः न तु "नवेन्दवो बाणयमा" इत्यादयः। अन्यत् सर्वमपि पिण्डायुर्वदेव कार्यमिति॥ २६-२७॥

1B. No ह। 2A. No पापे। 3B. बन्धनीस्थः पाठो नास्ति। 4B. No वर्षादि लब्धं। 5B. बन्धनीस्थः पाठो नास्ति। 6B. No अपि। 7A. सौम्य। 8B. हालुंगि। 9A. तास्वायुषि। 10B. दिघ्ना। 11B. ०नस्तनुगे। 12B. यद्यापरे। 13B. यदि युक्तं। 14B. अतः परम् 'इति' इत्यधिकम्।

अथ नैसर्गायु[1]र्दाये निजतुङ्गगानां रव्यादीनां[2] वर्षाणि उपजातिकयाह ।—

नखाः शशी द्वौ नवकं धृतिश्च
कृतिः खबाणा २०।१।२।९।१८।२०।५० रविपूर्वकाणाम् ।
इत्थं निरुक्ता क्रमशो ग्रहाणां
नैसर्गिके ह्यायुषि वर्षसंख्या ॥ [२८ ॥]

व्याख्या ।—नैसर्गिकेऽप्या[3]युषि रविपूर्वकाणां ग्रहाणां[4] वर्षसंख्या इत्थं क्रमशो निरुक्ता । इत्थं कथम् ? नखाः २० सूर्यस्य, शशीति एकं१ वर्षं चन्द्रस्य[5] । द्वौ २ भौमस्य, वर्षनवकं ९ बुधस्य, धृतिरिति १८ अष्टादश वर्षाणि गुरोः, कृतिरिति विंशतिः वर्षाणि शुक्रस्य, खबाणा इति पञ्चाशद् वर्षाणि शनेः इति । अथ नैसर्गिकायुर्दायोदाहरणं लिख्यते । तत्र राश्यादिको रविः ७।१७।१९।२५ [निजोच्चात् ०।१।०।० शुद्धः २२।४०।३५ ; अयं षड्भवनोनकोऽस्ति अतो भमंडलात् शोधितः ७।७।१९।२५[6]] कलीकृतः १३०३९।२५ एता जाता आयुःकलाः । एताश्चक्रार्धहान्या संस्कृताः कार्याः[7] परं तु रवेरत्र हरसंभवो नास्ति अतो यथास्थिता एव रवेः । भौमगुरुशुक्राणामपि हराभावाद्यथास्थिताः । चन्द्रबुधशनीनामत्र हरसंभवात्तेषामायुःकलाश्चक्रार्धहानिसंस्कृताश्च लिख्यन्ते । अथ रवेरायुःकलाः

रवि	चन्द्र	भौम	बुध	गुरु	शुक्र	शनि
१३०३९ २५	२२४८ २२	१३३७४ ८	१५१८४ ३६	१३०१५ ५	१११९५ २०	६१०२ ३६

१३०३९।२५ रवेर्निसर्गायुर्वर्ष-[8] २० गुणिताः २६०७८०[9] । [५०० षष्ट्या लब्धम् उपरि योजिते जाताः २६०७८८।२०[10]] खाभ्ररसचन्द्रलोचनै २१६०० र्भक्ता लब्धं वर्षाणि १२ । शेषम् १५८८[11] । २० अष्टादशशतैर्विभज्य [लब्धं मासाः ० । शेषं १५८८।२०[12]] षष्ट्या भक्तं जातं दिनादि २६।२८।२० एवं रवेर्वर्षादिकं जातं निसर्गायुः १२।०।२६।२८।२० । एवं जातानि चन्द्रादीनामपि । अथ भौमः शत्रुगृहेऽस्ति अतः "त्र्यंशकं हरति शत्रुभे ग्रह" इति त्र्यंशो हानिः । तत्र भौमायुर्दायः १।२।२२।२८।१८ । अस्य त्र्यंशः ०।४।२७।२९।२६ । अस्मिन् भौमायुः शोधितं जातं भौमायुः ०।९।२४।५८।५२ ; शनिर्यद्यपि शत्रुगृहेऽस्ति तथापि वक्रगतिरस्ति अतो "न तु वक्रचारग" इत्युक्तत्वात् न हानिः । गुरुरस्तंगतोऽस्ति अतः [सूर्यलुप्तकिरणोऽर्धहारक" इति गुरोरायुषोऽर्धहानिः, तथा सति जातं गुरोरायुः ५।५।२।१५।४५ । अन्येषां

1B. ०र्गिकायु० । 2B. No रव्यादीनां । 3B. No अपि ; मूले 'हि' इति पाठो वर्तते । 4A. No ग्रहाणां । 5B. No चन्द्रस्य । 6B. बन्धनीस्थः पाठो नास्ति । 7B. संस्कार्याः । 8B. नैसर्गिकायुर्वर्षैः । 9B. २६०२८० । 10B. बन्धनीस्थः पाठो "लब्धं वर्षाणि १२" इत्यतः परं वर्तते, तत्रापि 'योजिते' इत्यत्र 'संयोज्य' इति पाठः । 11B. ५८८ । 12B. बन्धनीस्थः पाठो नास्ति ।

तु हानिर्नास्त्येव। लग्ने तु पापग्रहोऽस्ति अतः[1]] सापि हानिर्नास्ति। तस्माद् भौमगुर्वोरेव[2] हानिसंस्कृतौ आयुर्दायौ लिख्येते[3]। अन्येषां तु यथास्थित एव ॥२८॥

एवं अंशायुः पिण्डायुर्निसर्गायु[श्च साधितम्। तत्र कदा[4]] किं प्रमाणमितीन्द्रवज्रयाह।—

अंशोद्भवं लग्नबलात् प्रसाध्यमायुश्च पिण्डोद्भवमर्कवीर्यात्।
नैसर्गिकं चन्द्रबलाधिकत्वे ब्रूमस्त्रयाणामथ वीर्यसाम्ये ॥२९॥

मं	गु
०	५
९	५
२४	२
५८	१५
५२	४५

व्याख्या।—लग्नबलात् अंशोद्भवमायुः[5] प्रसाध्यम्। अयमर्थः सूर्यचन्द्रबलापेक्षया [लग्नबलमधिकं यदि भवति[6]] तदा अंशायुर्दायः प्रमाणम्। अतोंऽशायुरेव तदा साध्यं नान्यत्। अथ अर्कवीर्यात् पिण्डोद्भवमायुः प्रसाध्यम्। अयमर्थः। [चन्द्रलग्नबलापेक्षया सूर्य[7]]बलमधिकं यदा भवति तदा पिण्डायुरेव प्रमाणमिति। [अथ सूर्यलग्नबलापेक्षया चन्द्रबलाधिकत्वे सति नैसर्गिकमायुः साध्यम्[8]]। अथ रविचन्द्र[9]लग्नानां बलसाम्ये सति किं कार्यमित्याह—ब्रूमस्त्रयाणामथ वीर्यसाम्ये इति ॥२९॥

तदेवे[10]न्द्रवज्रयोपजातिकया[11] चाह।—

अंशोद्भवं लग्नबलेन हन्यात् पिण्डाख्यमायुश्च बलेन भानोः।
नैसर्गिकं चन्द्रमसो बलेन सर्वाण्यथैकत्र निधापयीत[12] ॥३०॥
विलग्न-तिग्मांशु-हिमद्युतीनां हरेद्बलैक्येन ततो[13] यदाप्तम्।
वर्षाद्यमायुस्तदिदं[14] स्फुटं स्याच्छ्रीनीलकण्ठादय एवमूचुः ॥३१॥

व्याख्या।—यदि रविचन्द्रलग्नानां वीर्यसाम्यं भवेत् तदा प्रथमतः आयुर्दायत्रयमपि साध्यम्। अथ तन्मध्ये अंशोद्भवम् आयुः लग्नबलेन हन्यात् गुणयेत्। तथा पिण्डाख्यमायुः भानोर्बलेन गुणयेत्[15]। तथा नैसर्गिकमायुश्चन्द्रमसो बलेन गुणयेत्। अथ [गुणनानन्तरं सर्वाणि त्रीण्यपि आयूंषि निधाय [निधापयीत] स्थापयेत्[16]] गुणितानां तेषां त्रयाणामपि ऐक्यं कुर्यादित्यर्थः। ततस्तदनन्तरं विलग्न-तिग्मांशु-हिमद्युतीनां लग्न-सूर्य-चन्द्राणां बलैक्येन हरेत्, यदाप्तं लब्धं वर्षाद्यं तत् इदं[17] स्फुटमायुः स्यात्। एवं श्रीनीलकण्ठादय आचार्या ऊचुः। अत्र रविचन्द्रलग्नानां यद्यपि वीर्यसाम्यं नास्ति तथापि वीर्यसाम्यं प्रकल्प्य उदाहरणं लिख्यते। तत्र कल्पितं रविबलं ६।०।०, चन्द्रबलं

1B. बन्धनीस्थः पाठो नास्ति। 2A. ०गुरू एव। 3B. No लिख्येते। 4A. बन्धनीस्थः पाठो नास्ति। 5B. ०द्भवायुः। 6A. बन्धनीमध्ये 'लग्नमधिकबलं भवति' इति पाठः। 7B. बन्धनीमध्ये 'सूर्यबलापेक्षया चन्द्र' इति पाठः। 8B. बन्धनीमध्ये 'तदेव साध्यं नान्यत्' इति पाठः। 9B. No रविचन्द्र। 10B. No तदेव। 11B. No उपजातिकया। 12B. विधाय तानि। 13B. तयोः। 14B. ०विह। 15B. हन्यात्। 16A. बन्धनीस्थः पाठो नास्ति। 17B. इह।

६।०।० लग्नवलं ६।०।० अत्र[1] रवेरंशायुः १०।१।२६।४३।४८, रवेः पिण्डायुः ११।५।१९।८।५५, रवेर्निसर्गायुः १२।०।२६।२८।२० ; अंशोद्भवम् आयुर्लग्नबलेन ६।०।० गुणितं ६०।११।१०।२२।२८, तथा[2] पिण्डायुः सूर्यबलेन ६।०।० गुणितं ६८।९।२४।५३।३०, तथा निसर्गायुश्चन्द्रबलेन ६।०।० गुणितं ७२।५।८।५०, गुणितानां त्रयाणामैक्यं १०।२।१४।६।१८,(?) इदं विलग्न-तिग्मांशु-हिमद्युतीनां बलैक्येन १८ भक्तं लब्धं वर्षादि ११।२।२४।७।१ ; इदं जातं रवेः स्फुटमायुः। एवं चन्द्रादीनामपि साध्यम्। अत्र रविचन्द्रलग्नबलानां स्वल्पेऽन्तरेऽपि साम्यं ज्ञेयमिति श्रीपतेराशयोऽवगम्यते। अन्यथा "अंशोद्भवं लग्नबलेन हन्यादि"त्यादिकमुक्तं न स्यात्, किन्तु कस्यचिद्बलेन गुणयेदित्येवोक्तं स्यात्। किञ्च[3] एतावता गौरवेण? किन्तु आयुस्त्रयैक्यं[4] कृत्वा त्रिभिर्भजेदित्येवोक्तं स्यात्। नहि[5] सर्वथा बलसाम्येऽनेन विधिना किंचिदन्तरं भवति[6]। तथा हि रवेरंशायुः १०।१।२६।४३।४८ रवेः पिण्डायुः ११।५।१९।८।५५ रवेर्निसर्गायुः १२।०।२६।२८।२० एतेषामैक्यं ३३।८।१२।२१[7]।३। त्रिभिर्भक्तं लब्धं वर्षादि[8] तदेव ११।२।२४।७।१ इति। बलानां स्वल्पेऽन्तरे तु[9] अनेन विधिनाऽन्तरं भवतीति गौरवमङ्गीकृतमिति ।।३१।।

अथ जीवशर्मोक्तस्य आयुषो विषयं स्वागतयाह ।—

लग्नसूर्यशशिनो बलशून्याः स्युर्यदाऽत्र परमायुरगांशम् ।
सर्व एव खचरा ददतीदं जीवशर्मगदितं हि तदाऽऽयुः ।।[३२]।।

व्याख्या।—तदा सर्वे खचराः रव्यादयः सप्त ग्रहाः इदं जीवशर्मगदितमेव[10] आयु[11]र्ददति नान्यत्। इदं किम्? परमायुरगांशम्। परमायुस्तु "समाः षष्टिर्द्विघ्ना मनुजकरिणां पञ्च च निशा" इत्यादि वराहेणोक्तम्। तत्र[12] मनुष्याणां परमायुर्वर्षादि १२०।०।५ अस्य अगांशं सप्तमांशम् १७।१।२२।८।३४ एतद्वर्षादं निजतुङ्गगानां रव्यादीनां प्रत्येकं भवति। अन्यत्र[13] तु "निजोच्चशुद्धः खचर" इत्यादिनाऽनुपातेन साध्यम्। तत्र "गुणितो निजाब्दैरि"त्यत्र सर्वेषामपि सावयवा[14] एते अब्दा ज्ञेयाः १७।१।२२।८।३४ ; अन्यो विधिः पिण्डायुर्वदेव। अयमायुर्दायः कदा कार्य इत्याह लग्नसूर्यशशिनो बलशून्याः स्युर्यदे[15]ति। यदा लग्नसूर्यचन्द्रा बलशून्याः स्युः हीनबला[:] स्युरित्यर्थः। नहि शून्यबलं कदापि संभवति नैसर्गिकबलस्य सदा स्थिरत्वात्[16]। हीनबलत्वं च बले रूपत्रयाद्धीने सति ज्ञेयम्। तदुक्तं दामोदरपद्धतौ।—

रूपत्रयाल्पं किल षड्बलैक्यं भवेद्विलग्नस्य खगस्य यस्य।
स्वस्वामिना नो सहितो न दृष्टः स हीनवीर्यः कथितो मुनीन्द्रैरिति ।।

1B. No अत्र। 2B. No तथा। 3B. किन्तु। 4B. ०स्त्रैक्यं। 5B. तर्हि। 6B. ०तीति। 7B. ३१। 8B. ०दिकं। 9B. No तु। 10B. No एव। 11B. No आयुः। 12B. अत्र। 13B. अत्र। 14A. संचया। 15B. No स्युर्यदा। 16B. सत्वात।

केशवीयपद्धतावपि ।—

त्र्यल्पे[1] हीनबलो बली षडधिके वीर्ये ग्रहश्चोदय इति ।।[के०प० २६]

तस्माल्लग्नसूर्यचन्द्राः यदा रूपत्रयादल्पबलाः स्युः तदा जीवशर्मोक्तमायुः कार्यमिति सिद्धम् ।।३३।।

अथेदमायुर्यद्यपि पिण्डायुर्वत् सिध्यति, तथापि अब्दानां सावयवत्वेन कर्मगौरवं स्यादिति भुजङ्गप्रयातद्वयेन तत्साधनमन्यथाह ।—

ग्रहः स्वोच्चहीनः स चेत् षड्भहीनो
भचक्राद्विशोध्योऽथ भागीकृतोऽसौ ।
कुवेदर्तुनागै ८६४१ र्हतो वेदखाक्षै-५०४
र्विभक्तो दिनाद्यं भवत्येवमायुः ।।३३।।

अहोभ्यः खरामै३०र्हृतेभ्योऽथ मासाः पतङ्गैश्च तेभ्यो भवेयुस्तदाऽब्दाः ।
भचक्रार्धहान्यादिकोऽन्यो विधिर्यः स पिण्डोद्भवे यद्वदुक्तस्तथैव ।।३४।।

व्याख्या ।—ग्रहः स्वोच्चहीनः [कार्यः, स स्वोच्चहीनो ग्रहश्चेत् षड्भहीनः[2]] षड्भाल्पो भवति तदा भचक्राद्विशोध्यः । अथानन्तरं असौ ग्रहः भागीकृतः ततः कुवेदर्तुनागैः ८६४१ हतः गुणितः ततो वेदखाक्षैः ५०४ विभक्तः[3] लब्धं दिनाद्यमायुर्भवति । अथ अहोभ्यः दिनेभ्यः खरामै ३० र्हृते सति यल्लब्धं[4] ते[5] मासाः भवन्ति । शेषा दिवसाः । अथ[6] तेभ्यो मासेभ्यः पतङ्गैः १२ द्वादशभिर्हृते सति यल्लब्धं [ते अब्दा[7]] वर्षाणि भवन्ति, शेषं मासाः । एवं वर्षादिकमायुर्भवति । अथात्रान्यो विधिः यद्वत् पिण्डोद्भवे उक्तस्तथैव कार्यः । कोऽसौ विधिरित्याह । भचक्रार्धहान्यादिक इति । चक्रपातार्धहानिः, शत्रुक्षेत्रहानिः, अस्तंगतस्य हानिः, पापे लग्नगे सति हानिरिति हानिचतुष्टयं पिण्डायुषि यथोक्तं तथैवात्रापि कार्यम् । अत्र सर्वत्र हानिचतुष्टयमपि यथासम्भवम् आयुःकलानामेव कृत्वा पश्चाद्वर्षाद्यं क्रियते चेत् सम्यग्भवति । जीवशर्मोदिते तु "भागीकृतोऽसौ" इत्युक्तत्वात् आयुरंशानामेव यथासंभवं हानिं कृत्वा वर्षाद्यमायुः कार्यमिति । अथात्रोदाहरणं कल्प्यते[8] । रवेः षड्बलैक्यं २।५७।१, चन्द्रस्य २।४५।१८, लग्नस्य २।५५।० ; अत्र त्रयाणामपि अल्पबल[9]त्वात् जीवशर्मोदितमायुर्युक्तम् । तत्र कल्पितस्फुटोऽर्कः ६।१०।०।० रवेरुच्चं ०।१०।०।० लग्नं ८।१०।०।० ग्रहः स्वोच्चहीन इति जातं ६।०।०।० अयं षड्भहीनो नास्ति अतो यथास्थित एव भागीकृत; १८० एते जाता आयुरंशाः । एतेषां यथासंभवं हानिः कार्या । अत्र "लग्नं ग्रहोनं यदि षड्गृहेभ्यो हीनमि"त्या[10]दिना जातो हरः २।० आयुरंशाः १८० हरभक्ते[11] लब्धं ९० आयुरंशेभ्यः १८० शोधि ता[12] जाताश्चक्रार्धहानिसंस्कृता आयुर्लवाः[13] ९० ।

1A. अल्पे । 2A. बन्धनीस्थः पाठो नास्ति । 3B विभक्ता । 4B. No यत् । 5B. No ते । 6B. No अथ । 7B. बन्धनीस्थः पाठो नास्ति । 8B. No कल्प्यते । 9B. No बल । 10A. हीनांशमित्या० । 11B. भक्ता । 12A. तं । 13B. आयःकलाः ।

अथ रविः शत्रुगृहेऽस्ति अत"स्त्र्यंशकं हरति शत्रुभे ग्रहः" इति त्र्यंशो ३० हानिः, हानिसंस्कृता जाता आयुरंशाः ६० ; यत्रान्यापि हानिः संभवेत् तत्र सापि आयुरंशानामेव कार्या। अथायुरंशगणः[1] ६० कुवेदर्तुनागैः ८६४१ हतः जातः ५१८४६० वेदखाक्षै ५०४ भक्ते लब्धं दिनादि १०२८[2]।४१।२५ । अथ "अहोभ्यः खरामैर्हृत" इति दिनेषु त्रिंशद्भक्तेषु लब्धा मासाः ३४, शेषं दिवसाः ८ । अथ "पतंगैस्तु तेभ्य" इति मासेषु द्वादशभक्तेषु लब्धानि वर्षाणि २, शेषं १० मासाः ; एवं जातं वर्षादि ।२।१०।८।४१।२५ ; अत्र सुगमोपायः ।—

आयुर्लवाः स्वर्गभक्ता २१ लब्धमायुःसमादिकम् ।
आयुर्लवा अष्ट ८ भक्ता लब्धं घट्यादिना युतम् १० ॥३३–३४॥

[अथ पिण्डजे नैसर्गिके जीवशर्मोदिते आयुर्दाये लग्नायुःसाधनमिन्द्रवज्रयाऽऽह ।—[3]]

आयुस्तथतेषु बल[ा]ढ्यलग्ने त्यक्त्वा तु राशीन् कृतलिप्तिकेऽत्र ।
भक्ते द्विशत्या फलमब्दपूर्वं यत् स्याद् विलग्नायुषि तच्च योज्यम् ॥३५॥

व्याख्या ।—एतेषु पिण्ड-निसर्ग-जीवशर्मोदितेष्वायुर्दायेषु आयुर्लग्नायुः तथा अंशायुर्दायवत् कार्यम् । किंतु बलाढ्यलग्ने षडधिकबले लग्ने विशेषोऽस्ति। अंशा[4]युर्दाये "लग्ने तु वीर्याभ्यधिके भतुल्यैर्वर्षैर्युतं तस्य विधेयमायुरि"ति यत् कृतं तदत्र न कार्यं किंतु लग्नस्य राशीन् त्यक्त्वा अत्र भागादिके कृतलिप्तिके कलीकृते सति तथा द्विशत्या भक्ते सति अब्दपूर्वं वर्षादिकं फलं यत् स्यात् तद्विलग्नायुषि योज्यमिति। अस्योदाहरणम् । "लग्नस्य लिप्ताः खखसिद्धभक्ता" इत्यादिना अंशायुर्दायोक्तविधिना जातं लग्नायुः वर्षादिकं ७।५।२३।३८।२४ अत्र लग्नबलं ९।१०।२१ षडधिकमस्ति। अतो बलाढ्यलग्नम्[5] किंतु "लग्ने तु[6] वीर्याभ्यधिके भतुल्यैर्वर्षैर्युतं तस्य विधेयमायुरि"ति प्रागुक्तसंस्कारो न क्रियते अपि तु[7] "त्यक्त्वा तु राशीनिति" संस्कारः क्रियते। तद् यथा। अत्र लग्नं २।४।५६।२८ राशीन् त्यक्त्वा शेषं भागादि ४।५६।२८ [अस्मिन् कलीकृते २९६।२८ द्विशत्या भक्तं लब्धं वर्षाणि १। शेषं ९६।२८ द्वादशगुणं ११५२।३६[8]] षष्ट्या लब्धम् ५ उपरि संयोज्य जातं ११५७।३६ ; पुनः द्विशत्या भक्ते लब्धं[9] मासाः ५, शेषं १५७।३६ त्रिंशद्गुणं ४७१०।१०८० षष्ट्या लब्धं १८ उपरि संयोज्य जातं ४७२८।० ; पुनः द्विशत्या भक्ते लब्धं दिवसाः २३। शेषं १२८ षष्टिगुणं ७६८० द्विशत्या भक्ते लब्धं घटिकाः ३८। शेषं ८० षष्टिगुणं ४८०० द्विशत्या भक्तं लब्धं पलानि २४। एवं लब्धं वर्षादि १।५।२३।३८।२४। अस्मिन् प्रागानीतलग्नायुषि ७।५।२३।३८।२४ योजिते जातं पिण्डायुर्दाये स्फुटं लग्नायुः ८।११।१७।१६।४८ [अथ सर्वे आयुर्दाया[10] लिख्यन्ते[11]] । अत्र तु लग्नस्य बलाधिकत्वात् श्रीमन्नवावखानिखानानामंशायुः प्रमाणम्। अन्यदुदाहरणार्थमेव[12]। रव्यादीनां पिण्डायुर्दाय[13]स्तद्योगश्च।

1B. गुणः। 2A. १०।२८। 3A. बन्धनीमध्यस्थः पाठो नास्ति। 4B. No अंश। 5A. No "अतो बलाढ्यलग्नम्"। 6B. No तु। 7B. No अपि तु। 8A. बन्धनीस्थः पाठो नास्ति। 9B. No लब्धं। 10A. अतः परम् 'एकत्र' इत्यधिकः पाठः। 11. बन्धनीस्थः पाठः B-पुस्तके "अन्यदुदाहरणार्थमेव" इत्यतः परं वर्तते। 12B. अतः परम् "अथ पिण्डनिसर्गजीवशर्मोदितायुर्दाया" इत्यधिकः पाठः। 13A. No दाय।

रव्यादीनामंशायुः　　　　　　　　　　　　पिण्डायुः

र	चं	म	बु	बृ	शु	श	ल	योग		र	चं	मं	बु	बृ	शु	श	ल	योग
१०	०	१३	४	१७	१४	०	९	६९	अय-	११	१४	६	८	४	१०	५	८	७०
१	१	७	३	७	२	५	७	११	मंशा-	५	५	१	५	६	१०	७	११	६
२६	१	२८	१७	८	२	५	२२	२५	युस्त-	१९	१३	२२	७	६	१७	२४	१७	८
४३	५६	४९	७	२१	५३	५	५६	३७	दग्रोग-	८	५४	२१	७	५३	४०	११	१६	३३
४८	४९	४७	४७	३१	५	४०	०	४०	श्च	५५	४	३०	१२	७	०	४०	४८	१६

नैसर्गिकायुः　　　　　　　　　　　　जीवशर्मोदितायुः

र	चं	मं	बु	बृ	शु	श	ल	योग		र	चं	मं	बु	बृ	शु	श	ल	योग
१२	०	०	९	५	१०	१४	८	६१		१०	९	७	१२	५	८	४	८	६७
०	९	९	३	५	४	१	११	८		४	१०	०	०	१	१०	१०	११	२
२६	२८	२४	२७	२	११	२५	१७	३		६	२८	८	१९	२९	१८	३	१७	११
२६	९	५८	५७	१५	६	२९	१६	३५		०	४९	४३	१६	३१	२९	४८	१६	५४
२०	२२	५२	५४	४५	४०	१०	४८	३१		१	२१	०	१२	२४	२	२६	४८	१६

[अथ पिंडनिसर्ग[1]] जीवशर्मोदितायुर्दायेषु लग्नायुर्दायानयने मतभेदोऽस्ति[2] । स प्रसंगाल्लिख्यते[3] । तत्र बहवो लग्ननवांशतुल्यं वदन्ति १ । केचिल्लग्नराशितुल्यं वदन्ति २ । केचिदंशनाथे बलिनि राशितुल्यं वदन्ति ३ । इति मतत्रयमस्ति । तत्र प्रथममते दामोदरः ।—

विहाय राशीन् खखनेत्र २०० भक्ता[त्] लिप्तागणादब्दमुखं यदाप्तम् ।
आयुर्विलग्नस्य विधयमेवं पैण्डे निसर्गे किल जीवशर्म[4] ॥१॥

लघुपद्धतावपि ।—

लग्नं राशिविवर्जितं कृतकलं खाभ्राश्विभिर्भाजयेत्[5]
वर्षाद्यं कथितं तदायुरिति ॥

श्रीधरोऽपि ।—दायः स्यादंशतुल्यश्च पैण्डे नैसर्गसंज्ञके ।

इति । प्रथममतं बहुसंमतमस्ति । द्वितीयमतं तु पिंडायुषोऽवसरे श्रीवराहेण प्रदर्शितम् । "होरा त्वंशप्रतिममपरे राशितुल्यं वदन्ति" । अथ तृतीय [मते कल्याणवर्मा लग्नदायोऽशतुल्यः स्यादन्तरे चानुपाततः । तत्पतौ[6]] बलसम्पन्ने[7] राशितुल्यश्च भाधिपे ॥ होरामकरन्दे गुणाकरोऽपि ।—

1B. बन्धनीस्थः पाठो नास्ति । 2B. भेदो नास्ति । 3B. स प्रसङ्गो लिख्यतेऽत्र । 4B. संज्ञे । 5B. ०भिर्जायते । 6A. बन्धनीस्थः पाठो नास्ति । 7B. ०लसंयुक्ते ।

अंशेश्वरे बलिनि भागसमाः समाः स्युः पत्यौ ग्रहस्य सबले भवनप्रमाणाः ।
मध्येऽनुपातविधिरत्र विलग्नदाये ।। इति[1] ।

श्रीपतेस्तु चतुर्थमतं तत्तु उदाहृतमेव ।।३५।।

अथ रविचन्द्रलग्नानां मध्ये एकस्य न्यूनं बलं तदपेक्षया द्वयोरधिकं बलमस्ति किंतु सममेव तत्र कथमायुः कार्यं तदुपजातिकयाह ।—

लग्नार्कयोरर्कशशाङ्कयोश्च लग्नोडुपत्योर्यदि वीर्यसाम्यम् ।
तदायुषोरैक्यदलं भवेद् यत्तच्छ्रीधराद्यैः स्फुटमायुरुक्तम् ।।३६।।

व्याख्या ।—लग्नार्कयोः अर्कशशाङ्कयोश्च[2] लग्नोडुपत्योर्वा यदि वीर्यसाम्यं भवेत् तर्हि तदायुषोः ययोर्वीर्यसाम्यमस्ति तदीययोरायुर्दाययोरैक्यस्य दलं यद् भवेत् तत् स्फुटमायुः श्रीधराद्यैः उक्तम् । एतदुक्तं भवति । यदि लग्नार्कयोर्वीर्यसाम्यमस्ति चन्द्रस्य तु बलमधिकं तत्र चन्द्रमस एव बलाधिक्या"न्नैसर्गिकं चन्द्रबलाधिकत्वे"इत्युक्तत्वात् नैसर्गिकायुरेव प्रमाणम् । यदि तु लग्नार्कयोर्वीर्यसाम्यमस्ति चन्द्रस्य ततो न्यूनं बलं तत्र लग्नस्य बलाधिक्यादंशायुर्वा स्यात् सूर्यस्य बलाधिक्यात् पिंडायुर्वा स्यात्[3], एवं संशये अंशायुःपिंडायुर्दाययोरैक्यस्य दलं स्फुटमायुरुक्तम् । [अनयैव युक्त्या लग्ने न्यूनबले सति अधिकबलयोरर्कशशांकयोर्यदि वीर्यसाम्यमस्ति तर्हि पिंडनिसर्गायुषोरैक्यदलं स्फुटमायुरुक्तम्[4] ।] एवमेव सूर्ये न्यूनबले सति अधिकबलयोर्लग्नचन्द्रयोर्यदि[5] साम्यमस्ति तर्हि अंशायु[6]र्निसर्गायुषोरैक्यदलं स्फुटमायुरुक्तमिति ।।३६।।

नन्विदं गणितागतमायुः प्रमाणं चेत्तर्हि कुत्रचित् संवादि [कुत्रचिद्विसंवादि[7]] कथं भवतीत्याशंक्य वसन्ततिलकाऽनुष्टुभाभ्यां निराकरोति ।—

ये धर्मकर्मनिरता विजितेन्द्रिया ये ये पथ्यभोजनजुषो[8] द्विजदेवभक्ताः ।
लोके नरा दधति ये कुलशीललीलां तेषामिदं कथितमायुरुदारधीभिः ।।३७।।

[ये पापलुब्धाश्चौरा ये देवब्राह्मणनिन्दकाः ।
बह्वाशिनश्च ये तेषामकालमरणं ध्रुवम् ।।३८[9]]

व्याख्या ।—इद[10]मंशायुःप्रभृति गणितागतायुः[11] उदारधीभिः सुबुद्धिभिराचार्यैः तेषां नराणां कथितम् । [तेषां केषाम् ?[12]] ये नरा धर्मकर्मनिरताः [स्वस्ववर्णधर्मेषु[13]] स्व-स्वाश्रमधर्मेषु च तत्पराः सन्ति । तथा ये नराः विजितेन्द्रिया भवन्ति । तथा ये नराः पथ्यभोजनजुषः पथ्यं हितं यद् भोजनं तत् [जुषन्ते] सेवन्ते । तथा ये नराः

1B. No इति । 2A. ०र्वा । 3A. इति । 4B. बन्धनीस्थः पाठो नास्ति । 5A. अतः परं 'च'कारोऽधिकः । 6A. No आयुः । 7B. बन्धनीस्थः पाठो नास्ति । 8A. रता । 9A. बन्धनीस्थः श्लोको नास्ति । 10A. यदिद० । 11B. ०तमायुः । 12B. बन्धनीस्थः पाठो नास्ति । 13B. बन्धनीस्थः पाठो नास्ति ।

द्विजदेवभक्ताः ब्राह्मणभक्तिं देवभक्तिं[1] च ये कुर्वन्ति। तथा ये नराः लोके कुलशील-लीलां दधति स्वकुलस्य शीलयुक्तां लीलां दधति. तेषामेव नराणां गणितागतमायुर्भवति। अन्येषां तु न भवतीत्याह। ये[2] पापलुब्धा इति। ये नराः पापलुब्धाः भवन्ति, तथा ये नराश्चौरा भवन्ति, तथा ये नरा देवब्राह्मणनिन्दका भवन्ति, तथा ये नरा बह्वाशिनः स्वोचिताहारादधिकं भक्षयन्ति तेषां नराणां ध्रुवं निश्चितम् अकालमरणं भवति, गणितागते[3] आयुषि बहुतरे सत्यपि [ते] अकस्मादेव म्रियन्त इत्यर्थः ॥३८॥

[इति श्रीवल्लालदैवज्ञात्मज-कृष्णदैवज्ञविरचिते श्रीपतिभट्टीय-

[जातक]पद्धत्युदाहरणे आयुर्दायोदाहरणम्[4]] ॥५॥

[षष्ठं रिष्टभङ्गाध्यायोदाहरणम्]

अथारिष्टभङ्गनिर्णयकथनं सप्रयोजनमुपजातिकया प्रतिजानीते[5] ।—

भवन्ति चेज्जन्मनि रिष्टयोगा न स्यात्तदायुर्गणितागतं हि।
स्याद्रिष्टभङ्गादथ रिष्टभङ्गे विधीयते संप्रति निर्णयोऽयम् ॥१॥

व्याख्या।—अथायुर्दायकथनानन्तरम्। तस्मात् कारणात् संप्रति रिष्टभङ्गे अयं वक्ष्यमाणो निर्णयो विधीयते। तस्मात् कुतः? हि यस्मात् कारणात् चेज्जन्मनि रिष्टयोगा भवन्ति, तदा गणितागतमायुर्न स्यात्, रिष्टभङ्गात् गणितागतमायुः स्यादिति ॥१॥

अथ रिष्टभङ्गनिर्णयार्थं रिष्टकृद्-रिष्टभंक्त्रोर्बलं रथोद्धताद्वयेनाह।—

यच्छुभाशुभबलान्तराद् बलं रिष्टभङ्गकरखटयोः पुनः।
सैकवर्गदलहृद् भसंज्ञकं तद्दलं[6] भवति शेषवर्गजम् ॥२॥
भादिवर्गपतिवीर्यसंगुणं जायते बलमरिष्टकारिणः।
रिष्टभंक्तुरपि सप्तवर्गजं तद्धि सर्वबलसंयुतिस्तयोः ॥३॥

व्याख्या।—रिष्टभङ्गकरखेटयोर्यतः शुभाशुभबलान्तराद्बलं भवति तत् पुनः सैकवर्गदलहृत् वर्गाः सप्त ते सैका अष्टौ भवन्ति तेषां दलं चत्वारः तैर्हृत् चतुर्भक्तमित्यर्थः। तद्भसंज्ञकं[7] राशिसंज्ञकं भवति। तद्दलं तस्य राशिसंज्ञकस्य दलमर्धं शेषवर्गजं होरादिवर्गजं[8] बलं भवतीत्यर्थः। एतदुक्तं भवति।

शशिन्यरिविनाशगे निधनमाशु पापेक्षिते,
शुभैरथ समाष्टकं दलमतश्च मिश्रै[:] स्थितिः।

इत्यादिवचनैररिष्टकर्ता ग्रहो विचार्यः। यदि बहवो ग्रहाः एक[9]मरिष्टं जनयन्ति तर्हि तेषां मध्ये यो बली स एवारिष्टकर्ता ज्ञेयः। अथ तस्य इष्टकष्टगुणितषड्बलयोरन्तरं

1B. No देवभक्तिं। 2B. No ये। 3B. गतागते। 4A. बन्धनीस्थः पाठो नास्ति। 5B. आह। 6B. तद्दलं। 7B. तद्दलं। 8B. No होरादिवर्गजं। 9B. No एकं।

चतुर्भक्तं [ग्रहकोष्ठके लेख्यं । तस्यार्धं होरादिषट्कोष्ठके लेख्यम् । अथ तद् भादिवर्गपति[1]] वीर्यसंगुणम् । अयमर्थः गृहस्वामिषड्बलेन गृहकोष्ठकस्थं गुण्यं होरेशषड्बलेन होराकोष्ठकस्थं गुण्यं [द्रेष्काणेशबलेन[2]] द्रेष्काणकोष्ठकस्थं गुण्यमित्यग्रेऽपि[3] ज्ञेयम् । एवमेव रिष्टभङ्गकर्तुरपि सप्तवर्गजं बलं साध्यम् । एवं कृते अरिष्टकारिणः रिष्टभंक्तुरपि तयोरुभयोः सर्वबलसंयुतिः सप्तकोष्ठभवानां[4] या संयुतिः तत् उभयोः पृथक् पृथक् सप्तवर्गजं बलं भवति । इदं सप्तवर्गजं बलं रिष्टकर्त्तुरधिकं चेत्तदा रिष्टं भवत्येव । रिष्टभंक्तुरधिकं चेत्तदा रिष्टभङ्गो भवतीत्यग्रे वक्ष्यते । अत्रारिष्ट[रिष्ट]शब्दौ एकार्थकौ प्रसिद्धौ । इदं सप्तवर्गजबलं श्रीधराचार्यैरन्यथैव साधित[5]मस्ति । तद्यथा । रिष्टकर्तुः षड्बलं चतुर्भक्तं गृहकोष्ठके भवति तदर्धं होरादिकोष्ठकेषु । "भादिवर्गपतिवीर्यसंगुणमि"त्यग्रिमविधिस्तुल्य एव । तथा च श्रीधराचार्यः ।—

> गृहादिका वर्गसंख्या ७ रूपयुक्ता ८ द्विता ४ तयोः ।
> रिष्टाधिपबलं भक्तं भङ्गनाथबलं च यत् ॥१॥
>
> स्याद्राश्याख्यं तथाऽन्येषां वर्गाणां तद्दलं बलम् ।
> राश्यादिवर्गनाथानां बलैराहित्य तद् बलम्॥२॥
>
> सर्ववर्गबलं तत् स्याद्रिष्ट-तद्भङ्गनाथयोः ॥ इति ।

केशवज्योतिर्विदोऽपि । [जा० प० ३२ ।

> श्रेष्ठं रिष्टहृतौ दशाक्रम इहो[जः] यः श्रीधराद्योदितं[6]
> कष्टेऽष्टघ्नबलान्तरात्[7] क्व च[8]कृतं तद्युक्तिशून्यं त्वसत् ।

श्रीपतिभट्टीय-सप्तवर्गज[9]बलस्य असत्त्वे युक्तिरुक्ता स्वटीकायाम्[10] । सा यथा । रिष्टकर्तृ [रिष्टहर्तु[11]] र्वा ग्रहस्य बलपरिपूर्णस्य यदि उच्चबलमर्धरूपं ०।३०।० चेष्टाबलं चार्ध[12]रूपं ०।३०।० तदा इष्टं कष्टं[13] च सममेव[14] उत्पद्यते ।०।३०० तदा इष्टकष्टबलसाम्यात्तदन्तरबलं शून्यं स्यात् । तदा षड्बलपूर्णोऽपि ग्रहः [शुभाशुभबलान्तरात् शोधितबलेन[15]]शून्यबलः श्रीपतिमते रिष्टकर्ता रिष्टहर्ता च[16] न भवति । न चैतद् युक्तम् । तथान्या युक्तिः । यदोच्चबलं शून्यं चेष्टाबलं च शून्यं तदेष्टशून्यं कष्टं रूपं स्यात्[17] इष्टबलं शून्यं कष्टबलं यथावत् स्यात् । तदा [शुभाशुभबलान्तराद्[18] बलमिति कष्टबलशेषाद् बलमुत्पद्यते तदा तद्बलाधिको रिष्टहर्ता अस्तंगतो नीचगतश्च कथमरिष्टं हरति । अतश्च[19]] यत् शुभाशुभबलान्तराद्बलमिति कृतं तत् सर्वथैवायुक्तमिति । २-३॥

1A. बन्धनीस्थः पाठो नास्ति । 2A. बन्धनीस्थः पाठो नास्ति । 3B. ०ग्रे वि० । 4A. कोष्ठबलानां । 5B. साधन० । 6A. द्योतितं । 7A. ०बलान्तरान् । 8A. कच० । 9B. वर्ग । 10B. ०कान्तरैव । 11A. बन्धनीस्थः पाठो नास्ति । 12B. सार्ध० । 13B. इष्टे कष्टे । 14A. समये । 15B. बन्धनीमध्ये "शुभाशुभबली तत्साधिताबलेन" इति पाठः । 16B वा । 17A. अतः परं तदा इत्यधिकम् । 18B. ०न्तरे तद्० इति पाठः उदाहरणदीपिकाधृतः । 19A. बन्धनीमध्यस्थः पाठो नास्ति ।

एवं रिष्टभङ्गनिर्णयार्थं सप्तवर्गजबलं प्रसाध्य रिष्टभङ्गनिर्णयान् उपजातिका-द्वयेनाह ।—

शुभाशुभत्वं च हिताहितत्वं तुङ्गादिनीचान्तसमाश्रयत्वम् ।
रिष्टेश-भङ्गेश्वरयोर्विचिन्त्यं समानवर्गेषु समानवर्गान् ॥४॥
विश्लेष्य शेषस्य बलोत्कटत्वं स्याद्रिष्टकर्तुश्च तदा हि रिष्टम् ।
भङ्गप्रभोश्चेदथ रिष्टभंगः समानतायामपि रिष्टमेव ॥५॥

पूर्वं हि रिष्टकर्तुः रिष्टभंक्तुरपि सप्तवर्गजबले कृते, तत्र यदि रिष्टकर्तुः बलोत्कटत्वं स्यात् [तदा, हीति निश्चयेन, रिष्टं स्यात् । अथ चेत् भंगप्रभोः रिष्टहर्तुः बलोत्कटत्वं स्यात्[1]] तदा रिष्टभङ्गः स्यात् । [उभयोः समानतायामपि बलसाम्येऽपि रिष्टमेव स्यात्[2] ।] अथ बलसाम्ये सति विशेषमाह । शुभाशुभत्वमिति । रिष्टेश-भङ्गेश्वरयोः समानवर्गेषु समानवर्गान् विश्लेष्य शेषस्य शुभाशुभत्वं सौम्यपापत्वं हिताहितत्वम् इष्टकष्टाधिकत्वम् । तुङ्गादिनीचान्तसमाश्रयत्वं तुङ्गम् उच्चमारभ्य नीचपर्यन्तम् उच्च-मूल-त्रिकोणस्वर्क्षाधिमित्रमित्र-सम-शत्रुधिशत्रुनीचसमाश्रयत्वं विचिन्त्यम् । एतदुक्तं भवति । रिष्टकर्तुर्भंक्तुश्च बलसाम्ये सति प्रथमतस्तयोर्ग्रहहोरादयो वर्गा विचार्याः । तत्र एकस्य एको मित्रवर्गः अपरस्यापि एको मित्रवर्गस्तदा उभयोस्तमेकं वर्गं त्यक्त्वाऽन्ये षड् वर्गा विचार्याः । एवमेकस्य वर्गद्वयं स्वीयमस्ति [अपरस्यापि वर्गद्वयं स्वीयमस्ति[3]] तदा तद् वर्गद्वयं[4] विहाय पञ्चैव वर्गा विचार्याः । [एवमेकस्य वर्गद्वयमधिमित्रजमस्ति, एको वर्गः स्वीयोऽस्ति, एको वर्गः शत्रुजोऽस्ति अपरस्यापि तादृशमेवास्ति[5]] तत्र तद्वर्ग-चतुष्टयं त्यक्त्वा त्रयो वर्गा विचार्याः । एवं सर्वत्र समानवर्गेषु समानवर्गान् विश्लेष्य शेषस्य वर्गस्य बलोत्कटत्वं विचार्य शुभाशुभत्वादिकमपि[6] विचार्यम् । अयमर्थः । रिष्ट-कर्ता शुभग्रहः कदाचिदरिष्टं न करोति । पापः करोत्येव । शुभग्रहः पापग्रहो वा इष्टाधिकः उच्चाद्युत्तमस्थानेषु गतो रिष्टं न करोति । कष्टाधिको नीचाद्यनिष्ट-स्थानगो रिष्टं करोत्येव, इत्यादि विचार्यम् । इदं च बलसाम्ये । तथा च यवनेश्वरः ।

उच्चनीचशुभक्रूरहिताहितविचिन्तनात् ।
समानबलयोः कार्यं [रिष्टादि निश्चितं बुधैः[7]] । इति ॥४-५॥

इति श्रीवल्लालदैवज्ञात्मज-कृष्णदैवज्ञविरचिते श्रीपतिभट्टीयजातकपद्धत्युदाहरणे रिष्टभङ्गनिर्णयः ॥६॥

1A. बन्धनीस्थः पाठो नास्ति । 2A. बन्धनीस्थः पाठो नास्ति । 3B. बन्धनीस्थः पाठो नास्ति । 4A. ते वर्गद्वये । 5A. बन्धनीमध्ये 'एवमेवास्ति' इति पाठः । 6B. ०दिकमं । 7B. बन्धनीमध्ये "रिष्टारिष्टादिनिश्चितम्" इति पाठः ।

[सप्तमं दशान्तर्दशादिविचाराध्यायोदाहरणम्]

अथ दशादिक्रमं[1] वक्तुकामस्तावद्वसन्ततिलकया तत्प्रयोजनमाह—

अन्तर्दशाप्रभृतिभेदवतीषु यस्मा[न्नूनं] दशासु निखिलासु शरीरभाजाम् ।
व्यक्तिः शुभाशुभविमिश्रफलस्य सम्यक् तस्माद्दशाक्रमविधानमथाभिदध्मः ॥१॥

व्याख्या ।—अथ रिष्टभङ्गनिर्णयानन्तरम् । तस्मात् कारणात्[2] दशाक्रमविधानम् अभिदध्मः ब्रूमः । तस्मात् कुतः? यस्मात् कारणात् शरीरभाजां प्राणिनां शुभाशुभविमिश्रफलस्य शुभं च अशुभं च विमिश्रफलं च[3] शुभाशुभात्मकं, एवं त्रिविधफलस्य व्यक्तिरभिव्यक्तिः नून निश्चयेन निखिलासु दशासु भवति । शुभदशायां शुभफलस्य, अशुभदशायाम् अशुभफलस्य, विमिश्रदशायां विमिश्रफलस्य च अभिव्यक्तिर्भवतीत्यर्थः । शुभाशुभ-विमिश्रदशा बृहज्जातकादिषूक्ताः । ननु शुभदशामध्येऽशुभफलमपि दृश्यते तत् कथमित्यत आह । अन्तर्दशाप्रभतिभदवतीषु । अन्तर्दशाप्रभृतयो ये भेदाः अन्तर्दशाविदशोपदशा-[ख्यास्तद्वतीषु । शुभदशायां यदाऽशुभफलं दृश्यते तत् अन्तर्दशादिवशादित्यर्थः । अन्तर्दशादि-[4]] वशाच्छुभाशभफल[5]पाको भवतीत्यर्थः इत्युक्तम्[6] ॥१॥

अथ पाकभेदे मतभेदं पाकभेदनामानि च[7] शार्दूलविक्रीडितोपजातिकेन्द्र-वज्राद्वयोपजातिकाभिराह ।—

पाकं द्वादशधा वदन्ति यवना दिग्भेदभिन्नं तथा
माणित्थः खलु वादरायणमुनिस्तं चाष्टधा प्रोक्तवान् ।
षड्भेदं खलु सिद्धसेनविबुधस्तं देवलाद्याः पुन-
र्भेदैरब्धिमितरुदारधिषणाः श्रीविष्णुगुप्तस्त्रिभिः ॥२॥
पाकं द्विभेदं मुनिराह सत्य[ः] तच्छास्त्रदृष्ट्या कथयाम्यशेषम् ।
नैसर्गिकः स्यात् प्रथमोऽत्र भेदो दशाक्रमाख्यश्च भवेद् द्वितीयः ॥३॥
अन्तर्दशाख्यः कथितस्तृतीयः प्रोक्तश्चतुर्थो विदशाभिधानः ।
यो राशिसंज्ञः खलु पञ्चमोऽत्र षष्ठस्तथा भावफलाख्यभेदः ॥४॥
योगाभिधः स्यादिह सप्तमोऽपि स्यादष्टमो दृष्टिफलाभिधानः[8] ।
प्रोक्तोऽष्टवर्गो नवमो मुनीन्द्रैर्होरादिवर्गो दशमो ग्रहाणाम् ॥५॥
प्रत्यब्द-मास-द्युनिशाफलैः स्यादेकादशो भोजनमैथुनाद्यैः ।
स्याद् द्वादशः सत्त्व-शरीर-धातु-स्वरूपभेदैः कथितोऽत्र तज्ज्ञैः ॥६॥

1A. दशान्तर्दशा । 2A. No कारणात् । 3A. No च । 4A. बन्धनीस्थः पाठो नास्ति । 5A. No फल । 6A. भवतीति युक्तम् । 7A. No च । 8B. ०लाद्वयश्च ।

व्याख्या।—यवनाः यवनाचार्यमतानुगामिनः द्वादशधा द्वादशभिः प्रकारैः पाकं शुभाशुभफलपाकं वदन्ति। अयमर्थः। जन्तोर्नैसर्गिकादिभिर्द्वादशभिर्भेदैः प्रत्येकं यथोक्तं शुभम् अशुभं[1] शुभाशुभञ्च[2] फलं लेख्यम्। तन्मध्ये [सधनो निर्धन इतिवद् धर्मरतिरधर्मरति[3]] रितिवच्च विरुद्धयोः शुभाशुभयोर्नाशो विधेयः। यच्छेषं शुभमशुभं शुभाशुभं वा तदवश्यं भवतीति यवनमतम्। तथा उक्तवदेव मणित्थाचार्यः। दिग्भेदभिन्नं दशभिः प्रकारैर्भिन्नं[4] शुभाशुभं फलपाकं वदति। बादरायणमुनिः अष्टधा अष्टभिः प्रकारैस्तं[5] पाकं प्रोक्तवान्। [सिद्धसेननामा विबुधः पण्डितस्तं पाकं षड्भेदं प्रोक्तवान्। देवलाद्या मुनयः अब्धिमितैश्चतुर्भिर्भेदैः तं पाकं प्रोक्तवन्त.[6]]। उदारधिषणाः श्रेष्ठबुद्धयः[7]। श्रीविष्णुगुप्तस्त्रिभिर्भेदैस्तं[8] पाकं प्रोक्तवान्। सत्यो मुनिः सत्याचार्यः पाकं द्विभेदमाह। अथ तच्छास्त्रदृष्ट्या तेषां यवनमणित्थादीनां यानि शास्त्राणि तत्कृतग्रन्थाः तद्दृष्ट्या तद्दर्शनेन अशेषं यथा स्यात्तथा कथयामि। यवनप्रोक्तान्[9] द्वादशापि प्रकारान्[10] कथयामीत्यर्थः। तानेवाह[11] नैसर्गिक [:] स्यात् प्रथमोऽत्र भेद इति। अत्र द्वादशभेद[12]मध्ये नैसर्गिकः प्रथमो भेदः। स चोक्तो बृहज्जातके।—

एकं द्वौ नव विंशतिर्धृतिकृती पंचाशदेषां क्रमा-

च्चंद्रारेन्दुजशुक्रजीवदिनकृद्दैवाकरीणां समाः। १।२।९।२०।१८।२०।५० इति। अस्यार्थः। सर्वस्य जन्तोः जन्मसमयादारभ्य एकवर्षं चन्द्रस्य दशा [ततो वर्षद्वयं भौमस्य। ततो वर्षनवकं बुधस्य। ततो विंशतिवर्षाणि शुक्रदशा, ततोऽष्टादश[13]]वर्षाणि गुरुदशा[14], ततो विंशतिवर्षाणि सूर्यदशा, ततः पञ्चाशद्वर्षाणि शनिदशेति। जन्तोरिमां दशां विचार्य तत्फलं लिखेत्। इत्येकः[15] प्रकारः। अथ दशाक्रमाख्यो द्वितीयो भेदः। अयमर्थः। "लग्नादित्योडुपानामधिकबलवतः स्याद्दशाद्ये"ति वक्ष्यमाणदशाक्रमेण यथोक्तगणितागतदशां जन्तोर्विचार्य तत्फलं लेख्यम्। [एष द्वितीयः प्रकारः[16]।] अथान्तर्दशाख्यस्तृतीयो[17]भेदः कथितः। अयमर्थः। दशाक्रमेण प्राप्तदशामध्ये वक्ष्यमाणांतर्दशां विचार्य तत्[18]फलं लेख्यम्। एष तृतीयः प्रकारः। अथ विदशाभिधानः चतुर्थो भेदः प्रोक्तः। अन्तर्दशामध्ये वक्ष्य[19]माणविदशां विचार्य तत्फलं लेख्यम्। अयं[20] चतुर्थः प्रकारः। अथ यो राशिसंज्ञः सोऽत्र पञ्चमो भेदः। अयमर्थः। दशाधिपतिर्जन्मनि य[21]द्राशौ स्थितस्तत्फलम्। "वृत्ताताम्रदृगुष्णशाकलघुभुक्क्षिप्रप्रसादोऽटन" इत्यादिराशिफलं यथासम्भवं लेख्यम्। अयं पञ्चमः प्रकारः। तथा भावफलाख्यो भेद[:]षष्ठः। अयमर्थः। दशाधिपतिर्यस्मिन्[22] तन्वादिभावेऽस्ति

1B. No शुभमशुभं। 2A. No शुभाशुभञ्च। 3A. बन्धनीमध्ये सधनो नो निर्द्धन इति वर्द्धमानमति०" इति पाठः। 4A. No भिन्नं। 5B. No तं। 6. बन्धनीस्थः पाठः B पुस्तके नास्ति। 7B. उदारधिषणः श्रेष्ठबुद्धिः। 8B. No तं। 9A. प्रोक्ता। 10A. प्रकारा। इति पाठः। 11A. No तानेवाह। 12B. No भेद। 13. बन्धनीस्थः पाठः B-पुस्तके नास्ति। 14B. No दशा। 15A. इत्येकं; B. इत्येव। 16. बन्धनीस्थः पाठः B-पुस्तके नास्ति। 17B, अतः परं "प्रकारः" इत्यधिकम्। 18B. No तत्। 19B. विवक्ष०। 20B. इति। 21A. त०। 22A. जन्मनि।

तत्फलं[1] "शूरस्तब्धो विकलनयनो निर्घृणोऽर्के तनुस्थे" इत्यादि यथासंभवं लेख्यम्[2]। अयं षष्ठः प्रकारः। इह द्वादशभेदेषु योगाभिधः सप्तमो भेदः। तत्र योगश्चतुर्विधः। द्वित्र्यादि-ग्रहयोग एकः। यथा। "तिग्मांशुर्जनयेद्धिमांशुसहितो यंत्राश्मकारं नरम्" इत्यादि। राजयोगो द्वितीयः। स यथा। "वक्रार्कजार्कगुरुभिः सकलैस्त्रिभिश्च स्वोच्चेषु षोडश नृपाः कथि-तैकलग्ने" इत्यादि। नाभसयोगस्तृतीयः। स यथा। "रज्जुर्मुशलं नलश्चरार्दैः सत्यस्त्वा-श्रयजाञ्जगाद योगान्" इत्यादि। चन्द्रयोगश्चतुर्थः। स यथा। "सौम्यैः स्मरारिनिधनेष्वधि-योग इन्दोस्तस्मिंश्चमूप-सचिव-क्षितिपालजन्म। "हित्वार्कं सुनफानफादुरुधुराः स्वांत्यो-भयस्थै[3] र्ग्रहैः शीतांशुरि"त्यादि। एतद्योगचतुष्टयमध्ये नाभसयोगफलं सर्वदशासु लेख्यम्। अन्ये त्रयो योगा यदि दशाधिपतिनिमित्तकास्तर्हि तत्फलं लेख्यं नान्यथा। एष सप्तमः प्रकारः। अथ दृष्टिफलाभिधानः अष्टमो भेदः स्यात्। दशापतेर्दृष्टि[4]फलं लेख्यम्। एषोऽष्टमः प्रकारः। अथ ग्रहाणामष्टकवर्गो मुनीन्द्रैर्नवमो भेदः प्रोक्तः। ग्रहाणां वर्तमानमष्टक[5]वर्गफलं लेख्यम्। अयं नवमः प्रकारः। अथ ग्रहाणां होरादिवर्गो दशमो भेदः। राशिफलस्य पूर्वमेव प्रोक्तत्वात् होरादिषड्वर्गफलमिदानीं लेख्यम्। अयं दशमः प्रकारः। अथ प्रत्यब्द-मास-द्युनिशाफलैः एकादशो भेदः। अयमर्थः। वर्षप्रवेशफलं तन्मध्ये मासप्रवेशफलं तन्मध्ये दिनप्रवेशफलं लेख्यम्। अयमेकादशः प्रकारः। अथ सत्त्वशरीरधातुस्वरूपभेदैर्भोजनमैथुनाद्यैर्यो भेदः स त[ज्]ज्ञैर्द्वादशो भेदः[6] प्रोक्तः। अयमर्थः। जन्तोः सत्त्वं कीदृगस्ति [शरीरं कीदृगस्ति[7]] शरीरस्य धातवः कीदृशाः सन्ति, स्वरूपं राजसत्वादिलक्षणलक्षितं कीदृगस्ति, भोजनं कीदृगस्ति, मैथुनं कीदृगस्ति [स्वप्नः कीदृशोऽस्ति इत्यादि[8]] विचार्य यद् युक्तं भवति तदेव फलं लेख्यं नान्यत्। इति द्वादशः प्रकारः ॥२-६॥

ननु "सम्यग्बलिनः[9] स्वतुङ्गभागे संपूर्णा बलवर्जितस्य [रिक्ते"त्यादयोऽपि[10]] दशाभेदाः संति तेऽत्र कथं नोक्ताः ? इत्याशङ्क्योपजातिकया समाधत्ते।—

प्रायस्तदन्तःपतितास्तु सर्वे दशादिकानां तु दशाप्रभेदाः।
तेनोदिता नैव पृथक् पृथक् ते दशाक्रमं संप्रति कीर्तयामः ॥७॥

व्याख्या।—दशादिकानां तु ये अन्ये दशाप्रभेदाः सन्ति ते सर्वे प्रायो बाहुल्येन तदन्तः-पतिताः द्वादशभेदान्तर्गता एव सन्ति यतस्तेन कारणेन[11] ते भेदाः पृथक् पृथक् नैव उदिताः। यद्यपि बृहज्जातकादावष्टैव भेदा उक्ताः सन्ति। यथा—"सम्यग्बलिनः स्वतुङ्गभागे संपूर्णा १ बलवर्जितस्य रिक्ता २। नीचांशगतस्य शत्रुभागे ज्ञेयाऽनिष्टफला३ दशा प्रसूतौ ॥१॥ भ्रष्टस्य तुंगादवरोहिसंज्ञा ४ मध्या भवेत् सा ५ सुहृदुच्चभांशे। [आरोहिणी ६ निम्नपरिच्युतस्य

1B. अतः परं 'लेख्यम्' इत्यधिकम्। 2B. No लेख्यम्। 3B. "हित्वार्कमुनफनुफादुरधरा स्वाक्षेषु भयस्थितै" इति पाठः। 4B. पतिदृष्टं। 5B. No क। 6B. No भेदः। 7A. बन्धनीस्थः पाठो नास्ति। 8B. बन्धनामध्ये "स्वप्नमित्यादि" इति पाठः। 9B. ०ग्विनीतः। 10B. बन्धनीमध्ये "इत्युक्तेत्यादयोऽन्ये" इति पाठः। 11A. प्रकारेण न।

नीचारिभांशेष्वधमा भवेत् सा [७] ॥२॥ नीचारिभांशे[1]] समवस्थितस्य शस्ते गृहे मिश्रफला प्रदिष्टा"८ इति । तथाप्यव[2]रोहिणी नीचारिभागे यदि भवति तर्हि, अधमाधमा[3] तथा आरोहिणी सुहृदुच्चस्वभांशे यदि भवति तर्हि अत्युत्तमा इति भेद[4]द्वयस्यार्थसिद्धत्वात् दश भेदा भवन्ति । अथ संप्रति दशाक्रमं कीर्तयामः ॥७॥

तमेव स्रग्धरयाह ।—

लग्नादित्याडुपानामधिकबलवतः स्याद् दशाद्या ततोऽन्या
तत्केन्द्रादिस्थितानामिह बहुषु पुनर्वीर्यतो वीर्यसाम्ये ।
बह्वायुर्वर्षदातुः प्रथममिनवशेनोदितस्याब्दसाम्ये
ब्रूमश्चान्तर्दशा [तो दशा०] दिक्रमविधिमधुना शिष्यबोधप्रसिद्धैः[5] ॥८॥

व्याख्या।—लग्नादित्योडुपानां लग्नसूर्यचन्द्राणां[6] मध्ये अधिकबलवतः दशा आद्या[7] प्रथमा दशा स्यादित्यर्थः । अथ यस्य आद्या दशा जाता ततः[8] केन्द्रादिस्थितानां ग्रहाणां दशा ततः आद्यदशातः[9] अन्या द्वितीयादशा भवति । एतदुक्तं भवति । यस्य प्रथमा दशा भवति तस्य भावकुण्डलिकायां केन्द्रस्थितस्य[10] ग्रहस्य द्वितीया दशा भवति[11] । पणफरे यो ग्रहस्तस्य[12] तृतीया दशा भवति[13] । आपोक्लिमाख्ये यो ग्रहस्तस्य[14] चतुर्थी दशा भवति[15] । [यदि केन्द्रे कोऽपि ग्रहो नास्ति तदा पणफरस्थस्य द्वितीया दशा आपोक्लिमस्थस्य तृतीया दशा भवति । यदि केन्द्र-पणफरयोः कोऽपि ग्रहो नास्ति तदा आपोक्लिमस्थस्यैव द्वितीया दशा भवतीत्यर्थः[16] ।] अत एवोक्तं बृहज्जातके । "भवति हि फलपक्तिः पूर्वमापोक्लिमेऽपी"ति ।

अथ यदि केन्द्रे पणफरे आपोक्लिमे द्वित्र्यादयो ग्रहा भवन्ति तर्हि[17] तेषां क्रमः कीदृगित्याह । इह बहुषु पुनर्वीर्यत इति । इह केन्द्रादौ । बहुषु ग्रहेषु[18] सत्सु वीर्यतो वक्ष्यमाणदशाक्रमबलाद् दशा ज्ञेया । अयमर्थः । केन्द्रे यदि द्व्यादयो[19] ग्रहा भवन्ति तदा तेषां मध्ये यस्य दशाक्रमबलमधिकं तस्य द्वितीया दशा भवति । एवं शेषग्रहमध्येऽपि यस्य दशाक्रमबलमधिकं तस्य तृतीया दशा भवति[20] । एवं पणफरे आपोक्लिमे च द्वित्र्यादिषु ग्रहेषु ज्ञेयम् । अथ यदि[21] केन्द्रादौ द्व्यादयो ग्रहा भवन्ति तेषां[22] दशाक्रमबलसाम्यं चास्ति तदा किं कार्यमित्याह ।—वीर्यसाम्ये बह्वायुर्वर्षदातुरिति । दशाक्रमबलसाम्ये सति[23] तेषां मध्ये

1A. बन्धनीस्थः पाठो नास्ति । 2B. यदा अव० । 3A. अन्यथा । 4B. द्विभेदे । 5B. प्रवृद्धैः । 6B. चन्द्रमसां । 7B. अतः परं दशान्त इत्यधिकम् । 8B. तत् । 9B. दशान्त । 10B. स्थस्य । 11B. अतः परं केन्द्रात् इत्यधिकम् । 12B. ०फरे ग्रहोऽस्ति तस्य । 13B. अतः परं "केन्द्रात् तृतीयस्थाने" इत्यधिकम् । 14B. ग्रहोऽस्ति तस्य । 15B. अतः परं "इति सिद्धम्" इत्यधिकम् । 16B. बन्धनीस्थः पाठो नास्ति । 17B. No तर्हि । 18B. No ग्रहेषु । 19B. रव्यादयो । 20B. अतः परम् "एवमग्रेऽपि" इत्यधिकम् । 21B. No यदि । 22B. तस्य । 23B. यदि ।

यस्य दशा अधिका तस्य प्रथमा[1] दशा भवति। यस्य न्यूना तस्य पश्चाद् भवति। अथ दशासाम्यमपि भवेतदा दशाक्रम: कथं ज्ञेय इत्याह। प्रथममिनवशेनोदितस्याब्दसाम्य इति। अब्दसाम्ये वर्षादिदशासाम्ये सति इनवशेन सूर्यवशेन प्रथममुदितस्याद्या दशा भवति। [एतदुक्तं भवति। उपस्थो वा[2] द्विविध: एक: प्रतिदिनं प्रवहानिलभ्रमाद् भवति। द्वितीय: सूर्यसंनिधानाद् भवति संविधानाच्च भवति[3]।] तत्र ययोर्ग्रहयोर्दशासाम्यमस्ति तयोर्मध्ये यस्य ग्रहस्य सूर्यवशेन [प्रथमम् उदयो जातोऽस्ति[4]] तस्य दशा पूर्वा, अन्यस्य पश्चादिति। अत: कारणात् अधुना संप्रति दशादिक्रमविधिं ब्रूम: दशादिक्रमविधये बलं ब्रूम इत्यर्थ:। किमर्थम्? शिष्यबोधप्रसिद्धै ॥८॥

तत्र लग्नस्याद्यदशायां सत्यां दशाक्रमबलमिन्द्रवज्राद्वयेनोपजातिकया चाह।—

पूर्वं विलग्नस्य दशा यदा स्याद् भावं[5] तदा खेचरतो विशोध्य[6]।
शेषं तु भावान्तरभागखंडात् संशोध्य वीर्येण ततो निहन्यात् ॥९॥
भावान्तरांशार्धविभाजितं तत् पाकक्रमे वीर्यमुदाहरन्ति।
भावाद्विशुद्धेऽपि हि खेचरेन्द्रे[7] प्राग्वद् बलं पाकविधौ प्रसाध्यम् ॥१०॥
केन्द्रादिगानां[8] द्युसदां बलानि तद्वत् प्रसाध्यान्यधिकं तु[9] यस्य।
खचारिणस्तस्य दशाऽग्रत: स्यादन्तर्दशा वा विदशाह्वया वा ॥११॥


व्याख्या।—यदा विलग्नस्य दशा पूर्वं स्यात् तदा खेचरतो ग्रहात् भावं विशोध्य शेषं भावान्तरभागखंडात् संशोध्य तत: तत् वीर्येण षड्बलैक्येन निहन्यात्। ततस्तद् भावान्तरांशार्धविभाजितं पाकक्रमे दशाक्रमे वीर्यम् उदाहरन्ति। अथ यदि ग्रहाद् भावो न शुध्यति तदा खेचरेन्द्रे ग्रहे भावाद्विशुद्धेऽपि पाकविधौ प्राग्वद् बलं साध्यम्। एतदुक्तं भवति। यस्य ग्रहस्य दशाक्रमबलं साध्यते स ग्रहो यस्मिन् भावे तिष्ठति येन भावेन स्वल्पमन्तरं भवति तेन भावेन सह अन्तरं कार्यम्। तत:[10] ग्रहभावान्तरं कृत्वा एकत्र स्थाप्यम्। अथ भावयोरन्तरं कार्यम्। तत्र [ग्रहे भावापेक्षया न्यूने सति तस्य भावस्य पूर्वभावेन सह अन्तरं कार्यं ग्रहेऽधिके तूत्तरभावेन सहान्तरं कार्यं[11]] तस्यार्धमंशादि ग्राह्यं तद् भावान्तरभाग[12]खण्डं भवति। अथ ग्रहभावान्तरं [भागखण्डात्[13]] संशोध्य शेषं तस्य ग्रहस्य षड्बलैक्येन गुणयेत्। भावान्तरभागखण्डं भजेत्[14] यल्लभ्यते तत् दशाक्रमे[15] बलं भवतीति। अथ [केन्द्रादिगानां[16]] केन्द्रगतानां[17] पणफरगतानामापोक्लिमगतानां च

1B. प्रथमतो। 2. 'उपस्थो वा' इत्यत्र उदय इति भवेत्। 3B. बन्धनीस्थ: पाठो नास्ति। 4B. बन्धनीमध्ये "उदय: प्रथमतोऽस्ति" इति पाठ:। 5B. भाव:। 6B. °शोध्य:। 7B. नभश्चरेन्द्रे। 8A. °कानां। 9B. हि। 10B. तत्। 11B. बन्धनीमध्ये "ग्रहेण भावे अन्तरं कृतम्" इति पाठ:। 12A. भाव। 13B. बन्धनीमध्ये "भावान्तरादागतं खण्डम्" इति पाठ:। 14B. No भजेत्। 15A. क्रमार्थे। 16B. बन्धनीस्थ: पाठो नास्ति। 17B. No गतानां।

द्युसदां ग्रहाणां बलानि तद्वत् उक्तवत् प्रसाध्यानि। एवं बले साधिते[1] यस्य खचारिणो ग्रहस्य अधिकं बलं भवति तस्य दशा[2] अन्तर्दशा वा विदशा वा अग्रतः प्रथमतो भवति।

अथात्रोदाहरणम्। अत्र रविः जायाभावेऽस्ति। अतो रविः ७।१७।१९।२५, जायाभावः ८।४।५६।२८। अनयोरन्तरमंशादिकृतं ०।१७। ३७। ३ ; अत्र रविर्जायाभावान्न्यूनोऽस्ति अतो जायाभावः ८।४।५६।२८, रिपुभावः ६।२८।५९।२५, अनयो[3]रन्तरस्य १।५।५७।३ अर्धमंशादिकृतं १७।५८।३१ ; अस्माद् ग्रहभावान्तरं १७।३७।३ विशोध्य शेषं ०।२१।२८ इदं रवेः षड्बलैक्येन ५।१२।२४ गुणितं १।५१।४६ भावान्तरभाग[4]खंडेन पूर्वं कृतेन १७।५[5]। ३१ भक्ते लब्धं रवेर्दशाक्रमबलं ०।६।१३। एवं चन्द्रादीनामपि साध्यानि। अथात्र सुगमोपायः। षड्बलैक्यं ग्रहस्य भावफलेन गुणितं सद् दशाक्रमबलं भवति[6]। [तत्र विंशोपकात्मक-भावफलेन षड्बले गुणिते दशाक्रमो यथास्थित एव भवति। किंतु श्रीपत्युक्त-बलसमानं बलं न भवति[7]] अतः साम्यार्थं रूपात्मकभावफलेन [षड्बलं गुणयेत्। अथवा विंशोपकात्मक-भावफलेन गुणितं[8]] षड्बलं विंशतया भजेत्। अथात्रोदाहरणम्। रवेः षड्बलैक्यं ५।१२।२४, रवे रूपात्मकभावफलेन ०।१।१२ गुणितं जातं[9] रवेर्दशाक्रमबलं ०।६।१५ ; एवं जातानि दशाक्रमबलानि लिख्यन्ते। अथ दशाक्रमार्थं भावकुण्डली लिख्यते।

र	चं	मं	बु	बृ	शु	श
०	३	१	५	३	३	२
६	६	४	१८	५३	२६	११
१५	२१	८	३०	३२	१५	५४



अत्र "लग्नादिःयोडपानामधिकबलवतः स्याद्दशाद्ये"ति वचनात् लग्नस्य[10] बलाधिक्यात् आद्या दशा लग्नस्य ९।७।२२।५६।०। अथ "तत्केन्द्रादि [स्थितानामन्ये"ति[11]] अत्र केन्द्रे रविबुधगुरवः सन्ति। अतः "इह बहुषु पुनर्वीर्यंत" इत्यवधार्यम्। अत्र त्रयाणां मध्ये बुधस्य दशाक्रमबलमधिकमस्ति ततो न्यूनं गुरोस्ततोऽपि[12] न्यूनं रवेः। अतः पूर्वं[13] बुधस्य

1A. शोधिते। 2A. No दशा। 3B. No अनयो०। 4B. No भाग। 5A. '५८'। 6B. अतः परम् 'इति' इत्यधिकम्। 7B. बन्धनीस्थः पाठो नास्ति। 8B. बन्धनीस्थः पाठो नास्ति। 9A. No जातं। 10B. No लग्नस्य। 11B. बन्धनीमध्ये 'स्थितामि'ति पाठः। 12B. No अपि। 13A. No अतः पूर्वं।

४।३।१७।७।४८, ततो गुरोः १७।७।८।२१।३१, ततो रवेः १०।१।२६।४३।४८ ; अथ पणफरे भौम-शुक्र-शनैश्चराः [सन्ति। तन्मध्ये शुक्रस्य दशाक्रमबलमधिकमस्ति, अतः प्रथमं[1]] शुक्रस्य १४।१।३।५२।०, [ततो न्यूनबलस्य[2]] शनेः ०।५।५।४०।०, ततो न्यूनबलस्य[3] भौमस्य १३।७।२८।५९।४७ ; अथापोक्लिमे एकश्चन्द्र एवास्ति[अतस्तस्यैव[4]] दशा अन्ते ०।१।१।५६।४७ ; [अथ क्रमेण दशाप्रवेशमध्यमार्काश्च लिख्यन्ते ।।९-११ ।।

लग्न	बुध	गुरु	रवि	शुक्र	शनि	भौम	चन्द्र	यो	
९	४	१७	१०	१४	०	१३	०	६९	वर्षादि
७	३	७	१	१	५	७	१	११	
२२	१७	८	२६	३	५	२८	१	२५	
५६	७	२१	४३	५२	४०	५९	५६	३७	
०	४८	३१	४८	०	०	४७	४७	४०	
१६१३	१६२३	१६२७	१६४५	१६५५	१६६०	१६६२	१६८३	१६८३	
१४७८	१४८८	१४९२	१५१०	१५२०	१५३४	१५३४	१५४८	१५४८	
७	३	६	२	४	५	१०	६	७	राश्यादि
१८	११	२८	६	३	७	१३	१२	१३	
२१	१७	२५	४६	३०	२२	२	२	५९	
१७	१७	५	३६	२४	२४	२४	११	०	

एवमंशायुर्दाये "पूर्वं विलग्नस्य दशा यदा स्यात्" इत्यादिना दशाक्रमबलमुक्तम्[5] ।] अथ पिण्डायुर्दाये नैसर्गिकायुर्दाये[च] दशाक्रमबलमुपजातिकात्रयेणाह ।—

आद्या दशा चेत् सवितुर्विधोर्वा तदा बलं संस्कृतमेव तस्य ।
वेदोद्धृतं राशिबलं तदर्धमन्येषु वर्गेषु पुनर्निधेयम् ।।१२।।
स्ववर्गपानां गुणयेद् बलैस्तु यथाक्रमं वर्गबलं तदाहुः ।
प्राक् पाकनाथग्रहयोर्ग्रहाणां स्याद् यावतां साम्यमथेह तेभ्यः ।।१३।।
परस्परं वर्गबलं विशोध्यं दशाक्रमे तद्बलमाहुरार्याः ।
यस्याधिकं वीर्यमिहावशिष्टं वाच्या दशा वाऽन्तरजा च तस्य ।।१४।।

व्याख्या ।—चेद्[6]यदि पिंडायुर्दाये सवितुः सूर्यस्य दशा आद्या स्यात् अथवा[7] निसर्गा[8]युर्दाये विधो[9]श्चन्द्रस्य आद्या दशा स्यात् तदा यस्य[10] ग्रहस्य दशाक्रमबलं

1A. बन्धनीस्थः पाठो नास्ति । 2A. बन्धनीस्थः पाठो नास्ति । 3B. No ०स्य । 4B. बन्धनीमध्ये "चन्द्रस्य" इति पाठः । 5B. बन्धनीस्थः पाठो नास्ति । 6B. No चेत् । 7B. No वा । 8B. नैसर्गिका० । 9B. No विधोः । 10B, तस्य ।

साध्यते तस्य[1] संस्कृतं बलं षड्[2] बलैक्यं वेदोद्धृतं चतुर्भक्तं राशिबलं[3] भवति। अन्येषु वर्गेषु[4] तदर्धं[5] राशिबलार्धं निधेयं स्थाप्यम्। अथ यथाक्रमं गृहहोरादिक्रमेण स्ववर्गपानां[6] बलैर्गुणयेत्। गुणने कृते यज्जातं तद्वर्गबलमाहुः। अथ[7] प्राक् पाकनाथग्रहयोः प्राक् पूर्वं युगपत् प्राप्तौ यौ पाकनाथौ दशेश्वरौ ग्रहौ अथवा बहवो ग्रहास्तेषां यावद्[8] वर्गबलानां [साम्यमस्ति तेभ्यो वर्गबलेभ्यो वर्गबलं परस्परं विशोध्यं समानवर्गबलानां नाशः कार्य इत्यर्थः। शेषं वर्गबलम् आर्या दशाक्रमे तद्बलमाहुः, समानानां वर्गबलानां[9]] नाशे कृते अवशिष्टवर्ग-बलानामैक्यं दशाक्रमबलं भवतीत्यर्थः। इह वर्गबले[10] [यस्य ग्रहस्य बलमधिकमवशिष्टं तस्य[11]] ग्रहस्य दशा अन्तरजा वा अन्तर्दशा वा वाच्या। प्रथमतस्तस्य दशा अन्तर्दशा वा[12] वाच्येत्यर्थः। अत्र यद्यपि पिंड-निसर्गायुषी न स्तः[13] तथाप्युदाहरणक्रमार्थं लिख्येते[14]। तत्र पिंडायुरधिकृत्य दशाक्रमस्तावद्विचार्यते। स च सूर्यभावकुण्डलीमधिकृत्यास्ति अतः सूर्यभावकुण्डली लिख्यते।

बु ९ / १०	र बृ ८	७ / ६ शु	
११	श्री / र	५ मं	
१२ श / १	२ चं	३ ल / ४	

अथ "लग्नादित्योडुपानामधिकबलवतः स्या[15]द्दशाद्या ततोऽन्ये"ति[16] उक्तत्वात् पिंडायुषि सूर्यस्य बलाधिक्यमेव भवति। अतः[17] उदाहरणार्थं[18] बलाधिक्यं प्रकल्प्य जाता आद्या दशा सूर्यस्य ११।५।१९।८।५५; अथ तत् केन्द्रादिस्थितानां दशा भवति। अत्र चन्द्रभौमगुरवः केन्द्रे सन्ति अतः" "इह बहुषु[19] पुनर्वीर्यत"[20] इति दशाक्रमबलं विचार्यम्। तच्च "आद्या दशा[21] चेत् सवितुर्विधोर्वा" इत्यादिना साध्यम्। तत्र चन्द्रस्य संस्कृतं बलं ८।२८।१३ वेदोद्धृतं जातं राशिबलं २।७।३, एवमेव भौमस्य राशिबलं [१।९।१२, एवमेव गुरोरपि राशिबलं १।३४।२२[22]] अस्यार्धं होरादिवर्गबलं भवति[23]। तद्यथा। अथैतत्[24] स्ववर्गबलैर्गुणयेत्। यथा चन्द्रस्य गृहेशः शुक्रः तस्य बलेन ८।१६।५९ चन्द्रस्य गृहबलं २।७।३ गुणितं जातं

1B. No तस्य। 2A. यद्। 3B. अतः परं "गृहबलम्" इत्यधिकम्। 4B. अतः परं "होरा" इत्यधिकम्। 5B. तदर्धं। 6B. स्ववर्गज। 7B. No अथ। 8B. यावन्तो। 9A. बन्धनीस्थः पाठो नास्ति। 10B. अतः परं "बलिनः" इत्यधिकम्। 11B. बन्धनीस्थः पाठो नास्ति। 12B. No वा। 13B. ०षि नास्ति। 14B. ०रणार्थं कथ्यते। 15A. No स्यात्। 16A. No. ततोऽन्या। 17B. अथ। 18B. अतः परं "सूर्यस्य" इत्यधिकम्। 19B. No बहुषु। 20B. अतः परम् "इत्यत्र" इत्यधिकम्। 21B. No दशा। 22B. बन्धनीस्थः पाठो नास्ति। 23B. अतः परम् "१।३।३२" इत्यधिकम्। 24B. तथैव।

१७।३२।२२ एवं यथावत्[1] जातानि वर्गबलानि। अत्र चन्द्रस्य नवांशबलं ४।५३।३ भौमस्य होराबलं ४।५३।३ [समयस्ति अतः "स्याद् यावतां साम्यमथेह[2]] तेभ्यः परस्परं वर्गबलं[3] विशोध्यमि"ति तयो[4]र्नाशो विधेयस्तावदेव गुरुसप्तवर्गजबलं कुत्रापि शोध्यम्। अत्रोदाहरणे गुरुनवांशबलं[5] शोध्यते। तथा कृते जातं सप्तवर्गजं बलम्[6]। अथ[7] भौमनवांशबलं ३।३७।४८ गुरुसप्तांशबलं च समसस्ति अथ च भौमद्वादशांशबलं ३।३७।४८ गुरु त्रिंशांशबलं च[8] ३।३७।४७ सममस्ति अतः "परस्परं वर्गबलं विशोध्यमि"ति कृते तयोर्नाशो भवति। चन्द्रस्य[9] सप्तवर्गजबले तु तद्बलद्वयं कुत्रापि शोध्यम्। अत्रोदाहरणे तु चन्द्रत्रिंशांश[10]बले शोध्यते। तथा कृते जातम्। अथ शेषबलानामैक्यानि[11] जातानि

	चं	मं	बु		चं	मं	बु
गृ	२ ७ ३	१ ९ १२	१ ३४ २५	गृ	१७ ३२ २२	८ ३९ १०	७ १५ ३६
हो	१ ३ ३२	० ३४ ३६	० ४७ १२	हो	८ ५८ ०	४ ५३ ३	५ ५ ४५
द्रे:	१ ३ ३२	० ३४ ३६	० ४७ १२	द्रे:	७ ५३ ४७	४ १९ ३५	६ ३९ ४८
स	१ ३ ३२	० ३४ ३६	० ४७ १२	स	७ ५३ ४७	४ ४६ ३५	३ ३७ ४८
न	१ ३ ३२	० ३४ ३६	० ४७ १२	न	४ ५३ ३	३ ३७ ४८	४ ५७ ५६
द्वा	१ ३ ३२	० ३४ ३६	० ४७ १२	द्वा	७ ५३ ४७	३ ३७ ४८	६ ३ ५७
त्रिं	१ ३ ३२	० ३४ ३६	० ४७ १२	त्रिं	७ ५३ ४७	४ १९ ३५	३ ३७ ४८

चं	मं	बु
४८ ६ ५९	२२ ४ ५५	२४ ३६ ९

तस्माद् रविदशा[नन्तरं चन्द्रदशा[12]] ततो गुरुदशा, ततो भौमदशेति क्रमः। [अत्र "स्याद् यावतां साम्यमथेह तेभ्यः परस्परं वर्गबलं विशोध्यमि"ति अंकलाघवार्थं कृतम्। यथास्थितसप्तवर्गजबलैक्येऽपि दशाक्रमबलं भवत्येव, ततोऽपि दशाक्रमस्य तादवस्थ्यात्[13]।]

1B. ०क्रमं। 2B. बन्धनीमध्ये "अथ यावतां ग्रहाणां साम्यं" इति पाठः। 3B. No बलम्। 4B. No तयोः। 5B. बलो वि०। 6B. No बलं। 7B. पूर्वपट्टे। 8A. No च। 9B. No 'स्य'। 10B. ०शज। 11A. ०मैक्यं। 12B. बन्धनीमध्यस्थः पाठो नास्ति। 13B. बन्धनीमध्यस्थः पाठो नास्ति।

चं	मं	बृ
६० १५ ३८	३४ १३ ३४	३६ ४४ ४८

अथ [1] यथास्थित-सप्तवर्गज[2]बलैक्यानि[3] । अनेन दशाक्रम-बलेन पूर्वं चन्द्रस्य ततो गुरोस्ततो भौमस्यांतर्दशाक्रमो यथास्थित एव। अत एव श्रीकेशवदैवज्ञैरप्युक्तं [जा० प० ३१] "[चेल्] लग्नाद्यदशा स्वभावजफलघ्नौजांसि पाकक्रमेऽकेंन्द्रोश्चेत् प्रथमा खगोदयबलाङ्घ्रि भेऽन्यवर्गेऽर्धितः । स्वैर्वर्गेशबलैर्हता बलमिहैक्यमि"ति । एवं केन्द्रस्थानां चन्द्रभौम-गुरूणां दशा[क्रमबलानि जातानि[4]][5] । अत्र पूर्वं [लग्नदशा[6]] ततः शुक्रदशा ततो बुधदशा ततः शनिदशेति सिद्धं भवति । पिंडायुषि सूर्यस्यैव[7] बलाधिक्यमस्ति इति रविदशामाद्यां प्रकल्प्य उक्तवज्जातेन क्रमेण[8] दशाप्रवेशमध्यमार्कश्च लिख्यते ॥ अथ निसर्गायुषि दशाक्रमो लिख्यते । तत्र चन्द्रमसो बलाधिक्यत[9]

बु	शु	श	ल
४ ३३ ५१	४ ४६ ३६	२ ४९ २२	५ २३ ११
४४ ३५ ४७	५४ ११ ३३	२५ ११ ५९	६२ ३१ ३८


	चं	मं	बृ		बु	शु	श	ल
गृ	२२ २२ २२	८ २९ १०	७ १५ ३६	गृ	११ ४४ १३	१७ ९ १०	५ ३८ २४	१७ ५५ ५४
हो	८ ५ ०	० ० ०	४ ५ ४५	हो	४ ११ १८	५ ३३ २५	३ ११ ५	६ ४ ४३
द्रे	७ ५३ ४७	४ १९ ३५	६ ३९ ४८	द्रे	५ ५२ ८	८ ३४ ३५	२ ४९ १२	८ ३७ ५७
स	५ १ ५२	४ १८ ३५	३ ३७ ४८	स	४ ३३ ५१	८ ३४ ३५	३ ४९ २२	९ ५३ २०
न	० ० ०	३ ३७ ४८	४ ३ ०	न	६ १९ १५	४ ४६ ३६	५ ४ २	९ ५२ २०

1A. तद्यथा । 2B. ०जे । 3B. अतः परं "तानि लेख्यानि" इत्यधिकम् । 4B. बन्धनीमध्ये "दशाक्रमो जातः" इति पाठः । 5B. अतः परं "अथ सूर्यात् पणफरस्तावतां बुधशुक्रशनीनां लग्नात् प्राग् दशाक्रमबलं विजावंतनियोगः"(?) इत्यधिकः पाठः । 6B. बन्धनीमध्ये "लग्नानन्तरं बुधदशा" इति पाठः । 7A. No एव । 8B. बलेन । 9B. No 'त' ।

	चं	मं	बु		बृ	शु	श	ल
द्वा	७ ५३ ४७	३ ३७ ४८	६ ३ ५७	द्वा	५ ५२ ८	४ ४६ ३६	५ ४ २	९ ५३ २०
त्रि	७ ५३ ४७	४ ८ ३५	३ ३७ ४८	त्रि	० ० ०	० ० ०	० ० ०	० ० ०

रवि	चन्द्र	गुरु	भौम	लग्न[1]	शुक्र[2]	बुध	शनि	योग
११ ५ १९ ८ ५५	१४ ५ १३ ५४ ४	४ ६ ६ ५३ ७	६ १ २२ २१ ३०	८ ११ १७ १६ ४८	१० १० १७ ४० ०	८ ५ ७ ७ १२	५ ७ २४ ११ ४०	७० ६ ८ ३३ १६
१६१३ १४७८	१६२५ १४९०	१६२९ १५०४	१६४४ १५०९	१६५० १५१५	१६५९ १५२४	१६०० १५३५	१६७८ १५४३	१६८४ १५४९
९ १८ २१ १७	७ ७ ३७ ४	६ २१ २४ १६	० २८ १७ २३	२ २० ३८ ५३	२ ७ ५५ ४१	० २५ ३५ ४१	६ २ ४२ ५३	१ २६ ५४ ३३

एव निसर्गायुर्दायः संभवति[3]। तथा प्रकल्प्य जाता चन्द्रस्य आद्या दशा ०।६।२८।८[4]।२२ ; अथ "ततो[ऽन्या तत्[5]]केन्द्रादिस्थितानामि"ति चन्द्रात् केन्द्रादिगतविचारार्थं[6] चन्द्रभावकुण्डलिका लिख्यते। अत्र चन्द्रात्[7] केन्द्रे रविरेवास्ति [अत-



1B. शुक्र। 2B. लग्न। 3B. अतः परम् 'इति' इत्यधिकम्। 4B, '९'। 5B. बन्धनीस्थः पाठो नास्ति। 6B. No विचारार्थं। 7B. चन्द्र।

श्चन्द्रदशानन्तरं रविदशा। अथ पणफरे लग्न-भौम-बुध-गुरवः सन्ति, तेषां दशाक्रमबलानि पिण्डायुर्वज्जातानि लिख्यन्ते[1]।] तस्मादत्र पूर्वं लग्नदशा ततो बुध[2]दशा ततो भौमदशेति* "यस्याधिकं वीर्यमिहावशिष्टं [वाच्या दशे"त्युक्तत्वात्[3]]। अथ चन्द्रात् आपोक्लिमे शुक्र-शनी, तयोरपि पिण्डायुर्वदेव[4] दशाक्रमबलं प्राक् सिद्धमेव लिख्यते[5]।

ल	भ	बु	बृ
३२	३४	४४	२६
३१	१२	२५	४४
३८	३४	४७	४८

शुक्र	शनि
५४	२५
१	११
३३	१९

तस्मादत्र शुक्रदशा पूर्वं ततः शनिदशेति। एवं क्रमेण जाता दशा लिख्यन्ते[6] प्रवेशार्कश्च। एवमेव "लग्नादित्योडुपानामधिकबलवतः स्याद्दशाद्ये"ति उक्तविधिना[7] जीवशर्मोदितेऽप्यायुर्दाये दशाक्रमोऽवगन्तव्यः[8]।

ननु यत्र लग्नसूर्यचन्द्राणां त्रयाणां[9] निश्चल[10]बलसाम्यं स्यात् तत्र आद्यदशापतेरनिश्चयात् आद्यदशापतिं पुरस्कृत्य प्रवृत्तदशाक्रमस्य कथमवगम इति चेत् अत्रेदं[11] प्रतिभाति। "वीर्यसाम्ये बह्वायुर्वर्षदातुरि"त्युक्तत्वात् लग्नसूर्यचन्द्राणां[12] मध्ये यस्य भूयसी दशा तस्य आद्या दशा भवति, तत उक्तवद्दशाक्रमबलमानीय दशाक्रमोऽवगन्तव्य इति। न च वीर्यसाम्य इत्यत्र दशाक्रमवीर्यसाम्ये सति इति तत् कथं षड्बलसाम्य बह्वायुर्वर्षदातुरित्यर्थः क्रियत इति वाच्यम्, यथा "लग्नादित्योडुपानामधिकबलवतः स्याद्दशाद्ये"त्यत्र दशाक्रमबलस्यासाध्यत्वात् षड्बलमेव गृह्यते, तद्वदत्रापीति दूषणानवकाशात्। ननु तथापि यत्र सूर्यचन्द्रयोर्बलसाम्यमस्ति तत्र तयोरन्यतरस्य आद्यदशापतित्वानिश्चयेऽपि "आद्या दशा चेत् सवितुर्विधोर्वे"ति द्वयोरेकरीत्यैव दशाक्रमबलसाधनस्योक्तत्वात् दशाक्रमबलं पूर्वमानीय तद्वशात् आद्यदशापतिनिश्चयोऽस्तु न तु "बह्वायुर्वर्षदातुरि"त्यनेनेति चेत्[13] न[14] एवं सति यत्र रवेः षड्बलमधिकमस्ति तत्रापि उक्त[15]विधिना दशाक्रमबलानन्तरमेव आद्यदशापतिनिश्चय आपद्येत। तथा सति रविबलवशात् प्रवृत्ते[16] पिंडायुषि रवेरन्योऽपि आद्यदशापतिः स्यादिति महदयुक्तं[स्यात्; संप्रदायविरोधश्च स्यात्। एवं नैसर्गिकायुर्दायेऽपि

1B. बन्धनीमध्ये "अथ चन्द्रदशाक्रमबलानि पिण्डायुर्वदेव जातानि" इति पाठः। 2B. गुरु। 3B. बन्धनीमध्ये "वाच्यदशोक्तत्वात्" इति पाठः। 4B. ०युपूर्ववदेव। 5B. अतः परं "तद्यथा" इत्यधिकम्। 6B. लिख्यते। [मूले एतद्विषयकः कोष्ठः परिहृतः, एवमग्रेऽपि]। 7A. अतः परं 'ततः' इत्यधिकम्। 8A. द्वयोर्वा। 9B. द्वयोः। 10B. No निश्चल। 11A. No अत्रेदं। 12A. अतः परं "ग्रहाणाम्" इत्यधिकम्। 13A. केचित्। 14B. No न। 15B. वक्तव्य। 16B. ०वृत्ति।

* अत्र "तस्मादत्र पूर्वं लग्नदशा ततो भौमदशा ततो बुधदशा ततो गुरुदशेति" पाठेन भाव्यमिति कोष्ठस्थग्रहसन्निवेशदर्शनादनुमीयते।

चन्द्रादन्योऽप्याद्यदशापतिः स्यात्[1]।] तस्मादुक्त[2]रीत्यैव दशाक्रमो ज्ञेय इति प्रतिभाति ॥१४॥

एवं दशाक्रममुक्त्वा अन्तर्दशाविभागं रथोद्धतयाह।—

अर्धमेकगृहगस्त्रिकोणगस्त्र्यंशमस्तगृहगस्त्वगांशकम्।
पादमत्र चतुरस्रसंस्थितः पाचयन्त्यथ निजैः फलैर्ग्रहाः ॥१५॥

व्याख्या। अथ ग्रहाः निजैः फलैः पाचयन्ति, अन्यदशामध्येऽपि स्वफलं प्रयच्छन्तीत्यर्थः। तत् कथम्? तदाह।—अर्धमेकगृहग इत्यादिना। [दशापतिना सह एकगृहगः एकस्थानस्थितो यो ग्रहः सः अर्धं पाचयति ; एतदुक्तं भवति[3]] दशापतिभावकुण्डलिकायां[4] यदि दशापतिना सह अन्योऽपि ग्रहोऽस्ति तदा दशाया अंशत्रये(?) कृते अंशद्वयस्य फलं दशापतिर्ददाति तृतीयांशस्य [फलमन्यो ग्रहो ददाति। एवं दशापतेः सकाशात् त्रिकोणगो ग्रहः त्र्यंशं पाचयति दशापत्यपेक्षया त्र्यंशकालस्य फलं ददाति। दशाया अंशचतुष्टये कृते अंशत्रयस्य फलं दशापतिर्ददाति, चतुर्थांशस्य[5]] फलं त्रिकोणगो ग्रहो ददातीत्यर्थः। एवम् अस्तगृहगः दशापतेः सप्तमो ग्रहः अगांशं सप्तमांशं पाचयति। एवमेव चतुरस्रसंस्थितः दशापतेश्चतुर्थोऽष्टमो वा ग्रहः पादं चतुर्थांशं पाचयति। अत्र विशेषोऽस्ति। स यथा।—उक्तस्थानमध्ये यदि एकस्थाने द्व्यादयो ग्रहा भवन्ति तदा सर्वेषां [तेषामंतर्दशा न भवति, किन्तु तेषां मध्ये यो बली तस्यैवान्तर्दशा भवति। तदुक्तं होरामकरन्दे—

एकर्क्षे यदि भूयांसः संभवन्ति नभश्चराः[6]]।
एक एव तदा तेषां दद्यादन्तर्दशां बली ॥ इति।

एकर्क्षे एकस्थाने। अन्यत् स्पष्टम्। एवं[7] कल्याणवर्मप्रभृतिभिरप्युक्तमस्ति ॥१५॥

अथ यदि युगपदेव अर्धत्र्यंशादिपाचका भवन्ति तदा कथं विभागः कार्यस्तदुपजातिकयाह।—


कृत्वाऽंशकानामिह रूपमादौ छिदां समत्वं च तथा विनाशम्।
निजैक्यभक्ताः पृथगंशकाः स्युरन्तर्दशाः [स्वस्वसमाविनिघ्नाः[8]] ॥१६॥

व्याख्या।—इह एकर्क्षत्रिकोणादिषु अंशकानाम् अर्धत्र्यंशादीनाम् आदौ प्रथमतः रूपं कृत्वा छिदां हराणां समत्वं तथा विनाशं च कृत्वा अंशकाः पृथक् स्वस्वसमाविनिघ्ना मूलदशापतेर्वर्षादिकदशया गुणिताः तथा निजैक्यभक्ताः [अंशयोगभक्ताः[9]] लब्धवर्षादिकमन्तर्दशा भवति। तत्र छिदां समत्वकरणमुक्तं लीलावत्याम्।—

1B. बन्धनीस्थः पाठो नास्ति। 2B. ०स्मान्मवुक्त। 3B. बन्धनीस्थः पाठो नास्ति। 4B. कुण्डल्यां। 5B. बन्धनीस्थः पाठो नास्ति। A-पुस्तकमात्रालम्बनोऽयं पाठोऽसमञ्जस इति प्रतिभाति। 6B. बन्धनीमध्ये "केषाम् अन्तर्दशा भवति नभश्चराणां" इति पाठः। 7B. No एवं। 8B. बन्धनीमध्ये "स्यात् स्वसमाविनिघ्नम्" इति पाठः। 9B. बन्धनीस्थः पाठो नास्ति।

अन्योन्यहाराभिहतौ हरांशौ राश्योः समच्छेदविधानमेवम् ।
मिथो हराभ्यामपवर्तिताभ्यां यद्वा हरांशौ सुधियाऽत्र गुण्यौ ॥१॥

अस्यार्थः ।—हरांशौ अन्योन्यहाराभिहतौ कार्यौ । एकस्य हारेण अपरस्य हरांशौ गुण्यौ । [अपरस्य हारेण प्रथमस्य हरांशौ गुण्यौ[1]] एवं कृते राश्योः समच्छेदविधानं भवति । यद्वा हरयोरपवर्तसंभवे लाघवार्थमपवर्तिताभ्यां हराभ्यां[2] मिथः परस्परं हरांशौ गुण्यौ । एवं समच्छेदविधानं भवति । अत्रोदाहरणं लिख्यते[3] । अत्र श्रीनवाव-खान-खानामहाप्रभूणां जन्म[4]लग्नस्य[5] बलाधिक्यादंशायुः प्रमाणमस्ति । तत्र प्रथमं लग्नायुर्वर्षादि ॥९।७।२२।५६।० इय[6]मेव लग्नदशा, 'आयुः कृतं येन हि यत्तदेव कल्प्या दशे"ति वराहोक्तत्वात् । अथ लग्नदशामध्ये अन्तर्दशाविचारार्थं लग्नभावकुण्डली[7] लिख्यते । अत्र लग्नेन सह एकगृहगः [*कोऽपि नास्ति अतोऽर्धपाचकः कोऽपि नास्ति ।



[अथ त्रिकोणे भौमः शुक्रश्चास्ति, द्वयोर्मध्ये शुक्रो बली[8]] अतः शुक्रस्त्र्यंशस्य पाचकः शु $\frac{१}{३}$ । अथ अस्तगृहगो रविर्बुधो गुरुश्चास्ति तेषां मध्ये बुधस्य षड्बलमधिकमस्ति । अतः "अस्तगृहगस्त्वगांशकमि"ति वचनात् बुधः सप्तमांशपाचकः बु $\frac{१}{७}$ । अथ चतुर्थेऽष्टमे वापि कोऽपि नास्ति अतः "पादमत्र चतुरस्रसंस्थित" इत्युक्तश्चतुर्थांश-पाचकः कोऽपि नास्ति । तस्माल्लग्नहरांशौ[10] जातौ पाचकौ ल $\frac{१}{१}$[11] शु $\frac{१}{३}$ बु $\frac{१}{७}$ "कृत्वांऽशकानामिह रूप [मादौ" इत्युक्तत्वात्[12]] । [अथ छिदां समत्वं कार्यम् । तत्र लग्नस्य हरांशौ लं १।१४[13]] शु$\frac{१}{३}$ शुक्रस्य हरेण ३ गुणितौ ल$\frac{३}{३}$ पुनः बुधस्यापि हरेण गुणितौ ल$\frac{२१}{२१}$; अथ शुक्रस्य हरांशौ शु $\frac{१}{३}$ लग्नस्य हरेण १ गुणितौ तथा बुधस्य हरेण ७ गुणितौ शु $\frac{७}{२१}$, अथ बुधस्य हरांशौ बु$\frac{१}{७}$ लग्नस्य हरेण गुणितौ बु $\frac{१}{७}$ जातौ ; तथा शुक्रस्य हरेण ७ गुणितौ जातौ $\frac{३}{२१}$; एवं परस्परहरेण हरांशयोर्गुणने कृते जाताः समच्छेदाः[14] [लं $\frac{२१}{२१}$, शु $\frac{७}{२१}$; बु $\frac{३}{२१}$[15]] । अथ हराणां नाशे कृते जाता अंशाः ल२१ शु७ बु३ । एषामैक्यम् $\frac{३१}{२१}$ ।

1A. बन्धनीस्थः पाठो नास्ति । 2B. No हराभ्यां । 3B. No लिख्यते । 4B. जन्मनि । 5A, अतः परं "बलाल्लग्नस्य" इत्यधिकम् । 6B. अय० । 7B. ०लिका । 8A. बन्धनीस्थः पाठो नास्ति । 9. प्राग् लिखितायां लग्नभावकुण्डल्यां कुज-शुक्रौ सप्तमगृहे सन्निविष्टौ स्तः । अस्यां कुण्डल्याम् उद्दिष्टो ग्रहसन्निवेशः B-पुस्तकसम्मतः । A-पुस्तके ग्रहसन्निवेशो नास्ति । परम् अयं सन्निवेशः टीकासंवादी नास्तीति ज्ञायते । 10A. ०ग्नदशायां । 11B. No 'ल $\frac{१}{१}$' । 12B. बन्धनीमध्ये "कृते जातम्" इति पाठः । 13A. बन्धनीमध्ये "अंशकानामादौ" इति पाठः । 14B. समहराः । 15A. बन्धनीस्थः पाठो नास्ति ।

अथ लग्नस्य मूलदशा ९।७।२२।५६।० लग्नस्यांशैर्गुणिता २०।३।७।१।३६।० अंशैक्येन भक्ते १ लब्ध-वर्षादिकं जाता लग्नान्तर्दशा ६।६।१२।३७।५६ ; ल२१।२१।शु७।२१।बु३।२१

पुनर्लग्नदशा ९।७।२२।५६।०। शुक्रस्यांशै ७ र्गुणिता ६७।६।१०।३२ निजैक्येन ३१ भक्ता लब्धवर्षादि जाता शुक्रान्तर्दशा २।२।४।१२।३९ ; पुनर्लग्नमूलदशा ९।७।२२।५६।० बुधस्यांशैर्गुणिता २८।११।८।४८।० अंशैक्येन ३१ भक्ता लब्धं वर्षादि बुधान्तर्दशा ०।११।६।५।२५। एवं लग्नमूलदशामध्ये जाताऽन्तर्दशा।

ल	शु	बु	योग
६	२	०	९
६	२	११	७
१२	४	६	२२
३७	१२	५	५६
५६	३९	२५	०

अथान्तर्दशाक्रमो विचार्यते। तत्र मूलदशापतेरन्तर्दशा प्रथमा, परतः केन्द्रादिविधिना जातो यो दशाक्रमः स एवान्तर्दशास्वपीत्येके। अपरे तु मूलदशापतेरन्तर्दशा प्रथमा [ततः पाठक्रमेण अन्तर्दशाक्रमः[1]।] स यथा। पूर्वम् एकगृहगस्यान्तर्दशा ततः परं त्रिकोण-गृहगस्यान्तर्दशा ततोऽपि परम् अस्तगृहगस्यान्तर्दशा, ततः पश्चात् चतुरस्र ४।८ स्थितस्येति। इदं पक्षद्वयमुक्तं कल्याणवर्मणा। 'केन्द्रादिविधिना चान्ये केचित् पाठक्रमेण च'' इति। अत्र पाठक्रमेणान्तर्दशाक्रमोऽस्मद्गुरुसंप्रदायागतोऽस्ति। युक्तश्चायमिति प्रतिभाति। अन्यथा तद्विदां पाठे क्रमानुरोधो न स्यात्, अस्ति च क्रमानुरोधः। तथाहि। "अर्धमेकगृहगस्त्रिकोणगस्त्र्यंशमस्तगृहगस्त्वगांशकम्। पादमत्र चतुरस्रसंस्थितः" इति श्रीपतिः। श्रीकेशवज्योतिर्विदोऽपि [जा० प० ३३]।—

अर्धस्यैकभगस्त्रिकोणगृहगस्त्र्यंशस्य चास्ते नगां-
शस्यांघ्रेश्चतुरस्रगो निजगुणैः पक्तैकभे स्याद् बलीति ॥

सुबोधिन्यामपि।—

एकर्क्षेऽर्धं त्र्यंशमेव त्रिकोणेऽस्वांशोसोऽ(?)स्वेऽङ्घ्रिं पाचयेद्[2] वेदवस्वो।४।८ रिति। बृहज्जातके वराहोऽपि।—

[एकर्क्षगोऽर्धमपहृत्य ददाति तु स्वं त्र्यंशं त्रिकोणगृहगः स्मरगः स्वरांशम्।
पादं फलस्य चतुरस्रगतः सहोरास्त्वेवं[3]] परस्परगताः परिपाचयन्ति ॥

एवमन्येष्वपि ग्रन्थेषु पाठे एक एव क्रमोऽस्ति। तस्मात् पाठक्रमेणैवान्तर्दशाक्रमो युक्त इति।

नन्वेवं सति पूर्वग्रन्थविरोधः। तथाहि "खचारिणस्तस्य दशाऽग्रतः स्यादन्तर्दशा वा विदशाह्वया वा" इत्यत्र, तथा। "यस्याधिकं वीर्यमिहावशिष्टं वाच्या दशा वांऽतरजा च तस्य" इत्यत्र पूर्वग्रन्थे दशान्तर्दशाविवशानां क्रम एक एव उक्तोऽस्ति, तत् कथं पाठक्रमेणान्तर्दशामङ्गीकुर्वतां पूर्वग्रन्थविरोधो न स्यात्? न च एकत्र स्थितयोर्द्वयोर्बहूनां

1B. बन्धनीमध्ये "परतः केन्द्रादिविधिना जातो यो दशासु क्रमः स एवान्तर्दशासु क्रमः" इति पाठः। 2A. पाचके। 3B. बन्धनीमध्ये 'एकर्क्षम्' इतिमात्रः पाठः। 3. अयम अंशः -पुस्तके अन्यत्र विश्रृङ्खलरीतया वर्तते।

वाऽन्तर्दशाक्रमसन्देहे पाठक्रमेण तन्निर्णयो न भवतीति तत्र द[शा]क्रमवदेवान्तर्दशाक्रमार्थे पूर्वग्रन्थतात्पर्यमिति वाच्यम्, एकत्र स्थितयोर्बहूनां वा मध्ये बलिन एकस्यैवान्तर्दशा-स्वीकारेऽन्तर्दशाक्रमसन्देहा*] भावादिति चेत् न। नवम-पञ्चमस्थितयोस्तथा चतुर्थाऽष्ट-मयोर्ग्रहयो[1]रन्तर्दशाक्रमसन्देहे पूर्वग्रन्थस्य सफलत्वादित्यलमतिविस्तरेण।

एवमुक्तप्रकारे[2]णान्तर्दशास्तत्प्रवेशा[3]ंकश्च लिख्यते[4]। अथ[5] लग्नदशानन्तरं बुधस्य मूलदशा ४।३।१७।७।८ ; अथात्रान्तर्दशाः। तत्र बुधभावकुण्डलिका प्राक् लिखिता[6](?)। अत्र एकगृहगो गुरुरस्ति, तस्यार्धम्। त्रिकोणे ९।५ कोऽपि नास्ति। अस्तगृहे ७ लग्नमस्ति, तस्य सप्तमांशः[7]। चतुरस्रे शनिरस्ति तस्य चतुर्थांशः[8]। आदौ मूलदशापते रूपम् एवं क्रमेण बुधस्य दशामध्ये जाताः पाचकाः। अथ[9] छिदां समत्वार्थं बुधस्य हरांशौ[10] बुधलग्नशनीनां हरैः१।७।४ गुणितौ ; एवं लग्नहरांशौ[11] बुध-गुरु-शनीनां हरैः बृ।५८।५९ ; १।२।४ गुणितौ एवं शनिहरांशौ[12] बुध-गुरु-लग्न-हरैर्गुणितौ श१४।५६[13] एवं सर्वेऽपि जाताः समहराः। छेदानां ल८।५६ नाशे कृते जाता अंशाः [बु ५६ गु २८ ल ८ श १४[14]] अंशानामैक्यं १०६ ; [अथ मूलदशा बुधस्य ४।३।१७।७।४८ निजांशैर्गुणिता अंशैक्य[15]] भक्ता १०६ लब्धा वर्षादिकान्तर्दशाः। ततो गुरुमूलदशा १७।७।८।२१।३१ ; अत्रापि[16] उक्तवत् पाचकाः [उक्तवत् समच्छेदाश्च, छेदनाशात् जाता अंशाः। अंशैक्यं ८३ निजांशैः[17]] गुणिता अंशैक्येन भक्ता लब्धा गुरुदशामध्ये[18] अन्तर्दशाः[19]। ततो रवेर्मूलदशा १०।७।२६।४३।४८; अत्रापि उक्तवज्जाता अंशाः र १६८ गु ८४ श ५६ च २४ ल ४२ अंशैक्यं ३७४ ; प्रागवज्जाताऽन्तर्दशा लिख्यते। अथ[20] शुक्रस्य मूलदशा १४।११।३।५२।० ; अत्रापि उक्तवदंशाः शु८४, ल२७, श१२, च२२, अंशैक्यं १४५ प्रागवदन्तर्दशाः[21] जाताः[22] प्रागवदन्तर्दशा(?) लिख्यन्ते[23]। ततो भौममूलदशा [१३।५।९।४७।०[24]।] अत्र भौमस्य[25]

---

* १०८-पत्रीयदशमपंक्तिस्थ-"कोऽपि नास्ती"त्यतः एतत् [११०] पत्रीय-३य-पंक्तौ "अन्तर्दशाक्रमसन्देहा०" इत्यन्तो भागः B-पुस्तके अन्यत्र विशृङ्खलरीत्या वर्तते।

1A. No ग्रहयोः। 2B. ०क्तक्रमे०। 3B. ०शमध्यगा०। 4B. अतः परं "एवं सर्वत्रापि आद्या" इत्यधिकः पाठः। 5B. No अथ। 6A. No प्राक् लिखिता। 7B. ०शः ल। 8B. अतः परं बृ १।२ इत्यधिकम्। 9B. No अथ। 10B. अतः परं "गुरुहरेण ततो लग्नहरेण ७ ततः शनिः। एवं गुरोः हरांशौ श १४।५६ बु १।२" इत्यधिकम्। 11B. अतः परं "शोधयेत्" इत्यधिकम्। 12B. "शनिहरः २८।५८ श" इति पाठः। 13B. No १४।५६। 14B. बन्धनीमध्यस्थः पाठो नास्ति। 15B. बन्धनीस्थः पाठो नास्ति। 16B. No अपि। 17B. बन्धनीमध्ये "उक्तवर्षादिच्छेदेनांशे कृते जाता अंशा गु ४२ बु २१ श १४ ल ६ अंशैक्यं निजांशा गुरुमूलदशया" इति पाठः। 18B. अतः परं "वर्षादिका" इत्यधिकम्। 19B. अतः परं "लिख्यते" इत्यधिकम्। 20B. No अथ। 21B. ततः शनिमूलदशा। 22B. No जाताः। अतः परं A-पुस्तके "अत्रापि प्राप्ते अंशैक्यं च ३१" इत्यधिकः पाठः। 23B. लिख्यते। 24B. बन्धनीमध्ये "१३।७।२८।५।४७" इति पाठः। 25B. भौमभाव।

कुण्डलिकायां [नवपञ्चमे नवमे चन्द्रस्तस्य तृतीयांशः १।३[1]] चतुर्थे बुध-गुरू तयोर्मध्ये बलिनो बुधस्य चतुर्थोऽंशः अनयोर्मध्ये बुधस्य दशाक्रमबलमधिकमस्ति अतो बुधस्यान्तर्दशा पूर्वम्। अत्र[2] उक्तवज्जाता अंशाः म १२. च ४ बु ३ श३, अंशैक्यं २२, प्राग्वज्जाता अन्तर्दशाः। ततश्चन्द्रमूलदशा ०।१।१।५६।४९ ; अत्रापि प्राग्वज्जाता अंशाः च ८४ म २८ र १२ बु २१, अंशैक्यं १४५ ; प्राग्वज्जातान्तर्दशा लिख्यन्ते ॥१६॥

एवमेव विदशादिकमपि साध्यमित्युपजातिकयाह।—

अन्तर्दशाभ्यो विदशा [:] स्युरेवं ताभ्यस्तथै[3]वोपदशाः प्रदिष्टाः।
प्रत्यब्दमासद्युनिशाघटीषु फलं निगद्यं सदसच्च ताभ्यः ॥१७॥

व्याख्या। यथा दशाभ्योऽन्तर्दशाः साधिताः एवमेवान्तर्दशाभ्यो[4] विदशाः स्युः। अयमर्थः। अन्तर्दशैव मूलदशा कल्प्या, अन्तर्दशापतेर्भावकुण्डलिकायाम् "अर्धमेकगृहग" इत्यादिना अंशाः अंशैक्यं [च कार्यम्[5]।] ततः अन्तर्दशा निजांशैर्गुण्या अंशैक्येन भाज्या लब्धं विदशा भवतीति। तथैव ताभ्यो विदशाभ्य उपदशा प्रदिष्टा। अयमर्थः। विदशामेव दशां प्रकल्प्य तत्पते[र्भाविकुण्डलिकायाम् "अर्धमेकगृहग" इत्यादिना अंशा अंशैक्यं च कार्यम्। ततो विदशा[6]] निजांशैर्गुण्या अंशैक्येन भाज्या उपदशा भवतीति। अथ ताभ्यो दशान्तर्दशाभ्यः[7] प्रत्यब्दमासद्युनिशाघटीषु वर्षे मासे अहोरात्रेषु[8] घटीषु च सत् शुभम् असत् अशुभं च फलं वाच्यम् आदेश्यम्। अयमर्थः। दशावशात् स्थूल[9]काले फलमादेश्यम्। [तन्मध्येऽपि अन्तर्दशावशात् सूक्ष्मकाले फलम् आदेश्यम्[10]] ।१७॥

अथ दशाप्रवेशकालं रथोद्धताद्वयेनाह[11]॥

जन्मकाल-कलियातवत्सरोत्पन्न-मध्यम-रवौ समण्डले।
निक्षिपेदथ दशादिजाः समा-मास-वासर-घटी-विनाडिकाः ॥१८॥
तादृशो भवति भास्करो यदा मध्यमोऽपरदशा तदा भवेत्।
साध्यते दिनगणोऽनुपाततः खेचराः सविकलादहर्गणात् ॥१९॥

व्याख्या।—जन्मकाले जन्मसमये कलियातवत्सराः कलिगताब्दाः तेभ्य उत्पन्नाहर्गणादिद्वारा साधिते समण्डले रवौ भगणाद्ये सूर्ये समा-मास-वासर-घटी-विनाडिकाः वर्षमासदिन-घटी-पलानि निक्षिपेत् संयोजयेत्। कास्ताः समा-मास-वासर-घटी-विनाडिकाः? इत्याह दशादिजा इति। दशाप्रवेशकालज्ञानार्थं दशाया वर्षादिकं योज्यम्। अन्तर्दशा[12]प्रवेश-कालज्ञानार्थम् अन्तर्दशाया वर्षादिकं योज्यम्। एवं विदशो[पदशादिष्वपि। एवं वर्षादिके योजिते यद् भगणादिर्भवति तादृशो[13]]मध्यमः भास्करो मध्यमसूर्यो यदा भवति तदा

1A. बन्धनीमध्ये "चन्द्रस्य तृतीये चन्द्रस्य" इति पाठः। 2B. No अत्र। 3B. ताभ्यां तथै०। 4B. No ०भ्यो। 5B. बन्धनीमध्ये 'पाचकार्थम्' इति पाठः। 6B. बन्धनीमध्ये 'भावकदशा' इति पाठः। 7A. ०र्दशादिभ्यः। 8B. अहर्निशा। 9B. फल०। 10A. बन्धनीस्थः पाठो नास्ति। 11B. ०द्धतयाह। 12B. ०शायाः। 13B. बन्धनीमध्यस्थः पाठो नास्ति।

अपरवशा भवति, तस्मिन् समयेऽन्यदशा प्रवर्तत[1] इत्यर्थः। एतदुक्तं भवति। प्रथमदशा-प्रवेशस्तु जन्मसमय एव भवति, द्वितीय-दशाप्रवेशकालज्ञानार्थमुपायः। तत्र भगणाद्यो रविरपेक्षितः। स च कल्पगताब्देभ्यः सिध्यति; कलिगताब्देभ्योऽपि। "कलिगतादथवा दिनसंचयो दिनपति(?) भृगु[ज] प्रभृतिस्तदा" इत्युक्तत्वात्। अतो लाघवार्थं कलिगताब्देभ्यो जन्मसमये भगणादिः सूर्यः साध्यः। अथ प्रथमदशाया वर्षाणि[2] भगणेषु योजयेत्। [मासान् राशिषु योजयेत्। दिवसानंशेषु योजयेत्। घटिकाः कलासु योजयेत्। पलानि विकलासु योजयेत्[3]।] ततो विकलाः षष्ट्या विभज्य लब्धं[4] कलासु योजयेत्। ततः कलाः षष्ट्या विभज्य अंशेषु योजयेत्। अंशास्त्रिंशद्भिर्विभज्य[5] लब्धं राशिषु योजयेत्। राशीन् द्वादशभिर्विभज्य लब्धं भगणेषु योजयेत्। एवं कृते जातो यथा[6] भगणाद्यो रविः, तथैव भगणाद्यो रविर्यस्मिन् समये[7] भवति तस्मिन् काले [द्वितीय-दशा प्रवर्तत इति। एवं जाते भगणाद्ये रवौ पुनर्द्वितीय-दशावर्षादिकं योज्यम्। तादृशो मध्यसूर्यो यदा भवति तदा तृतीयदशा प्रवर्तते[8]।] एवमग्रेऽपि। अत्र ये सूर्य-भगणास्त एव कलियातवत्सरा इति। दशाप्रवेशसमये कलिगतं ज्ञातम्। तद्वशात् शकवत्सरा ज्ञेयाः। कलिगता नवसप्तेन्दुरामाः ३१७९ शोध्याः, शेषं हि शकाब्दा भवन्तीति। सूर्यवशान्मासज्ञानमपि। अथ दशाप्रवेशकालीनतिथ्यादिज्ञानार्थं चन्द्रोऽपेक्षितः, शुभाशुभ-[फलज्ञानार्थं तु सर्वेऽपि ग्रहा अपेक्षिताः, ते च अहर्गणाधीना[9]] इत्यत आह साध्यते दिनगण इति। दिनगणोऽहर्गणः, अनुपाततस्त्रैराशिकेन, साध्यते; अग्रिमश्लोकेनेत्यर्थः। अथ सविकलात् सावयवात् अहर्गणात् खेचराः साध्या इति ॥१८-१९॥

अथ दिनगणा[10]र्थमनुपातं वंशस्थेनाह।—

युगार्कचक्रैर्युगसौरसावनो यदि द्युपिंडः समवाप्यते तदा।
दशाप्रवेशोद्भवसूर्यमण्डलैः सभांशलिप्तादिभिराप्यतेऽत्र[11] कः ॥२०॥

अस्यार्थः। यदि युगार्कचक्रैः युग[12] सूर्यभगणैर्युग[13]सौरसावनो द्युपिण्डः समवाप्यते तदा[14] सभांशलिप्तादिभिः राश्यंशकलाविकलासहितैः दशाप्रवेशोद्भवसूर्यमण्डलैः दशाप्रवेशकालीन[15] सूर्यभगणैः कः द्युपिण्डः समवाप्यत इति। तथात्र[16] युगे सूर्यभगणास्तथा सौरसावनाश्च[17] सूर्यसिद्धान्तात् "युगे सूर्यज्ञशुक्राणां खचतुष्क-रदार्णवाः ४३२००००।" तथा "उदयादुदयं भानोर्भूमिसावनवासराः। वसुद्व्यष्टाद्रिरूपांकसप्ताद्रितिथयो युगे १५७७९१७८२८॥" अत्र युगे सूर्यभगणाः ४३२०००० प्रमाणम्। दशाप्रवेशजो भगणादिः सूर्यः इच्छा। युगाहर्गणः १५७७९१७८२८ फलम्, "फलमिच्छाहतं प्रमाणभक्तं सत् इच्छाफलं भवती"त्युक्त-त्वात् दशाप्रवेशजो भगणादिः सूर्यः युगाहर्गणेन गुणनीयः। [युगसूर्यभगणैर्भाज्यः

1B. प्रवृत्तः। 2B. वर्षादि। 3B. बन्धनीस्थः पाठो नास्ति। 4A. No लब्धं। 5B. ०र्भजेत्। 6A. No "यथा"। 7B. काले। 8B. बन्धनीमध्ये "द्वितीया दशा प्रवृत्ता" इति पाठः। 9A. बन्धनीमध्ये "ज्ञानमपि। ते च अहर्गणाः साधिता" इति पाठः। 10B. गणना०। 11B. ०ते तु। 12A. No युग। 13B. द्युगण। 14A. No तदा। 15B. ०लिक। 16A. तत्र। 17B. ०नश्च।

लब्धं दिनघटी[1]]पलात्मकं ग्राह्यं स एव सावयवोऽहर्गणो भवतीति सिद्धम् । अत्रोदाहरणम् । अत्र जन्मकाले कलियातवत्सराः ४६५७ अस्मादुत्पन्नो भगणादिमध्यम-सूर्यस्तात्कालिकः ४६५७।७।१८।२१।१७ ; अत्र प्रथमलग्नदशा प्रवृत्ता तन्मानं वर्षादि ९।७।२२।५६।०। अथ "जन्मकालकलियातवत्सरोत्पन्नमध्यमरवावि"त्यादिवचनात् जन्मकाल[जमध्यसूर्येऽस्मिन्[2]] ४६५७।७।१८।२१।१७[3] दशावर्षादिके [९।७।२२।५६।०।[4]] क्रमेण [युक्ते जातं[5]] ४६६६।१४।४०।७७।१७ ; [कलाः षष्ट्या विभज्य लब्धं १ अंशेषु ४० युक्तं ४१, अंशान् ४१ त्रिंशद्विभज्य लब्धं १ राशिषु १४ युक्तं १५, राशि-१५ द्वादशगुणनीयः, युगसूर्यभगणैर्भाज्यः लब्धं दिनघटी १८।२१ द्वादशभिर्विभज्य लब्धं १ भगणे युक्तं[6]] एवं कृते जातो बधदशाप्रवेशे भगणादिः सूर्यः ४६६७।३।११।१७।१७, अथायं युगसौरसावनैः १५७७९१७८२८ गुणितो जातः [७३६४५९४६६।७।१४।३३।५६[7]] युगसूर्यभगणैरेतै[8] ४३२०००० र्भक्तश्च लब्धं दिनानि १७०४७[५४७३ भगणादिसूर्यदिनैर्हतः ७३६४५८६४५८४६६।७।१४।३३।५६।५९४६६।७।१४।३३।५६[9]] शेषं १६५९४६६ षष्ट्या संगुण्य पुनर्लब्धं घट्यः २३, तथैव पलानि च ३, एवं बुधदशा-प्रवेशे जातः सावयवः[10] कलिदिनगणः १७०४७६५।२३।३ ॥२०॥

अथाहर्गणप्रयोजनं द्रुतविलम्बितेनाह ।—

सविकलादिति सिद्धदिनव्रजात् कथित-तन्त्रविधेः कुरु खेचरान् ।
स्फुटतरानुदयं च निजोदयैरिति विधाय ततोऽत्र विचिन्तयेत् ॥२१॥

व्याख्या ।—इति पूर्वोक्तप्रकारेण सिद्धदिनव्रजात् सिद्धो यो दिनव्रजोऽहर्गणस्तस्मात खेचरान् ग्रहान् स्फुटतरान्[11] कुरु । कीदृशाद् दिनव्रजात् ? सविकलात् सावयवात्[12] । कुतः कार्यस्तदाह । कथित-तन्त्रविधेरिति । कथितो यस्तन्त्रे विधिस्तस्मात् कलियुगात् यत्र ग्रहानयनमुक्तं तत्तन्त्रमित्युच्यते । एतदुक्तं भवति । जन्मकाले येन[13] ग्रन्थेन कल्यियुगाह[14]र्गणात् ग्रहाः कृताः सन्ति तेनैव[15] ग्रन्थेन दशाप्रवेशेऽपि ग्रहाः कार्याः, किन्तु अहर्गणः सावयवो दशाप्रवेश[16]सिद्धो ग्राह्यः । ततस्ते स्पष्टा अपि[17] कार्या इति । ततो निजोदयैः स्वदेशजैः उदयैः[18] उदयं लग्नं विधाय लग्नं कृत्वा, अत्र दशाप्रवेशे वक्ष्यमाणं शुभाशुभं विचिन्तयेत् । अत्र लग्नानयने इष्टकालोऽपेक्षितः स त्वेवं ज्ञेयः । यथा । यस्मिन्[19]

1B. बन्धनीमध्यस्थः पाठो नास्ति । 2B. बन्धनीमध्ये "जन्मसूर्येऽस्मिन्" इति पाठः । 3B. अङ्कभागो नास्ति । 4B. बन्धनीमध्ये "४६५७" एवम् अङ्कभागः । 5A. बन्धनीमध्ये "भगणेषु युक्तं" इति पाठः । 6A. बन्धनीमध्यस्थः पाठो नास्ति । 7A. बन्धनीमध्यस्थः अङ्कभागो नास्ति । 8B. No एतैः । 9B. बन्धनीमध्यस्थः पाठो नास्ति । 10B. अतः परं "कलिदिनव्रजात्" इत्यधिकम् । 11B. No स्फुटतरान् । 12B. No सावयवात् । 13B. ०न्मकालेन । 14B. कयाह० । 15B. No एव । 16B. No प्रवेश । 17B. प्रतिग्राह्याः । 18B. ०देशोदयैः । 19B. अस्मिन् ।

ग्रन्थे औदयिका ग्रहा आयान्ति, तेनैव ग्रन्थेन यदि ग्रहाः साध्यन्ते तर्हि तत्रा[1]हर्गणोऽपि औदयिकः, अतो दशाप्रवेशाहर्गणस्य यो घट्यादिरवयवः स[2] उदयादिष्टकालः। अथ यत्र[3] ग्रन्थे अर्धरात्रिका ग्रहा आयान्ति तेन ग्रन्थेन यदि ग्रहाः साध्यन्ते तर्हि तत्राहर्गणोऽपि अर्धरात्रिकः[4], अतो दशाप्रवेशाहर्गणस्य यो घट्यादिरवयवः सोऽर्ध[5]रात्रादूर्ध्वमिष्टकालः, अतोऽहर्गणावयवाद्रात्रिदलं शोध्यम्। यदि न शुध्यति तदाऽहर्गणावयवे षष्टिघटिकाः[6] संयोज्य रात्रिदलं शोध्यम्। शेषम् उदयादिष्टकालो भवतीति। अत्र सुगमोपाय उक्तः श्रीकेशवज्योतिर्विद्भिः [जा० प० ३५-३६]।—

शाकोऽब्दा जनिमध्यमार्कभमुखं मासादितद्वग्गदशा-
ऽब्दाद्यं तत्र शके सभादि[7]तरणि[8]र्मध्यो दशादौ भवेत्।
घस्त्रीभूतदशा पृथक् त्रिकुहता खांकाष्ट ८९० हृत्तद्युता
सा स्यात् सावनिका दशाऽब्दफलयुक् तद्युग्जनिद्युव्रजः ।।१।।
तस्मात् सावयवाद् गणात् स्वकरणात् साध्या दशादौ खगाः
क्षेपाद्वा जन्मखगात् प्रकल्प्य यदि वा साध्या दशा सावनात्।
ते[9] स्पष्टाश्च[10] तिथिश्च संक्रमवशान्मासा[11] दशादौ तनुः
पूर्वोक्तं जडकर्म चात्र हि मया तल्लाघवं दर्शितम् ।।२।। इति।

अस्य तात्पर्यार्थः। जन्मकालीनशकाब्दगण उपरि[12] स्थाप्यः तदधो राश्यादिर्मध्यम[13]सूर्यः स्थाप्यः। यथात्र जन्मकाले शाकः[14] १४७८ ब्रह्मतुल्योक्त[15] तात्कालिको मध्यम[16]रविः ७।२८।२४।३८ शकादधः[17] स्थापितः शाके[18] १४७८।७।२८।२४।३८ इदं वर्षमासदिनादिर्भवति। अथ दशा[19]वर्षादिकमत्र योज्यम्। यथात्र लग्नदशा ९।७।२२।५६।०[20] योगे जातं शकः[21] १४८८ [३।११।२०।०।[22]] अस्मिन् शाके १४८८[23] यदा[24] मध्यसूर्यो[25] ३।११।२०।३८ भवति तदा लग्नदशानिवृत्ति[26] बुधदशाप्रवृत्तिश्च। अथ दशाया दिनानि कार्याणि। यथा दशावर्षाणि ९ द्वादशगुणानि[27] १०८ मासैर्युतानि जाता दशामासाः ११५[28], एते त्रिंशद्गुणा ३४५० दिवसैर्युता २२ जाता दशादिवसाः ३४७२।५६।० ; अथैते पृथक् त्रयोदशगुणाः कार्याः[29] खांकाष्टभि ८९० र्भाज्याश्च[30] लब्धं यद्दिनाद्यं[31] तद्दशादिवसादिषु योज्यम्।

1B. तत्राप्य०। 2B. अतः परम् 'एव' इत्यधिकम्। 3B. अत्र। 4B. औदयिकः। 5B. अर्ध। 6B. ०ष्टिकाल। 7A. कलादि। 8B. ०णे०। 9A. भे। 10B. ०ष्टश्च। 11B. सो। 12A. गणोपरि; B गण अरि (?)। 13B. मध्यम। 14A. शकः। 15B. तुल्यात्। 16B. ०ध्यमो। 17B. शकः अधस्थाप्यः। 18A. शके। 19B. दशादि०। 20A. '३८'। 21A. जातशके। 22B. बन्धनीस्था अङ्का न सन्ति। 23B. अङ्कभागो नास्ति। 24B. यदि। 25B. सूर्ये। 26B. लग्ने दशादिनप्रवृत्ति०। 27B. गुणितानि। 28B. १५३८। 29B. No कार्याः। 30B. ०ज्याश्चान्तदिनादि। 31B. No यद्दिनाद्यं।

यथा दशादिवसाः [३४७२।५६।०, एते त्रयोदशगुणाः ४५१४८।८।० खांकाष्टभि-८९० भक्ता लब्धं दिनादि ५०।४३।४२, अनेन युक्ता दशादिवसा[1]] जाताः ३५२३।३९।४२ ; अथैतेषु दशावर्ष ९ तुल्यानि पलानि योज्यानि ३५२३।३९।५१। एते[2] दशादिवसाः सावना जाताः। अथ एते जन्मकालीनाहर्गणे योज्याः। तत्र जन्मकालदिवसे सूर्योदयेऽह-र्गणः [१३६५०४, जन्म तु उदयाद् गतघटीषु २८।१८ ; अतः आभिर्घटीभिर्युतोऽहर्गणो जातो जन्मकालीनाहर्गणः १३६५०४।२८।१८[3]] एते सावनैर्दशादिवसादिभिः ३५२३।३९।५१ युक्ता जातो दशाप्रवेशसमये सावयवो ब्रह्मतुल्याहर्गणः १४००२८।८।९ ; अस्मादहर्गणा-"दहर्गणो विश्वगुण" इत्यादिना सर्वेऽपि ग्रहा मध्यमाः स्पष्टाश्च साध्याः। अत्र अस्मादह-र्गणादानीतो मध्यमः सूर्यः प्राग्जातेन दशाप्रवेशमध्यमसूर्येण समश्चेद् भवति तदाऽहर्गणः शुद्धः, अन्यथाऽशुद्धः। तदर्थं मध्यमसूर्यस्योदाहरणं लिख्यते। अहर्गणः १४००२८।८।९; अयं विश्व १३ गुणः १८२०३६५।४५।५७ अयं त्रिखांकं ९०३ भक्तो[4] लब्धमंशादि २०१५। ५४।३२ ; अथ द्युपिण्डोऽयं[5] १४००२८।८।९ लब्धेन रहितः १३८०१२।१३।३७ ; अथ अब्द-वृंदः। तत्र दशाप्रवेश[6]शकः १४८८ पंचदिक्चन्द्र ११०५ हीनो जातोऽब्दवृन्दः ३८३ ; अस्माद् वेदांग-६४ लब्धेन कलादिना ५।५९ ऊनो जातः १३८०१२।[७।३८ अथांशास्त्रिंशद्भक्ता लब्धं राशयः ४६०० शेषमंशादि १२।७।३८; राशयो द्वादशभक्ताः शेषं राश्यादि[7]] ४।१२। ७।३८। अथ "दिशो गोयमा विश्वतुल्या खमकैः" इत्युक्तेन क्षेपेण[8] १०।२९।१३।० युक्तो जातो मध्यमः सूर्यः ३।११।२०।३८ ; अयं प्राग् जातेन मध्यमसूर्येण समोऽस्ति। एवं तस्मादहर्गणात् सर्वेऽपि ग्रहाः साध्याः। अथवाऽन्यः प्रकारः। ये दशादिवसाः सावनाः [कृताः सन्ति स एवा[9]]हर्गणः कल्प्यः। तस्मान्मध्यमा ग्रहाः साध्याः। किन्तु ते ग्रन्थोक्तैः क्षेपैर्न योज्याः अपि तु जन्मकालीनमध्यमग्रहतुल्यैः क्षेपैर्योज्या इति। अब्दवृन्दस्तु दशावर्षाण्येव। अस्योदाहरणम्। सावना[10] दशादिवसाः प्राकृताः ३५२३।३९।५१ ; अयमेवाहर्गणः। अस्मात् त्रयोदशगुणात् त्रिखांकैर्लब्धमंशादि ५०।४३। ४२, अनेन ऊनोऽहर्गणः ३४७२।५६।९ अब्दवृन्दात् ९।७ वेदाङ्ग-६४ लब्धेन कलादिना ०।९ ऊनः ३४७२।५६।० अंशास्त्रिंशद्भक्ताः लब्धं राशयः ११५[11] शेषमंशादि २२।५६[12] राशयो द्वादश १२-भक्ताः शेषं राशयः ७ ; एवं राश्यादिसूर्यः ७।२२।५६।० ; अथात्र[13] "दिशो गोयमा" इत्यादि क्षेपो न[14] योज्यः, किंतु ब्रह्मतुल्यप्रागानीतो जन्मकालीनमध्यमसूर्यः ७।१८।२४।३८ क्षेपो योज्यः। तथा कृते[15] जातो दशादि[16]प्रवेशसमये[17] मध्यमरविः स एव ३।११।२०।३८ ; एवं चन्द्रादयोऽपि साध्याः। अथ ते स्पष्टाश्च कार्याः। अथ "विरविचन्द्रलवा" इत्यादिना तिथ्यादि ज्ञेयम्। अथ सूर्यवशात् संक्रान्तिदिनं[18] ज्ञेयम्[19]।

1B. बन्धनीस्थः पाठो नास्ति। 2B. एतेषु। 3B. बन्धनीमध्यस्थः पाठो नास्ति। 4B. ०र्भक्तो। 5B. ०ण्डगणोऽयं। 6B. ०वेशे। 7B. बन्धनीस्थः पाठो नास्ति। 8A. No "इत्युक्तेन क्षेपेण"। 6B. "द्युता सन्त्यवा०" इति पाठो बन्धनीमध्ये। 10A. सा च ताः। 11B. '१०५१'। 12B. '१२।५६'। 13B. No अथ। 14B. क्षेपेण। 15A. तथोक्ते। 16B. No आदि। 17A. No समये। 18B. दिवसाः। 19B. ज्ञेयाः।

तद्यथा। सूर्यस्य[1] गतांशानां कलाः कार्याः सूर्यगत्या भाज्याः, [लब्धेन दिनादिना सूर्याधिष्ठित-राशिसंक्रान्तिर्गता भवति। अथवा सूर्यस्य भोग्यांशानां कलाः सूर्यगत्या भाज्याः[2]] लब्धेन दिनादिनाऽग्रिमराशिसंक्रान्तिरग्रे भवति। अथ संक्रान्तिवशाद् मासो ज्ञेयः। स यथा। यस्मिन् शुक्लादिमासे मेषसंक्रान्तिर्भवति स चैत्रमासः, एवं वृषादिसंक्रान्तिभिर्वैशाखादयो ज्ञेयाः। अथाहर्गणस्यावयवमिष्टकालं प्रकल्प्य दशाप्रवेशे लग्नमपि साध्यम्। अत्र गोल-विचारेण ममायं विशेषः प्रतिभाति। अस्मिन् इष्टकाले जन्मकालीनचरसंस्कारं कृत्वा दशाप्रवेशचरं व्यस्तं संस्कार्यमिति। श्रीकेशवज्योतिर्विद्भिस्तु लग्नस्य असाध्यत्वप्रतिपादना-देवायं विशेषो नोक्तः। लग्नस्य यथाऽसाध्यत्वं[3] तथो[4]क्तं तैः [जा०प०३४]।—

पंचांशोनदिनद्वयं च १।४८ कलयेत्यायुः कृतं दृश्यते।
पक्षैः खेटलवान्तरेण च भवेन्मासान्तरं चायुषः
प्रोक्तं यैस्तु दशादिलग्नजफलं तेभ्योऽतिदृग्भ्यो नमः॥ इति।

एवं यथा द्वितीयदशाप्रवेशे ग्रहादिसाधनं प्रदर्शितं तथा तृतीयचतुर्थ्यादिदशाप्रवेशेऽपि ज्ञेयम्। किं तु तत्र गतदशायोगो दशा कल्प्येति विशेषः॥२१॥

एवं दशाप्रवेशलग्नसाधनमुक्त्वा तत्फलमुपजातिकयाह।—

दशापतिर्लग्नगतो यदि स्यात् त्रिषड्दशैकादशगश्च लग्नात्।
तत्सप्तवर्गोऽप्यथ तत्सुहृद्वा लग्नेऽशुभो वा शुभदा दशा सा॥२२॥

व्याख्या।—दशापतिः या दशा प्रवृत्ताऽस्ति तस्याः पतिः दशाप्रवेशलग्ने यदि स्यात् [यदि वा दशाप्रवेशलग्नात्[5]] त्रिषड्दशैकादशगः ३।६।१०।११ स्यात्, यदि वा दशा-प्रवेशलग्ने दशापतेः [सप्तवर्गः स्यात्, यदि वा दशापतेः सुहृद् मित्रं दशाप्रवेशलग्ने स्यात्, यदि वा दशापतेः[6]] शत्रुरपि शुभग्रहप्रवेशलग्ने स्यात् तदा सा प्रवृत्ता दशा शुभदा भवतीति ज्ञेयम्॥२२॥

एवं प्रवेशसमये दशापतिवशात् फलमुक्त्वा प्रवृत्तदशायास्तात्कालिकफलमपि विचार्यमित्युपजातिकयाह।—

यावन्ति वर्षाणि दशा च सा स्याच्चारक्रमात्तत्र दशापतिः सः।
यत्र स्थितस्तद्भुवनाद् विधोश्च स्थितेः प्रकल्प्यं सदसत् फलं हि॥२३॥

व्याख्या।—सा प्रवृत्ता दशा यावन्ति वर्षाणि स्यात्, तत्र तेषु वर्षेषु तात्कालिकं सदसत् शुभाशुभं फलं[7] प्रकल्प्यं विचार्यम्। कुतो विचार्यं तदाह। दशापतिश्चारक्रमात् यत्र यस्मिन् राशौ तत्काले भवति तद्भवनाद् विधोश्च स्थितेः स्थितिवशात् शुभाशुभं फलं ज्ञेयमिति॥२३॥

1B. No ०स्य। 2B. बन्धनीमध्यस्थो भागो नास्ति। 3B. असाध्यं। 4B. यथो०। 5B. बन्धनीस्थः पाठो नास्ति। 6A. बन्धनीस्थः पाठो नास्ति। 7A. No फलं।

अथ तत् शुभाशुभं फलं कथं विचार्यमिति[1] उपेन्द्रवज्रयाह ।—

दशाधिनाथस्य सुहृद्गृहस्थस्तदुच्चगो वाथ दशाधिनाथात् ।
स्मरत्रिकोणोपचयस्थितश्च ददाति चन्द्रः खलु सत्फलानि ।।२४।।

व्याख्या ।—एतादृशश्चन्द्रः [खलु निश्चयेन सत्फलानि शुभफलानि ददाति । कीदृशश्चन्द्रः ?[2]] दशाधिनाथस्य सुहृद् गृहस्थः । यस्मिन् दिने दशापति[3]मित्रस्य राशौ चन्द्रस्तिष्ठति तस्मिन् दिने शुभफलं भवतीत्यर्थः । अथवा तदुच्चग[4]श्चन्द्रः सत्फलानि ददाति । यस्मिन् दिने दशापतेरुच्चराशौ चन्द्रस्तिष्ठति तस्मिन् दिने शुभफलं भवतीत्यर्थः । एवं दशापतिराशावपि ज्ञेयम् । अथवा दशाधिनाथात् स्मरत्रिकोणोपचयस्थितश्चन्द्रः सत्फलानि ददाति । दशापतेः सकाशात् ७।५।९।३।६।१०।११ एतत्स्थाने चन्द्रो यस्मिन् दिने भवति तस्मिन् दिने शुभफलं भवतीत्यर्थः । अन्यथा अशुभमित्यर्थ[5]सिद्धम् ।।२४।।

एवं सामान्यतः शुभाशुभमुक्त्वा किं तत् शुभमशुभं वेति विशेषं वसन्ततिलकयाह ।—

उक्तेषु राशिषु गतस्य विधोः स राशिः स्याज्जन्मकालभवमर्तिधनादिभावः ।
तत्तद्विवृद्धिकृदसौ कथितो नराणां तद्भावहानिकृदथेतरराशि[6] संस्थः ।।२५।।

व्याख्या ।—उक्तेषु राशिषु दशापतेर्मित्रगृहे दशापतेरुच्चराशौ दशाधिनाथात् स्मरत्रिकोणोपचयेषु स्थितस्य विधोश्चन्द्रस्य योऽ[7]धिष्ठितराशिः स राशिर्यदि जन्मकालभवमूर्तिधनादिभावः स्यात्, तदा असौ चन्द्रः नराणां तत्तद्विवृद्धिकृत् कथितः । अथ इतरराशिसंस्थश्चन्द्रस्तद्भावहानिकृत् कथितः । एतदुक्तं भवति । दशेश्वरस्य मित्रगृहे उच्चराशौ वा दशानाथात् स्मरत्रिकोणोपचयेषु वा तत्काले यद्राशौ[चन्द्रः] तिष्ठति स राशिर्जन्मकाले तनुभावश्चेत् शरीरवृद्धिकरः । स राशिर्धनभावश्चेद् धनवृद्धिकरः । स राशिः सहजभावश्चेद् भ्रातृसुखदः । [सुहृद्भावश्चेत् सुहृत्सुखदः[8] ।] [सुतभावश्चेत् सुतसुखदः[9] ।] रिपुभावश्चेत् [रिपूणां नाशात् सुखम् । जायाभावश्चेत् स्त्रीसुखदः । मृत्युभावश्चेन्मृत्युहरः । नवमभावश्चेद्[10]] धर्मवृद्धिकरः । दशमभावश्चेत् कर्मफलदः । आयभावश्चेत् लाभकरः । व्ययभावश्चेद् व्ययहर[11] इत्यर्थः । अत्र उक्तराशिगतस्य चन्द्रस्य[12] शुभफलमुक्तम्[13] अरिमृत्युव्ययानां व्यस्तं फलं प्रदर्शितम् । अत एवोक्तं सारावल्याम् । "विपरीतं रिपुरन्ध्रव्ययेष्विति[14] । एवम् इतरराशिसंस्थ इति दशेश्वरस्य वैरिभ-नीचर्क्षसंस्थः तथा दशापतेः सकाशात् एकभ-द्वितीयचतुर्थाष्टमद्वादशग १।२।४।८।१२ श्चन्द्रो यस्मिन् राशौ तिष्ठति स राशिर्जन्मकाले तनुभावश्चेत् शरीरक्लेशकरः । धनभावश्चेद्धनहानिदः । एवमग्रेऽपि योज्यम् । रिपुमृत्युव्ययेषु[15] विपरीतं ज्ञेयम्, रिपुकरो मृत्युकरो व्ययकरश्चेति ।।२५।।

1B. No इति । 2B. बन्धनीस्थः पाठो नास्ति । 3A. No पति । 4B. गत० । 5B. No अर्थ । 6A. भाव । 7B. No यः । 8B. बन्धनीस्थः पाठो नास्ति । 9A. बन्धनीस्थः पाठो नास्ति । 10A. बन्धनीस्थः पाठो नास्ति । 11B. कर । 12B. No चन्द्रस्य । 13A. ०फलोक्तेः । 14B. व्ययेति । 15B. No व्ययेषु ।

अथ पुनरपि दशाप्रवेशसमये चन्द्रवशात् शुभाशुभमुपजातिकयाह ।।—

दशाप्रवेशे स्वगृहादिसंस्थे हिमद्युतौ यत् फलमुक्तमाद्यैः ।
तद्वाच्यमिन्दु[1]र्हि शुभाशुभाख्यं फलं मनोरूपतया ददाति ।। [२६] ।।

व्याख्या ।—हिमद्युतौ चन्द्रे दशाप्रवेशे[2] दशा[3]समये स्वगृहादिसंस्थे सति आद्यैर्वराहादिभिर्यत् फलमुक्तं तद्वाच्यं वक्तव्यम् । हि यतः इन्दुश्चन्द्रो मनोरूपतया शुभाशुभाख्यं फलं ददाति । तच्चोक्तं बृहज्जातके ।—

प्रारब्धा शुभदा दशा स्वगृहगे मानार्थसौख्यावहा
कौजे दूषयति स्त्रियं बुधगृहे विद्यासुहृद्वित्तदा ।
दुर्गारण्यपथालये कृषि[4]करी सिंहे सितर्क्षेऽन्नदा[5]
कुस्त्रीदा मृगकुम्भयोर्गुरुगृहे मानार्थसौख्यावहा ।। इति ।।२६।।

अथेष्टकष्टवशाद्[6] दशाफलमुपजातिकयाह ।—

उत्पादितं हि द्युचरस्य पूर्वं शुभाशुभाख्यं तु फलं यदत्र[7] ।
तेनानुसारेण दशासु कल्प्यं शरीरभाजामशुभं शुभं वा ।। [२७] ।।

व्याख्या ।—अत्र पद्धतौ "तद् घातमूलं फलमिष्टसंज्ञमि" [५० पृ०] त्यादिना द्युचरस्य ग्रहस्य यत् शुभाशुभाख्यम् इष्टकष्टाख्यं फलमुक्तं तेन अनुसारेण दशासु[8] शरीरभाजां प्राणिनां शुभमशुभं वा कल्प्यम् ।।२७।।

तत् फलं कथं कल्प्य[9]मित्युपजातिकयाह ।—

इष्टोत्कटत्वे हि शुभानि पुंसां फलान्यनिष्टान्यशुभोत्कटत्वे ।
साम्ये तु मिश्राणि फलानि नूनं फलं[10] त्रिधैवं परिकल्पनीयम् ।।२८।।

व्याख्या ।—एवमुक्तप्रकारेण फलं त्रिधा त्रिभिः प्रकारैः परिकल्पनीयम् । कथं तदित्याह । इष्टोत्कटत्वे इष्टाधिक्ये[11] सति पुंसां हीति निश्चयेन शुभानि फलानि भवन्ति । यस्य ग्रहस्य कष्टात् इष्टमधिकमस्ति तस्य ग्रहस्य दशायां शुभानि फलानि दशोक्तानि भवन्तीत्यर्थः । एवम्[12] अशुभोत्कटत्वे कष्टाधिक्ये सति पुंसाम् अनिष्टानि फलानि दशोक्तानि भवन्ति । [साम्ये इष्टकष्टसाम्ये तु पुंसां मिश्राणि फलानि शुभानि अशुभानि च दशोक्तानि फलानि भवन्ति[13]] ।।२८।।

अथ "स्वोच्चे रूपं चरणरहितम्" [५४ पृ०] इत्यादिना यत् सप्तवर्गजशुभाशुभमुक्तं तद्वशेन फलं रथोद्धतयाह ।—

1B. ०मिन्दौ । 2B. ०शा । 3B. No दशा । 4B. क्षय । 5B. ०र्क्षे तदा । 6B. No वशात् । 7B. यदा स्यात् । 8B. No ०सु । 9B. कल्पनीय० । 10A. फलैः । 11B. ०धिके । 12A. परं च । 13B. बन्धनीमध्यस्थः पाठो नास्ति ।

सप्तवर्गजफलस्य सूरिभिस्तत्प्रभोरिह फलस्य निश्चयात् ।
एवमेव परिकल्पना स्फुटा शोभना शुभफलस्य कीर्तिता ॥२९॥

व्याख्या।—सूरिभिः पण्डितैराद्यैः सप्तवर्गजफलस्य गृहहोराद्रेष्काणादीनां फलस्य परिकल्पना एवमेव अनेनैव प्रकारेण स्फुटा कीर्तिता। कस्मात्? शोभना शुभफलस्य अशुभा अशुभफलदातुस्तत्प्रभोर्गृहहोरादिपतेः फलस्य निश्चयात्। एतदुक्तं भवति। "स्वोच्चे रूपं चरणरहितमि"त्यादिना स्फुटं गृहजशुभं यस्य ग्रहस्याधिकं भवति तस्य ग्रहस्य गृहफलं शुभं भवति। यस्य अशुभमधिकं तस्य गृहफलम् अशुभं भवति। यस्य शुभमशुभं च समं भवति तस्य गृहफलं मिश्रं भवति। एवं होराद्रेष्काणादिष्वपि योज्यम् ॥२९॥

अथ किञ्चित् शुभमशुभं वा कालानियमेनोक्तं तद्दशासु भवतीति मन्दाक्रान्तयाह।—

यद् यद् द्रव्यं कथितमृषिभिर्यस्य यस्य ग्रहस्य
कर्माजीवोऽपि च तनुभृतां यश्च यस्योदितोऽत्र।
यद्भावोत्थं[1] यदपि गृहजं योगजं दृष्टिजं यत्
तत्तत् सर्वं ग्रहबलवशाद् योजनीयं दशासु ॥३०॥

व्याख्या।—तत्तत् सर्वं फलं दशासु योज्यं योजनीयम्, किन्तु ग्रहबलवशात्। ग्रहस्य बलाधिक्ये फलमुत्कटं बलमध्यमत्वे फलं मध्यमं ग्रहस्य हीने बले फलमल्पमिति। तत्तत्[2] किमित्याह। ऋषिभिर्यस्य ग्रहस्य यद् यद् द्रव्यमुक्तं तस्य दशायां तस्य द्रव्यस्य लाभो हानिर्वा भवतीत्यर्थः। तथा तनुभृतां प्राणिनां यो यः कर्माजीवः अत्र जातके उक्तः सोऽपि दशासु योज्यः। कर्माजीवस्तु बृहज्जातके उक्तः।—

अर्थाप्तिः पितृ-पितृपत्नि-शत्रु-मित्र-भ्रातृ-स्त्री-भृतकजनाद्दिवाकराद्यैः।
होरेन्द्वोर्दशमगतैर्विकल्पनीया भेन्द्वर्कास्पदपतिगांशनाथवृत्त्या ॥

इत्यादिना। तथा यद् भावोत्थं फलमुक्तं तदपि दशासु योज्यम्। भावफलमुक्तं बृहज्जातके। "शूरस्तब्धो विकलनयन" इत्यादिना[3]। तथा [यद् गृहजं[4]] राशिफलं तदपि दशासु योज्यम्। राशिफलमप्यु[5]क्तं तत्रैव। "वृत्तातास्रदृग्गुणशाकलघुभुगि"-त्यादिना। तथा योगजं फलमपि "तिग्मांशुर्जनयेद्धिमांशुसहित" इत्यादिना यदुक्तं फलं तदपि तद्दशायां योज्यम्। तथा यद्दृष्टिजं फलं "चन्द्रे[6] भूपबुधौ नृपोपमगुणी स्तेनोऽधनश्चाजगे" इत्यादिना यदुक्तं तदपि दशायां[7] योज्यमिति ॥३०॥

इति श्रीवल्लालदैवज्ञात्मजश्रीकृष्णदैवज्ञविरचिते श्रीपतिभट्टीयजातकपद्धत्युदाहरणे दशान्तर्दशाद्युदाहरणम् ॥७॥

1B. तद्भावोत्थं। 2B. तत्। 3B. अतः परं "ज्ञातव्यः" इत्यधिकः पाठः। 4A. बन्धनीमध्ये "योगजं गृहजम्" इति पाठः। 5B. No अपि। 6B. No चन्द्रे। 7A. No दशायां।

अष्टमं प्रकीर्णकाध्यायोदाहरणम्

इदानीं प्रकीर्णकाध्यायमारभमाणस्तावत्[1] प्रयोजनं वंशस्थेनाह।—

बहुप्रकारं बहुधाऽत्र भुज्यते यतः फलं[2] प्राणिगणैः प्रतिक्षणम्।
प्रकीर्णरूपस्य फलस्य निर्णयस्ततो मयाऽसावधुनाऽभिधास्यते[3] ॥१॥

व्याख्या।—बहुधा प्रायः प्राणिगणैः प्रतिक्षणं बहुप्रकारं फलं यतो भुज्यते ततः प्रकीर्णरूपस्य फलस्य असौ-निर्णयोऽधुनाऽभिधास्यत इति ॥१॥

अथ तमेव निर्णयं रथोद्धतोपजातिकाभ्यामाह।—

अष्टवर्गजफलं ग्रहस्य यत् साध्वसाध्वपि च तस्य लग्नतः।
चन्द्रतोऽप्युपचयस्थितोच्चभ[4]स्वत्रिकोण-शुभदालयेषु तत् ॥२॥
पूर्णं शुभं स्यादशुभं च हीनं विपर्यये कष्टफलं हि पुष्टम्।
अपुष्टमिष्टं[5] पुनरत्र वाच्यं[6] बलाबलं तस्य विचार्य सम्यक्[7] ॥३॥

व्याख्या।—यस्य ग्रहस्य यत् साधु असाध्वपि शुभमशुभं च यत्[8] अष्टवर्गजफलमुक्तं तस्य ग्रहस्य लग्नतश्चन्द्रतोऽपि उपचयेषु त्रिषडेकादशदशमेषु स्थितं यत् उच्चभम् उच्चराशिः अथवा स्वं स्वगृहम् अथवा त्रिकोणं मूलत्रिकोणम् अथवा शुभदालयं मित्रगृहम् एषां मध्ये कुत्रचित् स्थाने स्थितस्य तस्य[9] ग्रहस्य [तदष्टवर्गजफलं शुभं चेत्तर्हि पूर्णं भवति। वारि(?) अष्टवर्गजफलमशुभं तर्हि उक्तस्थानस्थितस्य ग्रहस्य[10]] तत् अशुभं फलं हीनमल्पं भवति। अथ विपर्यये चन्द्रलग्नाभ्याम् अप[11]चये नीचराशौ शत्रुराशौ वा स्थितस्य तथा अस्त गतस्य[12] कष्टफलं पुष्टं भवति। इष्टं पुनः शुभफलं तु अपुष्टमल्पं भवति। परं तस्य बलाबलं सम्यग् विचार्य फलं वाच्यमिति ॥२-३॥

अथ जन्मनि राजयोगे[13] सत्यपि कश्चिद् राज्यं[14] न[15] प्राप्नोति। अथ च[16] राजयोग-[17] साम्येऽपि कश्चिदल्पराज्यभाक् कश्चिन्महाराजो भवतीति[18] कथमित्यत्र समाधानमुपजातिकयाह।—

ये राजयोगाः कथिता हि तेषां भङ्गो न चेत् स्यात् सफलास्तदा ते।
ज्ञेया बुधैर्योगद[19] वीर्ययोगाद् द्युगामिनां रश्मिफलानि तद्वत् ॥४॥

1B. स्तत्। 2A. ततः। 3B. ०धीयते। 4B. ०च्चगः। 5A. पुष्टं। 6A. [चाद्यं ? चोद्यं] 7B. तज्ज्ञैः। 8B. No 'च यत्'। 9B. No तस्य। 10A. बन्धनीस्थः पाठो नास्ति। 11A. चन्द्रलग्नाप०। 12B. अतः परं "ग्रहस्य" इत्यधिकम्। 13A. ०गेऽपि। 14B. राज्ययोग्यं राज्यं। 15B. No न। 16A. वा। 17B. योगी। 18B. No इति। 19B. ०गज।

व्याख्या ।—ये राजयोगाः कथिताः सन्ति, ते[1] तदा तर्हि सफलाः[2] चेद् यदि तेषां राजयोगानां भङ्गो[3] जातकोक्तो न स्यात् । यदि तु[4] राजयोगभङ्गः स्यात् तर्हि विद्यमानोऽपि राजयोगो व्यर्थ इत्यर्थ[5]सिद्धम् । अथ च ते राजयोगाः योगदवीर्ययोगात्[6] ज्ञेयाः । राजयोगकर्तॄणां ग्रहाणां बलोत्कटत्वे सति महाराजो भवति, मध्यमबलत्वे[7] राजा भवति, हीनबलत्वेऽ[8]ल्पराज्यभाग् भवतीति । तद्वत् तेनैव प्रकारेण द्युगामिनां ग्रहाणां रश्मिफलान्यपि ज्ञेयानि ।

अथ दशारिष्ट[9]निर्णयं भुजङ्गप्रयातेनाह ।—

दशानाम[10]रिष्टे तथा चास्य भङ्गे दशारिष्टभङ्गेषु[11] वीर्योत्कटत्वात्[12] ।
दशारिष्टभङ्गौ[13] बुधैः कल्पनीयौ[14] विधाय ग्रहान् किं तु तत्[15]कालजातान् ॥५॥

व्याख्या ।—दशानाम्[16] अरिष्टे[17] सति तथाऽस्य अरिष्टस्य भङ्गे च सति [दशारिष्टभङ्गेषु बलोत्कटत्वात् दशारिष्टभङ्गौ च बुधैश्चिन्तनीयौ[18]] दशारिष्टकर्तुर्बलोत्कटत्वे दशारिष्टं भवति[19] रिष्टभङ्ग[20]कतुर्बलोत्कटत्वे [रिष्टभङ्गो भवतीति किंतु तत्कालजातान् ग्रहान्[21]] विधाय दशाप्रवेशकालीनांस्तु[22] स्फुटग्रहान् कृत्वा ततः शुभाशुभाभिज्ञानाय[23] "यच्छुभाशुभ-बलान्तराद् बलमि"त्यादिना रिष्टेश-भङ्गेश्वरयोर्बलवशाद्[24] रिष्टभङ्ग[25]निर्णयो विधेय इत्यर्थः ॥५॥

अथ दशारिष्टं कीदृक्[26] तत् स्वागतया[27] आह ।

क्रूर-खेचरदशासमये चेद् दारु[णान्तरदशाविनिपातः[28]] ।
तत करोति बहुधा विपदं [स प्राणिनामतितरामरियोगे ॥६॥

व्याख्या—चेत् क्रूरखेचरदशासमये दारुणस्य क्रूरस्य ग्रहस्य अन्तर्दशाविनिपातो भवति, तर्हि स ग्रहः प्राणिनां बहुधा विपदं[29]] करोति अरियोगे तु दशान्तर्दशास्वामिनोर्वैरे सति अतितरामतिशयेन विपदं करोति ॥६॥

1B. तत् । 2B. सफलम् । 3B. योगो । 4B. No तु । 5B. No इत्यर्थ । 6B. वीर्येण योगात् (No योगद] । 7B. मध्यबले । 8B. बले० । 9A. ०दशादि । 10A. नाथ । 11A. ०ङ्गेश । 12B. ०टत्वम् । 13B. भङ्गो । 14B. ०नीयो । 15B. तात्० । 16A, दशानाथे । 17B. अतः परं "भङ्गे" इत्यधिकम् । 18A. बन्धनीस्थः पाठो नास्ति । 19B. No रिष्टं भवति । 20B. No भङ्ग । 21B. बण्धनीमध्यस्थः पाठो नास्ति । 22B. कालान् । 23B. ०भान्यानीय । 24A. अतः परं "समये चेद्दारुणा" इति सम्पातायातोऽधिकः पाठः । 25A. बृष्टिभङ्ग । 26B. उक्तं । 27A. No स्वागतया । 28B. बन्धनीमध्ये "०णोऽन्तरदशां कुरुतेऽन्यः" इति पाठः । 29A. बन्धनीमध्यस्थः पाठो नास्ति ।

अथान्यथा दशारिष्टभङ्गमुपेन्द्रवज्रयाह ।––

दशाप्रवेशे बलवान् ग्रहश्चेच्छुभाधिमित्रग्रहवर्गसंस्थः ।
निरीक्षितः सौम्यसुहृद्ग्रहैश्च[1] दशास्वरिष्टस्य तदा[2] हि भङ्गः ॥७॥

व्याख्या ।––तदा दशासु अरिष्टस्य अवश्यं भङ्गो भवति । तदा कथम् ? चेद् यदि दशाप्रवेशसमये बलवान् यः कश्चिद् ग्रहः शुभाधिमित्रग्रहवर्गस्थो[3] भवति शुभोऽधिमित्रं च यो ग्रहस्तस्य वर्गे भवति[4] [तथा स ग्रहः सौम्यसुहृद् ग्रहैः शुभैर्मित्रग्रहैः [च] निरीक्षितो भवति तर्हि अरिष्टस्य भङ्गो भवतीत्यर्थः] ॥७॥

अथ स्त्रीजातके विशेषं शालिन्याह ।––

स्त्रीणामुक्तं जातके यच्च पुंवत्तल्लग्नेन्द्वोर्वीयतोऽत्र[6] प्रकल्प्यम् ।
योगात्तासां यच्छुभं वा[7]ऽशुभं वा तन्निःशेषं कल्पयेत् खेटवीर्यात् ॥८॥

व्याख्या ।––जातके यत् फलं स्त्रीणां पुंवत् पुरुषवत् उक्तं तत् अत्र लग्नेन्द्वोर्वीर्यतः प्रकल्प्यम्, "युग्मेषु लग्नशशिनोः प्रकृतिस्थिता स्त्री"त्यादिबृहज्जातकोक्तेः । तथा तासां स्त्रीणां योगात् ग्रहयोगात्[8] यत् शुभमशुभं वा भवति तत् निःशेषं सकलं खेटवीर्यात् योगकर्तृ ग्रह[9]बलात् कल्पयेत् न तु लग्नचन्द्रयोर्वीर्यादिति ॥८॥

अथ निर्याण[10] मुपजातिकयाह ।––

नै[11]र्याणिका ये कथिताश्च योगाः स्थितिं च तेषामिह भावकॢप्त्या ।
विज्ञाय धीमान् ग्रहयोगजातं निर्याणमस्मिन् परिकल्पयेच्च ॥९॥

व्याख्या ।––ये नै[12]र्याणिका योगाः "शूलाग्राभिहतस्य सूर्यकुजयोर्मृत्युः खबन्धुस्थयोरि"त्यादयः कथितास्तेषां योगानां भावकॢप्त्या स्थितिं विज्ञाय धीमान् ग्रहयोगजातं निर्याणम्[13] अस्मिन् अरिष्टे परिकल्पयेत् ॥९॥

अथ रथोद्धतयोपसंहरति ।––

कण्टकादिपरिभाषयाऽनया प्रोक्तया सकलभावजातया ।
जातकोदितफलस्य निश्चितं प्रत्ययो भवति धीमतामिह ॥१०॥

व्याख्या ।––प्रोक्तया अनया सकलभावजातया कण्टकादिपरिभाषया केन्द्रपणफरापोक्लिमेति, तथा तनु-धन-सहजेत्यादिकया जातकोदितस्य[14] फलस्य धीमतां निश्चितं प्रत्ययः प्रतीतिर्भवति ॥१०॥

1A. सौम्यग्रहैश्च तद्वत् । 2A. तथा । 3A. वर्गगो । 4A. अतः परं 'इत्यर्थः' इत्यधिकम् । 5B. बन्धनीस्थः पाठो नास्ति । 6B. No अत्र । 7A. चा० । 8B. No ग्रहयोगात् । 9B बृहद् ० । 10B. निर्णय० । 11A. नि० । 12A. नि० । 13B. निर्णयम् । 14B. No ०स्य ।

अथ ग्रन्थसमाप्तिं वैतालीयेनाह ।—

इति जातककर्मपद्धतिं गुरुपादाब्जयुगप्रसादतः ।

वरशिष्यजन[1]प्रबोधिनीं कृतवान्श्रीपतिरग्रजाग्रणीः ॥११॥

व्याख्या ।—अग्रजा [ग्रणीः अग्रजेषु ब्राह्मणेषु[2]] अग्रणीः श्रेष्ठः श्रीपतिराचार्यः **गुरुपादाब्जयुगप्रसादतः** जातककर्मपद्धतिम् इति कृतवान् । कीदृशीं जातककर्मपद्धतिम् ? **वर[3]शिष्य (जन) प्रबोधिनीम्** । वरः श्रेष्ठो यः शिष्यजनस्तं प्र[4]बोधयितुं शीलमस्या [अ] स्तीति ॥

अथ ग्रन्थश्लोकभ्रंशज्ञानार्थं तथा प्रक्षेपज्ञानार्थं च ग्रन्थसंख्यां शालिन्याह ।

अध्यायानामष्टके वृत्तसंख्या संजाताऽस्यां[5] षट्-त्रि-चन्द्रप्रमाणा १३६ ।

प्रोक्ताऽनुष्टुप्छन्दसा ग्रन्थसंख्या श्लोकेनैकेनाढ्या हि द्विशत्या ॥१२॥

व्याख्या ।—[अस्यां पद्धतौ अध्यायानाम् अष्टके वृत्तसंख्या[6]] षट्त्रिंशदधिकं शतं १३६ **प्रमाणं** यस्यास्तादृशी **प्रोक्ता** । अनुष्टुप्छन्दसा तु एकेन श्लोकेन आढ्या द्विशत्या ग्रन्थसंख्या प्रोक्ता । एतदुक्तं भवति । यानि वृत्तानि निबद्धानि सन्ति[7] तानि षट्त्रिंशदधिकं शतमेव १३६, यदा तु द्वात्रिंशदक्षराणामेकः श्लोकः[8] इति [गणना ग्रन्थ-संख्यया] क्रियते तदा शतद्वयमेव श्लोकाधिकं भवतीति ॥१२॥

इति श्रीवल्लालदवज्ञात्मज-श्रीकृष्णदैवज्ञविरचिते[10] [श्रीपतिभट्टीय-जातकपद्धत्युदाहरणे अष्टमाध्यायः[11] ।

[समाप्तोऽयं ग्रन्थः]

8A. No **जन** । 2B. बन्धनीमध्यस्थः पाठो नास्ति । 3B. निज । 4B. प्रति० । 5B. **०ता स्यात्** । 6A. बन्धनीमध्ये 'षट्त्रिचन्द्रप्रमाणा' इति पाठः । 7B. No सन्ति । 8A. अतः परं 'क्रियते' इत्यधिकम् । 9A. बन्धनीमध्य संख्यया गणना' इति पाठः 10B. ०चितं । 11B, बन्धनीमध्ये "श्रीपतिपद्धतेरुदाहरणं समाप्तम्" इति पाठः ।

Index of Verses of the Jataka-paddhati.

The first figure against the pratīka of each verse refers to the chapter and the second one to the number of verses therein.

General Index

Anonymous authors or quotations.

Corrections

p. 16 स्व स्व क्षेपाः पृथक्....add ।।६।। at the end of the verse; and this should be in bigger type,

p. 28 last line of Text read च after दिने रात्रौ before बलवान् ।

p. 29. for खचरा read खेचरा in v. 12 and for पक्ष read पक्षः ।

p. 65, l. 11 for गुणकः read गुणकैः ।

p. 97 for स्वकाये in v. 9 read स्वकीये ।

p. 73 तस्य स्फुटस्यापि etc. read this Text portion as quoted by ehe commentator for explanation ; so this will be in smaller type.

p. 80 for षष्टिग in l. I read षष्टिगुणं

p. 80 for षड्..वनो० in l. 6 read षड् भवनो०

p. 112 for सावनौ यदि in v. 20 read सावनो यदि ।

p. 117 for भवमर्ति० in 25 a read भवमर्ति ।

p. 121 for खचर० and दारु {णामृतर० in 6 a read खेचर० and दारुणान्तर ।